अप्रतिमल्लो वादी सोऽभूत् । स्कन्दिलाचार्यैः स्वपदे निवेशितः । वृद्धवादी इति ख्यातं तन्नाम । स्कन्दिलाचार्याः समाधिमृत्युरथेन धामगमन् ।

एकदा वृद्धवादी 'भृगु'पुरं गच्छन्नास्ते । इतश्चा'ऽवन्त्यां' विक्रमादित्यो राजा । यस्य दानानि—

अष्टौ हाटककोटयस्त्रिनवतिर्मुक्ताफलानां तुलाः
पञ्चाशन्मदगन्धलुब्धमधुपक्रोधोद्धुराः सिन्धुराः ।
लावण्योपचयप्रपञ्चितदृशां पण्याङ्गनानां शतं
दण्डे 'पाण्ड्य'नृपेण ढौकितमिदं वैतालिकस्यार्प्यताम् ॥ १ ॥[4]

इत्यादीनि ख्यातानि । तस्य राज्ये मान्यः 'कात्यायन'गोत्रावतंसो देवर्षिर्द्विजः । तत्पत्नी देवसिका । तयोः सिद्धसेनो नाम पुत्रः । स प्रज्ञाबलेन जगदपि तृणवद् गणयति । प्रज्ञायाश्च इयत्ता नास्ति । जगति ततः पठ्यते—

मिता भूः पत्याऽपां स च पतिरपां योजनशतं
सदा पान्थः पूषा गगनपरिमाणं कलयति ।
इति प्रायो भावाः स्फुरदवधिमुद्रामुकुलिताः
सतां प्रज्ञोन्मेषः पुनरयमसीमा विजयते ॥ १ ॥[5]

येन वादे जीये तस्याहं शिष्यः स्याम इति प्रतिज्ञा तस्य ।

---

१ छाया— पत्रमवलम्बित तथा यो जल्पति पुष्पेत् न मुशलमिह ।
तमहं निराकृत्य पुष्पति मुशलमिति स्थापयामि ॥
२ ग 'थावेमि' । ३ आर्या । ४ ख-घ-'मद्गो शृङ्ग' । ५ शालिनी ।
६ क ख- 'स्थापितम्' । ७ शार्दूल० । ८ पूर्यः । ९ शिखरिणी ।

क्रमेण वृद्धवादिनः कीर्तिं श्रुत्वा तं तत्सम्मुखं धावति स्म। सुखासनारूढो भृगुपुरं गतः। तावत् भृगुकच्छसीम्नि वृद्धवादी मार्गे मिलितः। परस्परमालापो जातः। सिद्धसेनो मन्यते— वादं देहि। सूरिराह— अत्र परं के सभ्याः? सभ्यान् विना वादे जिताजिते को वदेत्? । सिद्धसेनेनोक्तम्— एते गोपालकाः सभ्या भवन्तु। वृद्धवादिना भणितम्— तर्हि ब्रूहि। तत्र सिद्धसेनस्तत्र भगवद्गोचरे चिरं संस्कृतेन जल्पम् जल्पमकरोत्। क्रमेण च स्थितः। गोपैरुक्तम्— किमप्ययं न वेत्ति, केवलमुच्चैः पूत्कारं पूत्कारं कर्णौ नः पीडयति। धिग् धिग्। वृद्ध! त्वं ब्रूहि किंचित्। ततो वृद्धवादी कक्षां बद्ध्वा तद्गतं छन्दसा नृत्यति—

नवि मारियइ नवि चोरियइ परदारह गमणु निवारियइ।
थोवाथोवं दाइयइ सग्गि(ग्गि) टु(डु)गुडुगु जाइयइ ॥१॥

पुनः पठति च—

गुलमहुवे चावा तिलतन्दुली वेणिहिं वज्जावइ वासली।
पाडिरेमि ओढणि [illegible] एण परि भावह पूज(ए)इ स्वी ॥१॥

पुनरपि च—

कालउ कंबलु अरुणी वोट्टु छासिहिं भाण्डु भरिउं निपट्टु।
अइवडु पडि(प)उ नीलइ झा(झा)डि अवर किं सरगह सिंग निलाडि (?) ॥२॥

---

१ क—ख—'चोरिय' ।
२ छाया— नापि मार्यते नापि चोर्यते परदारगमनं निवार्यते। स्तोकात्स्तोकं दीयते स्वर्गे [illegible] गम्यते।
३ क—'थोवाथोवं दाइयइ ... जाइयइ'; ग—'थोवाथोवं दाइयइ ... जाइयइ'।
४ छाया— गुडमधुनी [illegible] तिलतन्दुलौ वेणुभिर्वाद्यते वांसली। परिधाने आच्छादने [illegible] एवं पुजयति [illegible]।
५ छाया— कृष्णः कम्बलोऽरुणी वृद्धा [illegible] भाण्डं भृतं निपतितम्। अतिबृहत् पतितो नीले [illegible] अपरः किं स्वर्गः [illegible] ॥
६ क—ग 'भाउ'। ख—[illegible] क—[illegible]।

गोपा ऊचुः, प्रोचु—वृद्धवादी सर्वज्ञः, अयं कीदृक् श्रुतिसुखमुपयोगि पठति। सिद्धसेनस्तु असाम्प्रतपाठक इत्यनिन्दन्। तत सिद्धसेनः प्राह—भगवन्! मां प्रव्राजय। तव शिष्योऽहं, वादे सभ्यसम्मतं जितत्वात्। अथ वृद्धवाद्याह—'भृगुपुरे राजसभायामावयोर्वादोऽस्तु। गोपसभायां को वादः'। सिद्धसेनेनोक्तम्—अहमकालज्ञः, त्वं तु कालज्ञः, यः कालज्ञः स सर्वज्ञः। त्वयैव जितम्। इत्येवं वदन्तं तं तत्रैव दीक्षयामास।

तत्र प्रभृति 'भृगु'पुरनरेन्द्रेण तं वृत्तान्तं ज्ञात्वा 'तालारसो' नाम ग्रामः स्थापितः प्रीतेः। नाभेयचैत्यं कारितम्। नाभेयबिम्बं वृद्धवादिना प्रतिष्ठितम्। सङ्घो जगर्ज। सिद्धसेनस्य दीक्षाकाले कुमुदचन्द्र इति नामासीत्। सूरिपदे पुनः सिद्धसेनदिवाकर इति नाम पप्रथे। तदा 'दिवाकर' इति सूरेः सञ्ज्ञा, स्वामिशब्दवद् वाचकशब्दवच्च। वृद्धवादी अन्यत्र विहरति। सिद्धसेनस्त्व'ऽवन्तीं' ययौ। सङ्घः सम्मुखमागत्य तं सूरिं 'सर्वज्ञपुत्रक' इति बिरुदे पठ्यमाने'ऽवन्ती'चतुष्पथं नयति। तदा राजा विक्रमादित्यो हस्तिस्कन्धारूढः सम्मुखमागच्छन्नस्ति। राज्ञा श्रुतम्—सर्वज्ञपुत्रक इति। तत्परीक्षार्थं हस्तिस्थ एव मनसा सूरेर्नमस्कारं चकार, न वाक्शिरोभ्याम्। सूरिश्चासन्नायातो धर्मलाभं बभाण। राजेन्द्रेण भणितम्—अवन्दमानेभ्योऽस्मभ्यं को धर्मलाभः?। किमयं सुलभो लभ्यमानोऽस्ति?। सूरिणा श्रुत्वाऽभाणि—चिन्तामणिकोटितोऽप्यधिकोऽयं वन्दमानाय देयः, न च त्वया न वन्दिता वयम्, मनसः सर्वप्रधानत्वात्, अस्मत्सार्वज्ञपरीक्षायै हि मनसाऽस्मानवन्दथाः। ततस्तुष्टो राजेश्वरो हस्तिस्कन्धादवरुह्य सङ्घसमक्षं वचन्दे कनककोटिं चानाययत्। आचार्यैः सा न जगृहे, निर्लोभत्वात्। राज्ञाऽपि न जगृहे, कल्पितत्वात्। ततः आचार्यानुज्ञया सङ्घपुरुषैर्जीर्णोद्धारे व्ययिता। राजवहिकायां त्वेवं लिखितम्—

१ ख-'मुपयोग'। २ ग-'ऽस्माकं'। ३ ख-घ-'सूरिसुत्राम्णा(?)भाणि'।

धर्मलाभ इति प्रोक्ते, दूरादुच्छ्रितपाणये ।
सूरये सिद्धसेनाय ददौ कोटिं नराधिपः ॥ १ ॥

श्रीविक्रमादित्ये अवसरे तेनैव भगवता भणितम्—

'पुण्णे वाससहस्से सयंमि वरिसाण नवनवइअहिए ।
होही कुमरनरिंदो तुह विक्कमराय ! सारिच्छो ॥ १ ॥

अन्यदा सिद्धसेन[1] चित्रकूटमटति स्म । तत्र चिरन्तनचैत्ये स्तम्भमेकं महान्तं दृष्ट्वा पप्रच्छाभाषीत्—कोऽयं स्तम्भो महान् ! किंमयः ? । तैरुक्तम्—पूर्वाचार्यैरिह रहस्यविद्यापुस्तकानि न्यस्तानि सन्ति । स्तम्भस्तु तदौषधद्रव्यमयः । जलाग्न्यादिभिरभेद्यो ऽस्ति । तदाकर्ण्य श्रुत्वा सिद्धसेनस्तस्य स्तम्भस्य गन्धं गृहीत्वा प्रतीपौषधरसैस्तमाच्छोदयामास । तैः स प्रादुरभूद् विकसितः । मध्यात् पत्रिका पुस्तकः । तस्मिन् पुस्तके विस्तारिते प्रथमपत्र एव द्वे विद्ये लब्धे स्म । एका सर्षपविद्या अपरा हेमविद्या । तत्र सर्षपविद्या सा यया कार्ये मान्त्रिको यावन्तः सर्षपान् जलाशये क्षिपति तावन्तोऽश्ववाराः चतुर्विंशतिसुभटपरमसन्नद्धा निस्सरन्ति । ततः परबलं भज्यते । सुभटाः कार्यसिद्धेरनन्तरमदृश्यीभवन्ति । हेमविद्या पुनरनेन सुवर्णसिद्धिः स्यात् निष्पादयति येन तेन धातुना । तद् विद्याद्वयं सम्यग् वाचय । पाश्चात्ये वाचयति तावत् स्तम्भो मिलितः पुस्तकगर्भः । ये च वागुरूपमा—अयोग्येऽपि ईदृशानां रहस्यानां मा वाचक इत्याः; सद्यो मम विनश्यत्, इति । ततो भीत स्थितः । यद् विद्याद्वयं लब्धं तदभ्यस्तम् । ना-

---

भवतुर् ।

१ अन्या— पूर्वे चतुरपि नवे ततः ... ।
... कुमारत्वेनास्य विक्रमस्य । वरताः ॥
३ अन्यो । 'चौपेसे' इति पाठान्तरम् । ५ एतन्नामानि न प्रसन्ने । ६ प—
मनपदे । ७ क—'अपरा हेमविद्या' । ८ क—'चारित्र' ।

धिक लभ्यते अप्राप्तित· । 'चित्रकूटा'त् सिद्धसेनोऽथ पूर्वदेशे 'कूर्मार'पुर गत. । तत्र देवपालराजान(?ज) प्रबोध्य नीलीरागजैनमकार्षीत् । तत्रास्थात् । [1]नित्यमिष्टा गोष्ठी वर्तते । कियानपि कालो [2]जगाम ।

एकदा राज्ञा रह एत्य साश्रुणा विज्ञप्तम्—भगवन् ! पापा वयं नेदृश[3]मधुरभवद्गोष्ठीयोग्या , येन सङ्कटे पतिता· स्म । सूरीन्द्रः पप्रच्छ—किं सङ्कट व ? । राजा प्राह—सीमालभूपाला सम्भूय मद्राज्य जिघृक्षव आयान्ति । सूरिराह–राजन् ! मा स्म विह्वलो भू· । तवैव राज्यश्रीर्वशे यस्याह सखा । राजा हृष्ट· । परचक्रमायातम् । विद्याद्वयशक्त्या राजेन्द्र समर्थो विहित सूरिणा । भग्न परबलम् । गृहीत तत्सर्वस्वम् । वादितान्यातोद्यानि । ततो बाढ राजा सूरिभक्त· सम्पन्न । सूरय सगच्छा अपि क्रियाशैथिल्यमादधत । यत —

चाटुकारगिरां गुम्फै , कटाक्षैर्मृगचक्षुषाम् ।
केलिकल्लोलितै [4]स्त्रीणां, भिद्यते कस्य नो मन ? ॥ १ ॥[5]

[7]सुअइ गुरू निच्चिंतो, सीसा वि [8]सुअति तस्य अणुकमसो ।
ओसाहिज्जइ मुक्खो, हुड्डाहुड्ड सुयतेहि ॥१ ॥[6]

श्रावका· पौपधशालायां प्रवेशमेव न लभन्ते ।

[10]दंगपाण पुप्फफल, अणेसणिज्ज गिहत्थकिच्चाइ ।
अजया पडिसेवती(?ता), जइवेसविडंवगा नवर ॥ १ ॥[12]

---

१ ग--घ--'नित्यमिष्टगोष्ठी' । २ घ--'जगाल' । ३ ग--घ--'मधुरगोष्ठी०'
४ ख--घ--'श्रीणां' । ५ अनुष्टुप् ।
६ छाया— स्वपिति गुरुर्निश्चिन्त शिष्या अपि स्वपति तस्यानुक्रमत ।
अवसद्यते मोक्ष स्पर्धया स्वपद्भि ।
७ घ--'सूयइ' । ८ घ--'स्वपति' । ९ आर्या ।
१० छाया— दकपान पुष्पफलमनेषणीय गृहस्थकृत्यानि ।
अयतना प्रतिसेवमाना यतिवेषविडम्बका नवरम् ॥
११ ख-'पडिसेहती । १२ आर्या ।

इति मया समाचर्यते । तदुपश्रुत्य वृद्धवादी कृपया तं निस्तारयितुमेकाकीभूय गच्छन् पथमेव व्यस्य तेनागतः । द्वारे स्थितः सूरीणामग्रे कथाययति द्वाःस्थैः यथा—वादी एकोऽभ्यागतोऽस्ति । मध्ये सूरिभिराहूय पुर उपवेशितः । बहुजनगुष्ठितसर्वजना वृद्धवादी वदति—व्याख्यातृ—

अणफुल्लियफुल्ल म तोडहि मा रोवा मोडहि ।

मणकुसुमेहिं अच्चि निरंजणु हिंडहि काइं वणेण वणु ॥ १ ॥

सिद्धसेनश्चिन्तयन्नपि न वेत्त्यर्थम् । ततो व्याख्याति—किमेवं न गुरवो वृद्धवादिनो येन भणितमध्यमपि व्याख्यातुं न शक्नोमि ? । पुनः पुनः पश्यता उपलक्षिता गुरवः । पादयोः प्रणम्य क्षामिताः[1] व्याख्यां पृष्टाः । तेऽथ व्याचक्षिरे यथा— अणफुल्लियफुल्ल प्रासादस्थानन्तकालात् अप्राप्तफलानि पुष्पाणि मा त्रोटय । को भावः[2] । योगः कल्पद्रुमः । कल्पम्[3] यस्मिन् मूलं यमनियमाः, ध्यानं प्रत्याहारप्राय एकाग्रभावी सम्यक् ध्यानस्कन्धप्रतिपन्नस्कन्धः मारणस्तम्भनमोहनवशीकरणादिसामर्थ्यानि पुष्पाणि केवलज्ञानं फलम् । अत्रापि योगकल्पद्रुमस्य पुष्पाण्युद्गतानि सन्ति तत् कल्पकालेन तु पुरः फलिष्यन्ति । तान्यल्पसफलान्येव किमिति त्रोटयसि ? । मा त्रोटय इति भावः । मा रोवा मोडहि इह 'रोपा' पञ्च महाव्रतानि तानि मा मोटय । मणकुसुमेहिं मन पुष्पैर्निरञ्जन-जिन पूजय । 'हिंडहि काइं वणेण वणु किं हिण्डसे[4] । राजसभादीनि वनानि विरसफलानि कथं करोषीति

---

१ घ—'क्षमया'। २ क घ तत्र चत्र

३ जक—अप्राप्तफलानि पुष्पाणि मा त्रोटय मा रोपाः मोटय ।

मन पुष्पैर्जिन निरञ्जनं पूजय हिण्डसे किम् वनात् वनम् ॥

४ क-घ—'पुष्पैः ५ क ख-ग— हिंडहि वणेण ६ ख-ग 'कल्पः ।

क-ख-घ कल्पिता । ७ क— इहैव । ८ क आसनस्थाः सी-

ख 'रोपा यत्र ।

पदार्थे । ततो वादी ता गुरुशिक्षा मूर्ध्नि धृत्वा राजानमापृच्छ्य वृद्धवादिना सह निबिडचारित्रधरो विजहार । अपरापरगुरुभ्य. 'पूर्व'गतश्रुतानि लेभे । वृद्धवादी द्या गत ।

एकदा सिद्धसेनः सङ्घं [2]मेळयित्वाऽऽह स्म—सकलानप्यागमानह [3]सस्कृतमयान् करोमि, यदि आदिशथ । तत सङ्घो वदति स्म—किं सस्कृत कर्तुं न जानन्ति श्रीमन्तस्तीर्थङ्करा गणधरा वा यदर्धमागधेनागमानकृपत [4] । तदेवं जल्पतस्तव महत् प्रायश्चित्तमापन्नम् । किमेतत् तवाग्रे कथ्यते ? । स्वयमेव जानन्नसि । ततो विमृश्याभिदधेऽसौ—सङ्घोऽवधारयतु, अहमाश्रितमौनो द्वादशवार्षिक 'पाराञ्चिक' नाम प्रायश्चित्त गुप्तमुखवस्त्रिकारजोहरणादिलिङ्ग प्रकटितावधूतरूपश्चरिष्याम्युपयुक्त । एवमुक्त्वा गच्छ मुक्त्वा ग्रामनगरादिषु पर्यटन् द्वादशवर्षे श्रीम'दुज्जयिन्यां' महाकालप्रासादे 'शेफालिका'कुसुमरञ्जिताम्बरालङ्कृतशरीर' समागत्यासाञ्चक्रे । ततो देव कथ न [5]नमस्यसीति लोकैर्जल्प्यमानोऽपि नाजल्पत् । एव च जनपरम्परया श्रुत्वा श्रीविक्रमादित्यदेव समागत्य जल्पयाञ्चकार— क्षीरलिलिक्षो ! भिक्षो ! किमिति त्वया देवो न वन्द्यते ? । [6]ततस्तु राजान प्रतीदमवादि वादिना— मया नमस्कृते लिङ्गभेदो भवतामप्रीतये भविष्यति । राज्ञोचे— भवतु, क्रियतां नमस्कार । तेनोक्तम्— श्रूयतां तर्हि । पद्मासनेन भूत्वा द्वात्रिंशद्द्वात्रिंशिकाभिर्देव स्तोतुमुपचक्रमे । तथाहि—

"स्वयम्भुव भूतसहस्रनेत्र-मनेकमेकाक्षरभावलिङ्गम् ।
अव्यक्तमव्याहतविश्वलोक-मनादिमध्यान्तमपुण्यपापम् ॥ १ ॥[7]"

इत्यादि [8]श्रीवीरद्वात्रिंशद्द्वात्रिंशिका कृता । पर तस्मात्

---

१ जैनानां द्वादशाङ्गान्त एको विभाग सस्कृतप्राय । २ 'मेळवीने' इति भाषायाम् । ३ ग घ 'सस्कृतान्' । ४ ख-'मागधिना' । ५ ग-'नमसीति' । ६ क-ख-घ-'ततस्त्विदमवादि' । ७ उपजातिः । ८ ग-प्रतौ 'श्रीवीर०' इत्यारभ्य 'स्तव चक्रे' एतत्पर्यन्तमधिकम् ।

सततं(घ) चतुश्चत्वारिंशत्कस्य पश्चात् श्रीपार्श्वनाथद्वात्रिंशिकाम-भिधानं कल्याणमन्दिरस्तवं[स चक्रे] प्रथम एव श्लोके प्रासाद-स्थितात् शिवलिङ्गात् धूमवर्तिरुदतिष्ठत्। ततो जनै-र्ध्यानमिदमूचे—अद्यापि त्र्यम्बकः कालाग्निरुद्रोऽप्य समास्तृतीय-नेत्रानलेन भिक्षुं भस्मसात्करिष्यति। ततस्तडिद्वेग इव सर्वजनसमक्षं प्रथमं ज्योतिर्निर्गतम्। ततः श्रीपार्श्वनाथबिम्बं प्रकटीभूतम्। तद् भक्तिभृता विविधस्तुतिभिः स्तुतं नमितं च। राजा विक्रमादित्यः पृष्टवान्—भगवन्! किमिदमपूर्वं दृश्यते? । कोऽयं नवीनो देवः प्रादुरभूत्? । अथ सिद्धसेनः प्राह—राजन्! पूर्वमस्या-मेव 'अवन्त्यां' भद्राश्रेष्ठिनीसुतः सुरूपद्वात्रिंशत्पत्नीविक्रमपरिभुक्तसर्वसम्पत्ती अवन्तीसुकुमाल इति ख्यातः श्रेष्ठ्यासीत्। स शालिभद्र इव कस्यापि गृहव्यापारं नाकार्षीत् किन्तु मातैव सर्वामपि गृहलक्ष्मी-मचकत्। एकदा दशपूर्वधर आर्यसुहस्त्याख्यो श्रीवीरपट्टमुकुट सम्प्रतिनृपगुरुः सगच्छो विहरन्'अवन्ती'मागत्य भद्राश्रेष्ठिन्या गृहैकदेशेऽस्थात्। रात्रौ ते 'नलिनीगुल्म'स्याध्ययनस्य परावर्तनस्य विचारं कुर्वन्ति। सप्तभूमावने विलसति सति स विचारं शृण्वन् समन्दनमारापाथां भित्तौ चिरं पश्यन् अवन्तीसुकुमाल-स्तत्रागत्य सम्यगवबोधीत्। आगत्य गुरून् जगौ—भगवन्! किमेतद् गुण्यते? । आर्यसुहस्ती—वत्स! 'नलिनीगुल्म'विमान-विचारः। अवन्तीसुकुमालः प्राह स्म—इदमेवेदं प्रेम मयाऽ-नुभूतम्। इदं केनोपायेन लभ्यते? । आर्यसुहस्ति—चारित्रेण। अवन्तीसुकुमालोऽप्यभिमानात् गृहीत'नलिनीगुल्म'विमानप्रत्यल-प्रतिज्ञ स्वयं लोचेन पश्चाद् गुरुभिरपि दत्तसामायिकः 'कन्थार-कुडङ्ग'वनं श्मशानमेत्य कायोत्सर्गी भगवत्स्मरणपरः पूर्वभवीय

१ घ— दसधार । २ घ—नास्ती 'गुण्यते' इत्यधिकं पदम्। ३ घ—'नलिनीगुल्मविमानविचार'। ४ घ 'प्रातीकवात्'। ५ घ—ककुता ।

मापन्नया 'सार्भया क्षुधितया दर्भसूचीविधक्षरत्तद्रुधिरधारागन्धलुब्धागतया भक्षित सद्भावनाजर्जरितपापकर्मा 'नलिनीगुल्म'माप। प्रातस्तन्माता सस्नुषा गुरुमुखादवगतपुत्रवृत्तान्ता तच्छ्मशानमागत्य विललाप विविध विविधम्। पुनर्गृहमागता। एकां सगर्भा वधू गृहे मुक्त्वा एकत्रिंशता वधूभि सह संयममादाय दिव लेभे। सगर्भास्थितवधूकाजातपुत्रेण 'स्फीतयौवनेनाय प्रासाद. कारित.। मम पितुर्महाकालोऽत्राभूदिति 'महाकाल'नाम दत्तम्। श्रीपार्श्वबिम्ब मध्ये स्थापितम्। कत्यप्यहानि 'लोके पूजितम्। अवसरे द्विजैस्तदन्तरित कृत्वा मृडलिङ्गमिद स्थापितम्। अधुना मत्कृतस्तुतितुष्ट श्रीपार्श्वनाथ प्रादुरासीत्। मत्प्रेरितशासनदेवताबलात् तु मृडलिङ्ग विदध्रे। सत्यासत्ययोरन्तर पश्य। तच्छ्रवणान्नृप शासने ग्रामशतान्यदत्त देवाय। उपगुरु ससम्यक्त्वा द्वादश(?)व्रतीमुपादत्त। अश्लाघत वादीन्द्रम्—

अहयो बहव सन्ति, भेकभक्षणदक्षिणा।
एक एव 'स शेषो हि, धरित्रीधरणक्षम ॥ १ ॥'

तथा त्वम्। अहो कवित्वशक्तिस्ते।।

पद सपदि कस्य न स्फुरति शर्करापाकिम ?
रसालरससेकिम भणितिवैभव कस्य न ?।
तदेतदुभय किमप्यमृतनिर्झरोद्गारिमैस्तरङ्गयति यो रसै स पुनरेक एव क्वचित् ॥ १ ॥'

न नाम्ना 'नो वृत्त्या परिचयवशाच्छन्दसि न वा
न शब्दव्युत्पत्त्या निभृतमुपदेशान्न च गुरो।
अपि त्वेता स्वैर जगति सुकवीना मधुमुचो
विपच्यन्ते वाच सुकृतपरिणामेन महता ॥ २ ॥''

---

१ वत्ससहितया। २ क–'स्फीतिमधूकायौ०'। ३ ग–'श्रीपार्श्वनाथबिम्ब'। ४ क–'लोकेन'। ५ शिव०। ६ ग–'तत्परा'। ७ ग–'श्रीशेषो हि धरणीधरण०' ८ अनुष्टुप्। ९ पृथ्वी। १० ख–घ–'मा वृत्त्या'। ११ शिखरिणी।

इति स्तुत्वा स सम्राट् स्वास्थ्यमपासीत् । वादीन्द्रोऽपि प्रभावना-पुरस्सरं सङ्घस्य मध्ये कृत ।

अन्येद्यु सिद्धसेना विहरन्'पाठ्ठरा'ख्य 'मालवे'षु नगरं ययौ । तत्र मठे. शाकम्भरीग्रामे सूरयः यथा—भगवन् ! अस्मिन् नगरे स्वासन्न नाम एक आसीत् । तत्र सुन्दरो नाम राजपुत्रो प्रासन्नो । तस्य द्वे पत्न्यौ । एका प्रथमा पुत्री प्रासत अविजात च । तदन सरस्वत्यस्यमप्रसन्ना बभौ । सा स्वयं पुत्रं प्रसूय मर्तुं सविशेषं वक्तुम्ना सूदिति श्रीनाथविनया गुप्तया बुद्ध्या मृतिकाभवनमन्याचत–यदा इयं मे सपत्नी प्रसवकाले त्वां देवपादसकर्षनि तदा त्वया परस्परात् प्रथमं माहूरतिक पूर्वं निश्चितस्य तव समाज्ञम् । तदानके यद् पुत्रो भवति तदा सर्वं गृहीत्वा मामागत् दूरं स्नुतस्थ-म्यम् । इदं हेम गृहाण । इति सुवर्णं चतुर्णी । विधिवशात् तत्र तत् तथा तथैव कृतम् । राजपुत्रा आनयत्य मामदूरे क्षिप्त ही । स राजपुत्रोऽपि पुण्याधिक इति तत्कुमारवतया धनुष्पन्न दुर्ग हत्वा पाल्यमानस्यान्तर्निर्गीय कृत । अतीव 'ओंकार'नगरं स्थिर मन्त्राधिष्ठारिणा मरटकेन एव आजयिन स्थां सीतां माहित ।

अन्यदा 'च(क्र)स्वपुरुष'देशानिषन्निमित्त आपन्ना निमि-नयनार्थेन प्रत्यासन्न समावासित । तत्र चतुष्पटकस्य शिखा'र' समासन–तथा च(क्र)स्वपुरुष'शास्य सभा देय । तथाऽसौ समा-श्रा मत्वौ । तद् वाक्यं अनुश्रुतपूर्वं समाकर्ण्य तदालया भव्यस्यास्य स्वभावसमप्यस्य राजामात्यानुवाच–मा भो स्वजनस्यास्यम् मुखमानपथ यथा सुष कमनीयतराचारित्रं स्वविषयमहत्त्वमायं कुर्मि । तथेऽस्मात्तनुत्तो राजा तनापात । अविरतं देवान्तरावासोर्दे-मिनिरथ सग्राप्तो नाप । श्रीलो महत्या प्रभावनयापि शासनेऽपात् । अतीव च 'ओंकारे' इममुत्तरं प्रासादमचीकरत् । यमपिह पुर पसायतः शैवः प्रासादः कारयितुं न शक्यते । मिथ्यात्वो महिष । तस्मात्

तत् कुरु येन इतोऽधिकं तुङ्गं रम्यं चैत्यं निष्पद्यते । वली स्वमेवेति । तद्वचनं श्रुत्वा वादी 'अवन्तीं'मागत्य चतुःश्लोकीं हस्ते कृत्वा विक्रमादित्यद्वारमेत्य द्वाःस्थेनोपराजं श्लोकमचीकथत् । स तेन कथितः, यथा—

दिदृक्षुर्भिक्षुरायातो, द्वारि तिष्ठति वारितः ।
हस्तन्यस्तचतुःश्लोकः, उतागच्छतु गच्छतु ? ॥ १ ॥[3]

तं श्लोकं श्रुत्वा विक्रमादित्येन प्रतिश्लोकः कथापितः, यथा—

दत्तानि दश लक्षाणि, शासनानि चतुर्दश ।
हस्तन्यस्तचतुःश्लोकः, उतागच्छतु गच्छतु ॥ २ ॥

वादिना तं श्लोकं श्रुत्वा द्वास्थद्वारेण भाणितं राज्ञः— दर्शनमेव भिक्षुरीहते, नार्थम् । ततो राज्ञा स्वदृष्टौ आहूतः । उपलक्षितो भाषितश्च—भगवन् ! किमिति चिराद् दृश्यध्वे ? । आचार्यैरुक्तम्— धर्मकार्यवशाच्चिरादायातः । श्लोकचतुष्टयं शृणु । राज्ञि शृण्वति पठितं तद्, यथा—

अपूर्वेयं धनुर्विद्या, भवता शिक्षिता कुतः ? ।
मार्गणौघः समभ्येति, गुणो याति दिगन्तरम् ॥ १ ॥[5]
[6]सरस्वती स्थिता वक्त्रे, लक्ष्मीः करसरोरुहे ।
कीर्तिः किं कुपिता राजन् !, येन देशान्तरं गता ? ॥२॥[6]
कीर्तिस्ते जातजाड्येव, चतुरम्भोधिमज्जनात् ।
आतपाय धरानाथ !, गता मार्तण्डमण्डलम् ॥ ३ ॥[7]
सर्वदा सर्वदोऽसीति, मिथ्या संस्तूयसे जनैः ।
नारयो लेभिरे पृष्ठं, न वक्षः परयोषितः ॥ ४ ॥[8]

श्रुत्वा तुष्टो विक्रमश्चतुरो गजान् यथासङ्ख्यं वसन-सुगन्धद्रव्य-हेम-नाणक-हारादिपूर्णान् आनाय्य सूरिमभाणीत्—इमे गृह्यन्ताम् ।

---

१ ग–'द्वास्थनोपचार' । २ क-ख–ग–'यातस्तिष्ठति द्वारि वारितः' । ३ अनुष्टुप् । ४ ख–घ–'राज्ञो दर्शन०' । ५-६ अनुष्टुप् । ७ ८ अनुष्टुप् । चतुर्विंशति० ६

परिकरे—गीतमर्पणम्। पुनर्विज्ञप्तो भगवति—मन्त्राक्षरपूर्णं पुस्तकं देयम्, गिरिव्रतस्य। भगवान्—इदमपि शक्ष्यामि। नहि विधिप्यसीति।। राजन्! श्रूयताम्—'ॐकारे' चतुर्द्वारं जैनप्रासादं शिवप्रासादतुल्यं कारय स्वयं सपरिच्छदः प्रतिष्ठां च तत्र कारयेति।

५ तथा तत् तथैव कृतम्। प्रभावनया उल्लसिताः। एवं जैनं धर्मं पोषयन् गतो दक्षिणस्यां 'भृगुकच्छ'पुरं विहरन् गतः। तत्रानु-ष्ठानं ज्ञात्वायुःप्रान्तं ज्ञात्वा सर्वेषामनशनमकार्षीत्। तत्रत्यसंघेन 'चित्रकूटे' सिद्धसेनगच्छे च वृत्तान्तं ज्ञापयितुं वाग्मी भट्ट एकः प्रस्थापितः। स तत्सूरिसभायां श्लोकपूर्वार्द्धं पुनः पुनः पठति स्म—

१ स्फुरन्ति वादिखद्योताः, साम्प्रतं दक्षिणापथे।

पुनः पुनः पाठे 'सिद्धसारस्वत'या सिद्धसेनभगिन्योक्तम्—

नूनमस्तं गतो वादी सिद्धसेनो दिवाकरः ॥ १ ॥

पश्चात् भट्टेन प्रपञ्चोक्तम्। ततः शोके विहितो विषादश्च।

इति वृद्धवादिसिद्धसेनयोः प्रबन्धः ॥ १ ॥



१ क- 'चूर्णे' चन्द्रगच्छ ॥ सिद्धसेनगच्छम्। २ चतुरश्र ३ क ख— 'स्वर्ग'।

[७]

॥ अथ श्रीमल्लवादिप्रबन्धः ॥

श्रीइन्द्रभूतिमानम्य, प्रभावकशिरोमणेः ।
श्रीमल्लवादिसूरीन्दो–श्चरितं कीर्त्यते मया ॥ १ ॥[1]
'खेटा'भिधं महा[2]स्थान–मस्ति 'गूर्जर'मण्डले ।
देवादित्याह्वयस्तत्र, विप्रोऽभूद् वेदपारगः ॥ २ ॥
सुभगाख्या सुता तस्य, विधवा बाल्यकालतः ।
कस्मादपि गुरोर्मन्त्रं, [3]सौरं सा प्राप भक्तिभाक् ॥ ३ ॥
आकृष्टस्तेन मन्त्रेण, भास्करस्तामुपागमत् ।
तद्भोगलाभादापन्न–सत्त्वा सा न चिरादभूत् ॥ ४ ॥
वैक्रियेभ्यः सुराङ्गेभ्यो, गर्भो यद्यपि नोद्भवेत् ।
[4]तदानीं त्वौदारिकाङ्ग–धातुयोगात् तु सम्भवी ॥ ५ ॥
आपाण्डुगण्डफलकां, ग्लानाङ्गीं वीक्ष्य तां पिता ।
बभाषे किमिदं वत्से !, निन्द्यमाचरितं त्वया ? ॥ ६ ॥
सा प्राह स्म पितर्नेयं, प्रमादविकृतिर्मम ।
मन्त्राकृष्टागतोष्णांशु–न्यासः पुनरयं बलात् ॥ ७ ॥
इत्युक्तोऽपि विषण्णात्मा, देवादित्यः कुकर्मणा ।
तां पुत्रीं प्रेषयामास, सभृत्यां 'वलभीं' पुरीम् ॥ ८ ॥
कालेन तत्र साऽसूत, पुत्रं पुत्रीं च सुद्युतम् ।
तत्रैवोवास सुचिरं, जनकार्पितजीविका ॥ ९ ॥
क्रमेण ववृधाते तौ, पुत्रौ बालार्कतेजसौ ।
यावदष्टौ व्यतिक्रान्ता, वत्सराः क्षणवत् तयोः ॥ १० ॥
तावदध्यापकस्यान्ते, पठितुं तौ निवेशितौ ।
कलहेऽर्भै निष्पितृक–मूचिरे लेखशालिकाः ॥ ११ ॥—युग्मम्

---

१ अत्र पर ६९ तमं पद्यं यावत् छन्दोऽनुष्टुप्' । २ ख-घ—'स्थान, अस्ति' । ३ सूर्यसम्बन्धि । ४ ख घ-'तदानीतौ(?)दा०' ।

वज्रिरा स्वियमायोऽर्मः पप्रच्छ जननी निजाम् ।
किं मातर्नास्ति मे तातो येन कोऽप्यस्ति नैव मे ? ॥ १२ ॥
माता जगाद नो वेत्सि, किं पीडयसि पृच्छया ?
ततः स्थिरः स तस्यायो मर्मभेदक् निजाग्रिमि ॥ १३ ॥
तात्ततातस्य तं मातुः—कथेऽयं वत्स ! ते पिता ।
पराभवकरो यस्ते तस्याहं प्राणहारकः ॥ १४ ॥
इत्युक्त्वा वीरे सुतस्य—मेर्क तस्य समर्पयत् ।
तात्येऽप्येन नया देवी सयो कोटि पारितोषत् ॥ १५ ॥
तेन कर्मटरत्नेन याऽऽ स कल्पकरः ।
निधुवनं निधुवन्त—मवताडितवानपि ॥ १६ ॥
'वल्मी'पुरभूपेन मृतो वाजवनः ॥ छ ।
कुपितस्तां शिशुं सयो यमैः स्वात्मिकमानयत् ॥ १७ ॥
उवाच रे कथं दंसि सुराष ! शिशुकामभूत् ? ।
बाल सत्यात् न परं, बालकान् हन्मि सुरानपि ॥ १८ ॥
इत्थं वदन् महीपाल—माहन् कर्मटरत्नेन तम् ।
तूर्णस्य तस्य साधाम्ये स राजाऽजनि विक्रमी ॥ १९ ॥
शिलादित्य इति ख्यातः 'सुराष्ट्र'राष्ट्रमास्थः ।
जैने सूर्यात् परं धर्म परमयोपमर्दकम् ॥ २० ॥
निर्जा स्वसारं स ददौ 'भृगुकच्छ'महीभुजे ।
असूत सा सुतं दिव्य—तेजसं दिव्यलक्षणम् ॥ २१ ॥
'शत्रुञ्जये' गिरौ भक्तो—द्धारमारचयच्च सः ।
श्रेयोविमानमानरुग्णां, श्वेताम्बरानमानयत् ॥ २२ ॥
कदाचिदागतास्तत्र बौद्धास्तर्कमहोद्धुराः ।
ते शिलादित्यमवदन्, सन्ति श्वेताम्बरा इमे ॥ २३ ॥

---

१ हारय् । २ क 'स्था देवी सयो यशोचि' । ३ क-'बालकम्' ।
४ क—ख—'कर्ण' । ५ नभम् ।

वादे जयन्ति यद्यस्मा-स्तदैते सन्तु [1]नीवृति ।
वय यदि जयामोऽमू-ऽस्तदा गन्तव्यमेतकै ॥ २४ ॥
दैवयोगाज्जित बौद्धै, सर्वे श्वेताम्बरा पुन ।
विदेशमाशिश्रियिरे, पुन कालबलार्थिन ॥ २५ ॥
शिलादित्यनृपो बौद्धान्, प्रपूजयति भक्तित ।
'[2]शत्रुञ्जये' च ऋषभ-स्तैर्बुद्धीकृत्य पूजित ॥ २६ ॥
इतश्च सा शिलादित्य-भगिनी भर्तृमृत्युतः ।
विरक्ता व्रतमादत्त, सुस्थिताचार्यसन्निधौ ॥ २७ ॥
अष्टवर्षं निज बाल-मपि व्रतमजिग्रहत् ।
[3]सामाचारीमपि प्राज्ञ, किञ्चित् किञ्चिदजिज्ञपत् ॥ २८ ॥
एकदा मातर साध्वीं, सोऽपृच्छदभिमानवान् ।
अल्प कथ न. सङ्घोऽय, प्रागल्भ्यत्पोऽभवत् कथम् ? ॥२९॥
साऽप्युदश्रुरभाषिष्ट, वत्स ! किं वच्मि पापिनी ? ।
श्रीश्वेताम्बरसङ्घोऽभूद्, भूयानपि पुरे पुरे ॥ ३० ॥
तादृक्प्रभावनावीर-सूरीन्द्राभावत परै ।
[4]स्वसात्कृत शिलादित्यो, भूपालो मातुलस्तव ॥ ३१ ॥
तीर्थं 'शत्रुञ्जया'ह्व यद्, विदित मोक्षकारणम् ।
श्वेताम्बराभावतस्तद्, बौद्धैर्मूर्तैरिवाश्रितम् ॥ ३२ ॥
विदेशवासिन श्वेता-म्बरा [5]खण्डितडम्बरा ।
क्षिपन्ति निहितौजस्का, काल कचन कैचन ॥ ३३ ॥
इति श्रुत्वाऽकुपद् बाल-स्ता[6]थागतभटान् प्रति ।
प्रतिज्ञा च चकारोच्चै, प्रावृडम्भोधरध्वनि ॥ ३४ ॥
नोन्मूलयामि चेद् बौद्धान्, नदीरय इव द्रुमान् ।
तदा भवामि सर्वज्ञ-ध्वसपातकभाजनम् ॥ ३५ ॥

१ देशे । २ क-'शत्रुञ्जयेऽस्ति' । ३ साधूनामाचारम् । ४ आत्मवशीकृत ।
५ क-ख-'खण्डितडम्बरै' । ६ बौद्धवीरान् ।

इत्युक्त्वाऽन्यां समापृच्छ्य याते मातामहगुरौ ।
मल्लनामा गिरिं गत्वा तेपे तीव्रतरं तपः ॥ १६ ॥
आसेव्यमानभैक्षेण पारणं च चकार सः ।
दिनैः कतिपयैस्तत्र, भारती शासनदेवता ॥ १७ ॥
पृच्छा व्योमनि साऽप्यासीत् 'के मिष्टाः' सोऽपि बालकः ।
वल्लानाख्यत् तदनुमर्णे पक्ष इति जगाद ॥ १८ ॥
षण्मासस्यान्ते पुनः सोचे 'केन' देव सदेवत ? ।
तत्कर्णिस्वमारित, तूर्णं गुडघृतेन सुधीः ॥ १९ ॥
अवधारणसम्पन्ना तं, योग्यं शासनदेवता ।
प्रकटा व्याजहार् वत्स !, मृग्यं परमतापद ॥ २० ॥
नयचक्रस्य तर्कस्य, पुस्तकं ऋषि मार्गय ? ।
वाग्मी देवतासि ते सम्यक्, पुस्तकोऽरमयाप्रहर्ण ॥ २१ ॥
पूर्वी सुमेष न तर्क–पुस्तकं याचते सुधीः ।
प्रसादं कुरुमस्तत्र पालवीयारिकेनाथ ॥ २२ ॥
तथा शासनदेव्यूचे विदिताऽस्मान्यथा त्वया ।
ख्यापितं ते विपासाऽस्मि प्रकटीभाविता न तु ॥ २३ ॥
तं कृत्वा पुस्तकं मल्ल वादी देवीप्रसादतः सः ।
ग्रंथं पाशुपतमिव मन्त्रम पाशुपतमस्मात् ॥ २४ ॥
आगमस्य 'अमली'पत्रं 'द्वादशा'रमपूर्वकम् ।
शिलादित्यं पुण्यात्मा–विजयपुरिपथाच स ॥ २५ ॥
वैरीदुर्धरा अगमार्थे प्रतिमल्लोऽभयुत्थितः ।
अमल्ली मल्लवादी तद्वीर्या भणितिस्तुत ॥ २६ ॥
शिलादित्यनृपोपान्ते बौद्धाचार्येण वाग्मिना ।
वादिवृन्दारकत्वेन, तर्कमर्मप्रगल्भजम् ॥ २७ ॥
मल्लवादिनि वाल्ये, भयपाक्रमयोजने ।

---

१ जगाद । २ क ख 'कमली' ग-पुस्तके तु 'अमली' इति पाठः ।
३ ख-'प्रस्तर्कपद्धी' ।

हृदये हारयामास, षण्मासान्ते स शाक्यराट् ॥ ४८ ॥
षण्मासान्तनिशायां स, स्व निशान्तमुपेयिवान् ।
तर्कपुस्तकमाकृष्य, कोशात् किञ्चिदवाचयत् ॥ ४९ ॥
चिन्ताचक्रहते चित्ते, नार्थास्तान् धर्तुमीश्वर. ।।
बौद्ध स चिन्तयामास, प्रातस्तेजोवधो मम ॥ ५० ॥
श्वेताम्बरस्फुलिङ्गस्य, किञ्चिदन्यदहो मह' ।।
निर्वासयिष्यन्तेऽमी हा, बौद्धाः साम्राज्यशालिन ॥ ५१ ॥
धन्यास्ते ये न पश्यन्ति,देशभङ्ग कुलक्षयम् ।
परहस्तगता भार्या, मित्र चापदि सस्थितम् ॥ ५२ ॥
इति दु खौघसङ्घट्टाद्, विदद्रे तस्य हृत् क्षणात् ।
नृपाह्वान समायात, प्रातस्तस्य द्रुत द्रुतम् ॥ ५३ ॥
नोद्घाटयन्ति तच्छिष्या, गृहद्वार वराकका ।
मन्दो गुरुर्नाथ भूप—समामेतेति भाषिण ॥ ५४ ॥
तद् गत्वा तत्र तैरुक्त, श्रुत्वा तन्मल्ल उल्लसन् ।
अवोचच्च शिलादित्य, मृतोऽसौ शाक्यराट् शुचा ॥ ५५ ॥
स्वय गत्वा शिलादित्य—स्त तथास्थमलोकत ।
बौद्धान् प्रावासयद् देशाद्, धिक् प्रतिष्ठाच्युत नरम् ॥ ५६ ॥
मल्लवादिनमाचार्यं, कृत्वा वागीश्वर गुरुम् ।
विदेशेभ्यो जैनमुनीन्, सर्वानाजूहवन्नृप ॥ ५७ ॥
'शत्रुञ्जये' जिनाधीश, भवपञ्जरभञ्जनम् ।
कृत्वा श्वेताम्बरायत्त, यात्रां प्रावर्तयन्नृप ॥ ५८ ॥
कालान्तरे तत्र पुरे, रङ्को नामाभवद् वणिक् ।
तस्य कार्पटिको हट्टे, न्यासीचक्रे महारसम् ॥ ५९ ॥
रसेन तेन स्पृष्टस्य, लोहस्य तैंपनीयताम् ।
स दृष्ट्वा हट्टसदन—परावर्त चकार पै ॥ ६० ॥

१ क-ख-'प्रस्योरिद पद्यं नास्ति' । २ 'मांदो' इति भाषायाम् । ३ क-ख घ-'देशान्' । ४ सुवर्णताम् । ५ क-'स ' ।

वधसिंचा वासरीयं रक्षु' गोऽस्मन्महात्मम ।
तपुष्पा राजपुष्पाश्च नवत्वर्गीत् पारम् ॥ ६१ ॥
'देवी चतुर्दिशाभेदा, प्रियतानविभूषिताम ।
रक्षुपुरीन्तर लभ्या धामन स्म मुन्मयां ॥ ६२ ॥
नीं न दस पुंसा रक्षुः राजा न धामन चत्वद् ।
तनैव मयमागा रूपमस्यनुरागपद् ॥ ६३ ॥
माता पूरयमी तय मन्त्रमयागबुद्धमय ।
जिनादिदयः सर्व भाता यदिया स्तीमहदिना ॥ ६४ ॥
तमान्तारम्भ वदिया प्रभुमाय रत्तं ताशा ।
मृत्वावा मे स्तव मधु ह(बी)न प्यादिर्भहासमम् ॥ ६५ ॥
जिनमादित्यमूलाचार पर्मसिंहि(५७३)तन्तर ।
आलोऽपे स्वश्री मह्यो ज्ञानिन प्रथमे मधु ॥ ६६ ॥
मतांका ग्नाम्प्दे-जिनाति विपद्यन्तराम् ।
हवनमधिष्ठितानां मि येत्र तु नारिनी तस्य ॥ ६७ ॥
एवम प्रथम ज्ञाता मल्लवादी महामुनिः ।
सहित परिवारेण 'श्वाखर'पुरीमगमत् ॥ ६८ ॥
'भाक्षेन्द्र'गच्छसंबेषु धर्मध्यानमभूत् प्रभु ।
श्री'सम्मनक'तीर्थेऽपि सद्वतस्पर्शनाममात् ॥ ६९ ॥

श्रीमल्लवादिचरितं जिनरमणीय-
देव-समुद्भवनिशि(?)तिमिरे विरम्य ।
नम्या ! कविरवचनादिलिपिविचन्मिय-
मैत्री प्रथमरयत शासनमाईत मेः ॥ ७ ॥
इति श्रीमल्लवादिचरितम् ॥ ७ ॥



व-देवीवस्तुमीय प पुरा । ३ ग- वारिषे । ४ ब-पूणाता
है स्तर मम, दर्भ । ५ ब-'मार्गा' । ६ नन्द ।

[८]

॥ अथ श्रीहरिभद्रसूरिप्रबन्धः ॥

श्री'चित्रकूटे' हरिभद्रो विप्रश्चतुर्दशविद्यास्थानज्ञः । दर्भ्या पादुका, पद्मसरोजनदर्शनान्यानि पद्मसमाप इति कृत्वा, उदरे पट्टः, उदरं विद्यया स्फुटतीति कृत्वा । जाल्मः कुद्दालो निःश्रेणी सह चलन्ति । यत्पठितमहं न जानामि तस्य शिष्यो भवामीति प्रतिज्ञा । एकदा चतुष्पथासन्नभूमिं व्रजता गाथामेकां पठमाना याकिनी नाम साध्वी श्रुता । तया

"चक्किदुगं हरिपणगं, पणगं चक्कीण केसवो चक्की ।
केसव चक्की केसव-दुचक्किकेसी य चक्की य ॥ १ ॥"

इति गाथा पेठे । न च तेन बुद्धा । अग्रे गत्वोक्तम्—मातः ! खरं चिकचिकायितम् । साध्व्योक्तम्— नवं लिप्तम् । अहो अनयाऽहमुत्तरेणापि जितः । इति तां ववन्दे । त्वच्छिष्योऽस्मि । गाथार्थं ब्रूहि मातः ! । सा प्राह स्म— मम गुरवः सन्ति । हरिभद्रः प्राह— क्व ते ? । अत्र सन्ति । ततः केनापि श्रावकेण स चैत्ये नीतः । जिनदर्शनं तत्प्रथमम् । हृष्टः ।

वपुरेव तवाचष्टे, भगवन् ! वीतरागताम् ।
न हि कोटरसंस्थेऽग्नौ, तरुर्भवति शाद्वलः ॥ १ ॥"

---

१ "षडङ्गमिश्रिता वेदा, धर्मशास्त्रं पुराणकम् ।
मीमांसा तर्कमपि च, एता विद्याश्चतुर्दश ॥"

२ ग 'दपादुकामदूरीकृत दर्श०'। ३ 'कोदाली' इति भाषायाम् । ४ क ख घ 'मजम्'। ५ ग-पुस्तके 'गाथामेकां पठमाना' एतदधिकम् । ६ ग पुस्तके 'श्रुता' एतदधिकम् ।

७ छाया— चक्रिद्विकं हरिपञ्चकं पञ्चकं चक्रिणां केशवश्चक्री ।
केशवश्चक्री केशवद्विचक्रिकेशिनौ च चक्री च ॥

८ आर्या । ९ ख-'स्वर'। १० 'अत्र सन्ति । ततः केनापि श्रावकेण' इत्यधिके ग पाठ । ११ अनुष्टुप् ।

अ दिशौ करुणाकरभिमुखा एपरस सोर्म गुरु
आयाग गमभयग परिपरो सेना पमत्र तत् ।
न मूल जरजम्ममम्बुहरणः दयादिरंगा हम्
देवाय असराण दीमह जभा मप सम्र्य जर ॥ २ ॥

इत्यादि नर्गानिनमरगम । तथा जिनमद्रापायार्जभिम । प्रतिपत्ति । न गिरम् । मरिपदवी । आवश्यक 'पाची' त्यादिदुभरत्वाद्दानश्पर्क तनैव विहृतम । कश्चिज्जर्मकं इति विरुदम् । हास्य-पुस्तक दशनाम्या कृत्वा । ४ चात्र्य जिनादिकनप्रपापाश्चिम ८४मठप्रतिबद्ध८४नामस्पासादरम्य विविधैरचनैशब्द अयमय-मापमाप्य क्रिया ।

एकदा भागिनेयौ हंस-परमहंसौ पाठयति प्रभु । मिन्नमौ पर बौद्धनर्कमस्नगुप्तम पिपाठिषू । गुरुणा ज्ञानिषा वार्यम ज्ञान वि म्नार्थं गतौ । अर्धमार्ग उद्यारक । प बौद्धाचार्यान्तिक नद्दनमौ परन । कपाभिवाया दृश्यानि विम्तुल । मस्तिकमसदिसस्करप्तमर् इत्यादू इव ज्ञान्ना गुरुणाप्रतिपत्ति — घुर पंचाश्ववागतौ । द्वितीयाह सोपानश्रेणी बुद्धप्रतिबिम्बपरिभिन्न । तदाबलवाती तौ पौना मत्र न दत्त । रत्नत्रयानुम्नानकम्पयत्न । कुशाग्र पाद इति कृत्वा उपरि पादौ दत्त । उपरि चटितौ । गुरुणा दृष्टौ । गुरो समक्ष भिन्नौ । तौ गुणास्फकदापापरामर्ष हम्म यत्नीतावं अनुपमेव मत्वा मठ्यपीयमिषेण तथा निरवाससाम् । कपालिकं कृत्वा गतौ तौ चिरत्नापानौ । विगामपिपौ न सः । राज्ञाने कथितम्—

छाया— मद् इति करुण नदीनसुधा एरस मौम्य सुख
आदर मनमानस परिवार नाम अजर तद्
नद् मूर्ख अज्ञानमपुष्णाली देवाधिदेवाय
एवमधमीय दयधी भवी मिथ्यं लाभ अपि ॥

१ वार्दिकं । २ (प्रश्न प्राचपप्रयार्थ (संशिक्षा) प—पाठा । ४ प० ही कुत्यां
५ इमाधी इति भावायाम् । ख 'एमाम इदी' । ख पर्वं । ध पुत्तके
तत्र ग्रन्थादि० न सैन

सितपटायुत्कटकपटौ तत्त्व लात्वा यात । कपलिकामानायय । पृष्ठे सैन्यमल्प गतम् । दृष्टिदृष्टि । द्वावपि सहस्रयोधौ तौ । ताभ्या निहत राजसैन्यम् । उद्भूतनष्टैरुग्रराज गत्वा कथित तत्तेज । पुनर्बहु-सैन्य प्रैषि । दृष्टिमेलापक. । युद्धमेक करोति । अपर कपारि(लि॰) काग्रणिर्नष्ट. । हसस्य शिरश्छित्वा राज्ञे दर्शित ते । तेनापि गुरवे दत्तम् । गुरुराह—किमनेन ? । कपरि(लि॰)कामानायय । गता भटा । रात्रौ ' चित्रकूटे ' प्राकारकपाटयोर्दत्तयोस्तदासन्न सुप्तस्य परमहंसस्य शिरश्छित्वा तैस्तत्रार्पितम् । तेषा बौद्धाना तत्सूरेश्च सन्तोषः । प्रात श्रीहरिभद्रसूरिभि शिष्यकबन्धो दृष्ट । कोप' । तैलकटाहा कारिता । अग्निना तापित तैलम् । १४४० बौद्धा होतु ख आकृष्टा [1]शकुनिकारूपेण पतन्ति । गुरुभिर्वृत्तान्तो [2]ज्ञात । [3]प्रतिबोधाय साधू प्रहितौ । ताभ्या गाथा दत्ता —

" [4]गुणसेण-अग्गिसमा सीहा-ऽऽणंदा य तह पिया-पुत्ता ।
सिहि-जालिणि माइ-सुया धण धणसिरिमो य पइ-भज्जा ॥ १ ॥
[5]जय-विजया य सहोयर धरणो लच्छी य तह पई भज्जा ।
[6]सेण-विसेणा पित्तिय-उत्ता जम्ममि सत्तमए ॥ २ ॥
गुणचंद-वाणवतर समराइच्च गिरिसेणपाणो उ ।
एगस्स तओ मुक्खो-ऽणतो बीयस्स ससारो ॥ ३ ॥

१ ग-पुस्तके ' शकुनिकारूपेण पतति एतदधिक विद्यते । २ घ- 'ज्ञापित ।
३ ग-पुस्तके 'प्रतिबोधाय एतदधिक वर्तते ।
४ छाया—गुणसेना ऽग्निशर्माणौ सिंहा-ऽऽनन्दौ च तथा पितापुत्रौ ।
शिखि-जालिन्यौ मातासुते धन-धनश्रियौ च पतिभार्ये ॥
५ अस्य पद्यस्यानन्तरीयस्य च पद्यत्रितयस्य छन्द 'आर्या' वर्तते ।
६ आर्या—जय-विजयौ च सहोदरौ धरणो लक्ष्मीश्च तथा पतिर्भार्या ।
सेन विषेणौ पितृव्यपुत्रौ जन्मनि सप्तमे ॥
७ घ— सेणविसेणा पत्तिय ।
८ छाया—गुणचन्द्र-वानव्यन्तरौ समरादित्यो गिरिषेणप्राण (°मातङ्ग) तु ।
एकस्य ततो मोक्षोऽनन्तो द्वितीयस्य ससार ॥
९ ग—'वाणमतर' ।

[illegible] गुणवत्तमदर्शे [illegible] ।
[illegible] ॥ ९ ॥

[illegible] । [illegible] । १४४ [illegible] ।

[illegible] । [illegible] पार्थिव [illegible] । १४५ [illegible] । [illegible] [illegible] ।

[illegible]

[illegible]

स्य चिरादागतस्य निशि द्वारं नोद्घाटयिष्याव[1]। द्वितीयरात्रावपि चिराद् द्वारमागतः स कपाटम्[2] खटपटापयति। ते तु न शृत। तेन क्रुद्धेन गदितम्— किमिति द्वारं नोद्घाटयेथे? । ताभ्यां भर्त्सितपूर्विणीभ्यामुक्तम्— यत्रेदानीं द्वाराणि उद्घाटितानि भवन्ति तत्र व्रज। तच्छ्रुत्वा क्रुद्धश्चतुष्पथं गत। तत्रोद्घाटे हट्टे उपविष्टान् सूरिमन्त्रस्मरणपरान् श्रीहरिभद्रान् दृष्टवान्। सान्द्रचन्द्रिके नभसि देशना। बोध। व्रत जगृहे। सर्वविद्यता दिव्य कवित्वम्। हंस-परमहंसवद् विशेषतर्कान्[3] जिघृक्षुर्बौद्धान्तिकं जिगमिषु- र्गुरुमवादीत्— प्रेषयत बौद्धपार्श्वे। गुरुभिर्गदितम्—तत्र मा गा, मनःपरावर्तो भावी। स ऊचे— युगान्तेऽपि नैव स्यात्। पुनर्गुरव प्रोचुः— तत्र गत परावर्त्यसे चेत् तदा अस्मद्दत्त वेषमत्रागत्यास्मभ्यं ददीथाः। ऊरीचक्रे स। गतस्तत्र, पठितु लग्न। सुघटितैस्तत्कुतर्कैः परावर्तितं मन। तद्दीक्षा लग्नो। वेष दातुमुपश्रीहरिभद्रं ययौ। तैरप्यागच्छन्नावर्जितः[4] वाद कुर्वन् वादेन जित। बौद्धाचार्यस्य बौद्धवेषं दातु गत। तेनापि बोधित। पुनरागत उपश्रीहरिभद्रं श्वेताम्बरवेषं दातुम्। पुनर्वादेन जित[5]। एवं वेषद्वयप्रदानेन एहिरेयाहिरा २१ कृता। द्वाविंशवेलायां गुरुभिश्चिन्तितम्— माऽस्य वराकस्य आयुःक्षयेण मिथ्यादृष्टित्वे मृतस्य दीर्घभवभ्रमणं भूयात्। पुराऽपि २१ वारान् वादे जितो[6]ऽसौ। अधुना वादेनालम्। ललितविस्तराख्या चैत्यवन्दना- वृत्तिः सतर्का कृता। तदागमे पुस्तिकां पादपीठे मुक्त्वा गुरवो बहिरगुः। तत्पुस्तिकापरामर्शाद् बोध[7] समजनि। ततस्तुष्टो निश्चलमना प्राह—

---

१ क- 'चिरेण'। २ ख- 'खटा(प)यति', क- 'घटपटापयति'। ३ क- 'तर्कानाजि०'। ४ क ख- गच्छन(?) जटित। ५ ग-पुस्तके 'पाद इत्यारभ्य पुनर्वादेन जित एतत्पर्यन्तमधिकं विद्यते। ६ घ- 'वार वादैर्जितो'। ७ क- 'बोध्या सम्यक्'।

नमोऽस्तु हरिभद्राय तस्मै प्रवरसूरये ।
मदर्थे निर्मिता येन वृत्तिर्ललितविस्तरा ॥ १ ॥

तथा मिथ्यात्वनिर्विण्णेन सिद्धर्षिणा १६ सहस्रा उपमितिभवप्रपञ्चा कथाऽपि श्रीमाले सिद्धिमण्डपे । सा च सरस्वत्या व्याख्याऽपोपि । तस्मै श्रीहरिभद्रसूरयोऽपि सोऽपि नवमेन सुरकारमयापन् ॥ इति चरितम् ।

इति श्रीहरिभद्रसूरिप्रबन्धः ॥ ८ ॥



१-पुस्तके श्रीउपमितिभवप्रपञ्चाकथाप्रशस्तिः [illegible] —
[illegible] चरितम् [illegible]
मदर्थे कृता येन वृत्तिर्ललितविस्तरा ॥ १ ॥
२ [illegible] । ३ [illegible] 'सिद्धर्षिणा' । ४ [illegible] । ५ [illegible] सिद्धि(?)मण्डपे ।

[९]

॥ अथ श्रीबप्पभट्टिसूरिप्रबन्धः ॥

'गुर्जर'देशे 'पाडलीपुर'नगरे जितशत्रु राजा राज्यं करोति स्म। तत्र श्रीसिद्धसेननामा सूरीश्वरोऽस्ति स्म। स 'मोढेर'पुरे महास्थाने श्रीमहावीरनमस्करणाय गतः। महावीरं नत्वा तीर्थोपवासं कृत्वा रात्रौ मारामरतो योगनिद्रया स्थितः सन् स्वप्नं ददर्श, यथा– केसरिकिशोरको देवगृहोपरि क्रीडति। स्वप्नं लब्ध्वाऽजागरीत्। माङ्गल्यस्तवनान्यपाठीत्। प्रातश्चैत्यं गतः। तत्र षड्वार्षिको बाल एको बालांशुमालिसमद्युतिराजगाम। सूरिणा पृष्टः — भो अर्भक! कस्त्वम्? कुत आगतः? । तेनोक्तम् —'पञ्चाल'देशे '‍डुबाउधी' ग्रामे बप्पाख्यः क्षत्रियः। तस्य भट्टिर्नाम सधर्मचारिणी। तयोः सूरपालनामपुत्रोऽहम्। मत्तातस्य बहवो भुजबलगर्विताः प्रचुरपरिच्छदाः शत्रवः सन्ति। तान् सर्वान् हन्तुमहं सन्नह्य चलन्नासम। पित्रा निषिद्धः –वत्स! बालस्त्वम्, नास्मै कर्मणे प्रगल्भसे, अलमुद्योगेन। ततोऽहं क्रुद्धः –किमनेन निरभिमानेन पित्राऽपि यः स्वयमरीन् न हन्ति मामपि घ्नन्तं निवारयति? । अपमानेन मातापितरावनापृच्छ्यात्र समागतः। सूरिणा चिन्तितम्— अहो दिव्यं रत्नम्! न मानवमात्रोऽयम्, तेजसां हि न वयः समीक्ष्यते। इति विमृश्य बाल आलेपे— वत्सक! अस्माकं पार्श्वे तिष्ठ निजगृहाधिकसुखेन। बालेनोक्तम्— महान् प्रमादः। स्वस्थानमानीतः। सद्यो हृष्टस्तद्रूपविलोकनेन। दृष्टयस्तृप्तिं न मन्यते। पाठयित्वा विलोकितः। एकाह्नेन श्लोकसहस्रमभ्यगीष्ट। गुरवस्तुतुषुः। रत्नानि पुण्यप्रचय-

१ घ प्रतौ प्रबन्धोऽयं 'आमप्रबन्ध'मान्ते समस्ति। २ ग-'बप्पभट्टसूरि०'। ३ ग-' पाटलापुर० ', घ -'पाडलापुर०'। ४ क-'अत्र'। ५ ग-'श्रीमहा०'। ६ घ-'कृत्वा०'। ७ ग-'तृप्यते'।

प्राप्तानि । बप्पा वयम् । तेन बालेनाप्यल्पदिनैर्व्याकरण-तर्क-साहित्या-दीनि भूयांसि शास्त्राणि पर्यशीलित । ततो गुरवो गुजराउथी ग्रामं जग्मुः । बालस्य पितरौ वन्दितुमायातौ । गुरुभिरालपितौ—पुत्रा भवन्ति भूयांसोऽपि; किं तैः संसारान्धकूपमिमि ?। अयं तु युवयोः पुत्रो मन्महे । दीयतां नः । गृह्यतां धर्मः । नाह मृत एव वि पितरौ निवृत्तागमम् । बालोऽद्य मम मिलितोऽपि । पितृभ्यामुक्तम्—भगवन् ! बालकस्य एव न पुत्रस्तु कथं दातुं शक्यते ?। बालस्य हनिवस्येन सूरपालेन गदितम्—अहं चारित्रं गृह्णामि । यतः—

सा बुद्धिर्विमला प्रयातु कुलिशं तत्र द्रुते पात्यतां
वाग्देवी प्रविशन्तु ते हुतभुजि ज्वालाकराले गुणाः ।
यैः सर्वैः शरदिन्दुकुन्दविशदैः प्राप्नोति प्राप्स्यते
भूयोऽप्यत्र पुनर्भ्रमन्नमरसंसारवाधिमास्पदा ॥ १ ॥

ततो हस्तामिनयाभ्यां स मातरपितृभ्यां अर्पितम्— भगवन् ! गृहाण पवित्रमेनम् । परं बप्पभट्टिरिति नामास्य कर्तव्यम् । गुरुभिर्भणितम्—एवमस्तु । कोऽत्र दोषः ? । पुण्यवन्तौ युवां पुत्र एष जन्म सम्पन्न । बप्प भट्टी आनुग्रहेण सूरपालं गृहीत्वा सिद्धसेनाचार्या मोढेरकं गताः ।

शताष्टके वत्सराणां गते विक्रमकालतः ।
समाधिके राधशुक्ल—तृतीयादिवसे गुरौ ॥ १ ॥

दीक्षा दत्ता । बप्पभट्टिरिति नाम विश्वपावनं प्रददुः । सकृद्गा-र्हस्थ्य तत्र चातुर्मासिकं कृतम् । अन्यदा बहिर्भूमिं गतस्य बप्पभट्टे-र्महती वृष्टिर्जाता घनः । कापि देवकुले स्थितः सः । तत्र देवकुले महाभुजः कोऽपि पुमान् समागतः । तत्र देवकुले प्रशस्ति-काव्यानि रसाढ्यानि गम्भीरार्थानि तेन बप्पभट्टिपार्श्वाद् व्याख्या

---

१ ब. पूत । २ वर्णाय । ३ ब-'हस्ताभिनया' । ४ ब 'इति' । ५ अनुग्र । ६ ब 'मौज' ।

पितानि । ततः स बप्पभट्टिना समं वसतिमायातः । गुरुभिराशीभिरभिनन्दितः । आम्नायं स पृष्टः । ततोऽसौ जगाद—भगवन् ! 'कन्यकुब्ज'देशे 'गोपालगिरि'दुर्गनगरे यशोधर्म[1]नृपतेः सुयशा[2]देवीकुक्षिजन्मा नन्दनोऽहं यौवनेन निरर्गलं धनं लीलया व्ययन् पित्रा कुपितेन शिक्षितः—वत्स ! धनार्जकस्य कृच्छ्रमस्थानव्ययी पुत्रो न वेत्ति तातस्य, मितव्ययो भव । ततोऽहं कोपादिहागमम् । गुरवोऽप्यूचुः—किं ते नाम ? । तेनापि खटिकया भुवि लिखित्वा दर्शितम् आम इति । महाजनाचारपरम्परेदृशी[3]—'स्वनाम नामाददते न साधवः' । तस्यौन्नत्येन गुरवो हृष्टाः । चिन्तितं च तैः—पूर्वं श्रीरामसैन्ये ग्रामे दृष्टोऽसौ[4] षाण्मासिकः शिशुः ।

पीलुवृक्षमहाजाल्यां, वस्त्रदोलक[5]मास्थितः ।
[6]अचलच्छायया च, पुण्यपुरुषो निर्णितः ॥[7]

ततस्तज्जननी धन्यफलानि विचिन्वानाऽस्माभिर्भणिता—वत्से ! का त्वम् ? । किञ्च[8] ते कुलम् ? । साऽवादीत् निजं कुलम्—अहं राजपुत्री 'कन्यकुब्जे'शयशोधर्म[9]पत्नी सुयशा नाम । अहमस्मिन् सुते गर्भस्थे सति दृढकार्मणवशीकृतधवया यत्कृतप्रमाणया कृत्येव क्रूरया सपत्न्या मिथ्या परपुरुषदोषमारोप्य गृहान्निष्कासिता । अभिमानेन श्वशुरकुल-पितृकुले हित्वा भ्रमन्तीह समागता वन्यवृत्त्या जीवामि । बालं च पालयामि । इदं श्रुत्वाऽस्माभिरसौ उक्ता—वत्से ! अस्मच्चैत्यं समागच्छ स्वं वत्सं प्रवर्धय[10] । तया तथा कृतम् । सपत्न्यपि बहुसपत्नीकृतमारणप्रयोगेण[11] ममार । ततो विशिष्टपुरुषैः 'कन्यकुब्जे'शो यशोधर्मा विज्ञप्तः—देव ! सुयशा राज्ञी निर्दोषाऽपि तदा देवेन सपत्नीवचसा निष्कासिता सा प्रस्था-

---

१ ग–'धर्म॰' । २ क–घ–'सुशाया (?यशा)॰', ग–पुस्तके तु 'सुयशो॰' । ३ घ–'पदं परेदृशी' । ४ घ–'ग्रामेऽसौ दृष्टः षाण्मासिकः शिशुः' । ५ ख–'वस्त्रान्दोल॰' । ६ सप्ताक्षरात्मकं चरणमिदम् । ७ अनुष्टुप् (?) । ८ घ–'किंवा ते' । ९ ग–'यशोवर्म॰' । १० ख–ग–'वर्धय' । ११ क–'प्रयोगैर्ममार' ।

गीयते । तदा सा सरस्वतीध्यानाधिता सपुत्रा गौरविता च ।

अन्यदा विहरन्तो वयं तस्या देशं गताः । तया पूर्वभक्तिपरं स्मरन्त्या वयं वन्दिताः पूजिताः । अनेन आमभूपा त्वत्सुतेन भाव्यम् । एवं चिरं विभाव्य सूरयस्तमूचुः — वत्स ! त्वं निखिलो निर्येन कुरुवा बप्पभट्टिनाम्ना सम्यक्कलाभ्यासपठनैषी । त्वं गृहाण कलाः । कलास्ता —लिखितम् १ गणितम् २ गीतम् ३ नृत्यम् ४ वाद्यम् ५ पठितम् ६ व्याकरणम् ७ छन्दः ८ ज्योतिषम् ९ शिक्षा १० निरुक्तम् ११ कात्यायनम् १२ निघण्टुः १३ पत्रच्छेद्यम् १४ नखच्छेद्यम् १५ रत्नपरीक्षा १६ आयुधाभ्यासः १७ गजारोहणम् १८ तुरगारोहणम् १९ तयो[३]शिक्षा २० मन्त्रवादः २१ यन्त्रवादः २२ रसवादः २३ खन्यवादः २४ रसायनम् २५ विज्ञानम् २६ तर्कवादः २७ सिद्धान्तः २८ विषवादः २९ गारुडम् ३० शाकुनम् ३१ वैद्यकम् ३२ आचार्यविद्या ३३ आगमः ३४ प्रासादलक्षणम् ३५ सामुद्रिकम् ३६ स्मृतिः ३७ पुराणम् ३८ इतिहासः ३९ वेदः ४० विधिः ४१ विद्यानुवादः ४२ दर्शनसंस्कारः ४३ खेचरीकला ४४ अमरीकला ४५ इन्द्रजालम् ४६ पातालसिद्धिः ४७ धूर्तशम्बलम् ४८ गन्धवादः ४९ वृक्षचिकित्सा ५० कृत्रिममणिकर्म ५१ सर्वकरणी ५२ वश्यकर्म ५३ पणकर्म ५४ चित्रकर्म ५५ काष्ठघटनम् ५६ पाषाणकर्म ५७ लेपकर्म ५८ चर्मकर्म ५९ यन्त्रकरसवती ६० काव्यम् ६१ अलङ्कारः ६२ हसितम् ६३ संस्कृतम् ६४ प्राकृतम् ६५ पैशाचिकम् ६६ अपभ्रंशम् ६७ कपटम् ६८ देशभाषा ६९ धातुकर्म ७० प्रयोगोपाय ७१ [६]केवलीविधि ७२ । एताः सकलाः कलाः शिक्षितवान् । व्याकरण-तर्कादिग्रन्थान् परिचितवान् । बप्पभट्टिना

१ घ– भाव्यम् । २ ख– छन्दः । ३ ख 'पतावधि' । ४ घ–अमी एता कलाः शिक्षिताः । ५ ग– कपटम् । ६ ख– केवली । विधिः ७२ ।

साक'मस्थिमज्ज'न्यायेन प्रीतिं बद्धवान् । यत'—

[1]आरम्भगुर्वी क्षयिणी क्रमेण, ह्रस्वा पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना, छायेव मैत्री खल-सज्जनानाम् ॥१॥[2]

कियत्यपि गते काले **यशोधर्म**नृपेणासाध्यव्याधिसेन पट्टाभिषेकार्थमामकुमाराकारणाय प्रधानपुरुषा प्रेषिता । अनिच्छन्नपि तैस्तत्र नीत. । [3]पितुर्मेलित । पित्राऽऽलिङ्गित सबाष्पगद्गदमुपालब्धश्च—

धिग् वृत्तवृत्तमुचितां शुचिता धिगेता
धिक् कुन्दसुन्दरगुणग्रहणाग्रहित्वम् ।
चक्रेऽङ्कसीम्नि तव मौक्तिक ! येन वृद्धि-
र्वार्द्धेन तस्य कथमप्युपयुज्यसे यत् ? ॥ १ ॥[4]

अभिषिक्त[5] स्वराज्ये । शिक्षितश्च प्रजापालनादौ । एतत् कृत्वा **यशोधर्मा** अर्हन्त त्रिधा शुद्ध्या शरण श्रयन् द्यां गत । **आम**राजा पितुरौर्ध्वदेहिक कृतवान् । द्विजादिदीनलोकाय वित्त दत्तवान् । लक्षद्वितयमश्वानां हस्तिना रथाना च प्रत्येक चतुर्दशशती एका कोटी पदातीना । एव राज्यश्री श्री**आमस्य** न्यायरामस्य । तथापि **बप्पभट्टि**मित्र विना सर्वं पलालपूलप्राय मन्यते स्म स । ततो मित्रानयनाय प्रधानपुरुषान् प्रैषीत् । तैस्तत्र गत्वा विज्ञप्तम् —- हे श्री**बप्पभट्टे** ! **आम**राज समुत्कण्ठयाऽऽह्वयति, आगम्यताम् । **बप्पभट्टि**ना गुरूणा वदनकमलमवलोकितम् । तै सङ्घानुमत्या गीतार्थयतिभि सम **बप्पभट्टि**मुनिः प्रहित । **आम**स्य पुरं 'गोपालगिरिं' प्राप । राजा सबलवाहन सम्मुखमगात्, प्रवेशमहमकार्षीत्, सौधमानैषीत् । अवोचत च—भगवन् ! अर्धराज्य गृहाण । तेनोक्तम्—अस्माक निर्ग्रन्थाना सावद्येन राज्येन किं कार्यम् ? । यत —

१ घ 'आपातगुर्वी' । २ उपजातिः । ३ घ--'पितुर्मिलित' । ४ वसन्त० । ५ ख-घ -'पित्राश्च राज्ये' ।

अनेकयानिसम्बाध–अन्तर्बाधाविधायिनी ।
अधिमानकलौघेन राजधानी साऽपि भवति ॥ १ ॥

ततो राजाऽसौ गुरुमवलम्बे स्थापित । प्रातः समाधायगम्य बप्पभट्टय नृपेण सिंहासन मध्यापितम् । तत्र नरिमन्— उर्वीपते ! आचार्यपदं विना सिंहासनं न युक्तम् । गुर्वाशातना भवेत् । ततो राजा बप्पभट्टिः यथासतर्पितैः सह गुरुन्तिके प्रहित । विज्ञप्तिका च दत्ता—यदि मम प्राणैः कार्यं तदा प्रसद्य सतोऽयं महर्षि सूरिपदे स्थाप्य । पाद्य पुन च प्रार्थ्य च बदन्ति गुरव विनयम् । स्वामित्वसम्बाध शीघ्र प्रयत्नेन अन्यथाऽहं न भवामि । मा विलम्ब्यतामिति । आवश्यकपापे मोमरके प्रातो बप्पभट्टि । सूरिभिः सूरयो विहसताः— प्रभो ! राजमित्रत्वयोऽनुसार्य शक्तिता हि भवाढ्या ।

अथ श्रीसिद्धसेनाचार्यैर्बप्पभट्टिः सूरिपदे स्थापित । तदग्रे श्री सकलाखिल सद्गृह्यमन्ती तत्र । राजन शिक्षा दत्ता— वत्स ! तव राजसत्कारो यशो भावी । तस्य त्वमपि प्रवर्त्स्यति । तत इन्द्रियजयो दुष्कर । त्व महाव्रतधारी वैः ।

विषजरहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीरा धनेन महाज्ञानेन महत्त्व सुरक्षिपि ।

एकादशाधिके तत्र जाते वर्षशताष्टके ।
विक्रमात् सोऽभवत् सूरिः कृष्णचैत्राष्टमीदिने ॥१॥

गुरुणा आमराजसमीपे प्रेषित । तत्र प्राप्तः । गोपगिरि प्राप्तुक बभारेषो स्थित । राजा सम्मुखस्य महोत्सवेन स पुरी प्रावीविशत् । श्रीबप्पभट्टिसूरिणा तत्र देशना हेयनाशिनी दत्ता—

भौरिव प्रायसा पुंसा–मुपस्थानैकमन्तरम् ।
तामुपस्कुर्वते ये तु रसायुक्तैरसौ रसा ॥ १ ॥

[illegible] मधुर । २ ग 'राजसत्कार' । ३ ग [illegible] मत' । कुमारपालप्रबन्धे (न १ पौ ५१) । ५ ग–गीता । ६–० मधुर ।

आमेन गुरूपदेशादेकोत्तरशतहस्तप्रमाण: प्रासाद: कारयामासे 'गोपगिरौ'। अष्टादशभारप्रमाणं श्रीवर्धमानबिम्बं तत्र निवेशयाम्बभूवे। प्रतिष्ठा विधापयाञ्चक्रे। तत्र चैत्ये मूलमण्डप: सपादलक्षेण सौवर्णटङ्कैर्निष्पन्न इति वृद्धा: प्राहु:। आम: कुञ्जरारूढ: [1]सर्वर्द्धया चैत्यवन्दनाय याति। मिथ्यादृशा दृशौ सैन्धवेन पूर्येते, सम्यग्दृशा त्वमृतेनेव। एवं प्रभावना:। प्रातर्नृपो [2]मौलमनर्घ्यं स्वं सिंहासनं सूरये निवेशापयति। तद् दृष्ट्वा विप्रै: क्रुधा ज्वलितैर्भूपो विज्ञप्त:—'देव! श्वेताम्बरा अमी शूद्रा:। एभ्य: सिंहासनं किम्?'। अथास्तां तत्। परं [3]ह्रस्वीयो भवतु, न महत्। मुहुर्मुहुस्तैरित्थं विज्ञप्त्या कदर्थ्यमान: पार्थिवो मौलसिंहासनं कोशगं कारयित्वाऽन्यल्लघ्वारूरुपत्। प्रत्यूषे सूरीन्द्रेण तद् दृष्ट्वा रुपेनेथ राज्ञोऽग्रे पठितम्—

मर्दय मानमतङ्गजदर्पं, विनयशरीरविनाशनसर्पम्।
क्षीणो दर्पाद् दशवदनोऽपि, यस्य न तुल्यो भुवने कोऽपि॥१॥[6]

इदं श्रुत्वा राज्ञा ह्रीणेन सदा भूयो मूलसिंहासनमनुज्ञातम्। अपराध: क्षमित:। एकदा सपादकोटी हेम्नां दत्ता गुरुभ्य:। तैर्निरीहै: सा जीर्णोद्धारे ऋक्षियुक्तश्रावकपार्श्वाद् व्ययिता। अन्यदा शुद्धान्ते प्रम्लानवदनां वल्लभां दृष्ट्वा प्रभो: पुरो गाथार्द्धं राजाऽऽह—

[8]अज्ज वि सा परितप्पइ, कमलमुही अत्तणो पमाएण।

समस्येयम्। अथ प्रभु: स्माह—

[9]पढमविबुद्धेण तए, जीसे पच्छाइय अंग॥ १ ॥[10]

राजा आत्मसंवादाच्चमत्कृत:।

अन्यदा प्रियां पदे पदे मन्दं मन्दं सञ्चरन्तीं दृष्ट्वा गाथार्द्धं राजा जगाद—

---

१ क–'हस्तशत०'। २ ग–'मुख'। ३ घ 'सर्वर्ध्या'। ४ क ख-'मूलम०'। ५ क ख–'=ह्सीयो भवतु'। ६ पादकुलकम्। ७ क-ख 'तदा'।
८ ९ छाया—अद्यापि सा परितपति कमलमुखी आत्मन: प्रमादेन।
प्रथमविबुद्धेन त्वया यस्या, प्रच्छादितमङ्गम्॥ १० आर्या।

[1]'धन्ना चक्कमी पए पए बोम कुणइ मुद्धमेय!।

सूरिराह—

मुंज रैमणरप्पन महमत्ता ठिआउ मङ्गपि ॥ १ ॥

इद श्रुत्वा राजा मुखं विच्छायमलक्षणसमं दधे। असौ मदन्तः पुर इत्यादिना इति चिन्ता। तथाचार्यैः कृपार्वेणामग्नत चिन्तित च—अहो विद्यागुणोऽपि दारुणं नन।

जननैरपि यच्चात्म—चापमानि करोत्यपि।

दाननन्ते यतो वेद्य न पुन प्रभुचेतस ॥ १ ॥

रात्री सूरि सकलजनपूज्य राजप्रासादपादसम्पुटतटे कुम्भमेव लिखित्वा पुराद् बहिर्ययौ। तद्यथा—

याम सन्ति तथापि रैविरमणिरि! मय स्थितिप्रम्पुक्त वर्तिष्यन्न इमं वय कथमिति सामऽपि मेर्व इच्य।

श्रीमत्ते मणयो नय यदि मत्कुम्भमनिहासलग्न ते घृङ्गारपरायणाः क्षितिभुजो मौली करिष्यन्ति न ॥ १ ॥[1]

कैस्मान् विविधपुष्पविरपुष्पमात्

किंच विमुखाक्षि विमो! यदि वा विमुख।

मा हन्त! केकिवर! हानिरियं तवैव

भूपालमौलिमणि पुनर्मणिता स्थितिर्नः ॥ २ ॥

इति करिपथेनैव दिग्भ्यामहरन् 'अवन्तावती'गौमवया पुरो बहिरारामं समवासार्षीत्।

---

१ २ अत्र—धन्य चक्कमन्ती वरि याने कुण पुणो दुवमेय!।

मूल रायमज्जो वेवामा लूपसो पतदपृथिः॥

३ इत्यत्रापे ... मामी। ४ मधुपुर ५ मार्तुन। ... या पुस्तके इद पद्यमित्थं विचने दृष्टपि—

[(१)]न किंचि पर विधि गच्छ भर्दिकण्या हरिसे।

वेहु वोइ करीवरा न इवे मुमीवि ॥ १ ॥

परन्तु प्रतिकर्तिरिपिरि प्रतिभाति कण्टस बुर्दमात् ... वयम्य। ६ कर्त्तावमर्शे।

तत्र पुरे धर्मो नाम राजा। स च गुणज्ञः। तस्य सभायां वाक्पतिनामा कविराजोऽस्ति। तेन सूरीणामागमनं लोकादवगतम्। ज्ञापितश्च राज्ञः। राज्ञा प्रवेशमहः कारितः। पूर्मध्ये सौधोपान्ते गुरुस्तुङ्गगृहे स्थापितः। राजा नित्यं वन्दते। कवयो जिता रञ्जिताश्च। प्रभावना प्रैधते स्म। यशश्च कुन्दशुभ्रम्। [1]'राजा प्रोचे—

अदृष्टे दर्शनोत्कण्ठा, दृष्टे विरहभीरुता।
दृष्टेनाप्यदृष्टेन, भवता नाप्यते सुखम् ॥ १ ॥[2]

निर्बन्धे सूरिराह—आमश्चेत् स्वयमायास्यति तदा वयं यास्यामः, नान्यथा। इति प्रतिज्ञाय स्थापिताः पुण्यलाभं कुर्वन्ति।'

इतश्च यदा बप्पभट्टिः कृतविहारः प्रातः श्रीआमपार्श्वं नायातस्तदा तेन सर्वत्रावलोकितो न लब्धः। जातो विलक्षः। 'याम स्वस्ति तवास्तु' इत्यादि [3]काव्यानि दृष्टानि। अक्षराण्युपलक्षितानि। ध्रुवं स मां मुक्त्वा क्वापि गत एवेति निर्णीतम्।

अन्यदा बहिर्गतेन राज्ञा महाभुजङ्गमो दृष्टः। तं मुखे धृत्वा वाससाऽऽच्छाद्य सौधं गतः। कविवृन्दाय समस्यामर्पितवान्—

शस्त्रं शास्त्रं कृषिर्विद्या, अन्यो यो येन जीवति।

इति। पूरिता सर्वैरपि। न तु नृपश्चमच्चकार हृदयाभिप्रायाकथनात्। तदा बप्पभट्टिं बाढं स्मृतवान्। सा हृदयसंवादिनी गीस्तत्रैव। अथ स पटहमवीवदत। तत्रेदमजूघुषत्— यो मम हृद्गतां समस्यां पूरयति तस्मै [4]हैमटङ्कलक्षं ददामि। तदा 'गोपगिरी'यो द्यूतकारः कश्चिद् 'गौड'देशं गतः। स बप्पभट्टिसूरीणामग्रे तत् समस्यापदद्वयं कथितवान्। सूरिणा पश्चार्द्धं पेठे—

सुगृहीतं च कर्तव्यं, कृष्णसर्पमुखं यथा ॥१॥[5]

इति। स हि भगवान् [6]षड्विकृतित्यागी सिद्धसारस्वतो गगनगमनशक्त्या विविधतीर्थवन्दनशक्तियुक्तस्तस्य कियदेतत्[1]। स द्यूत-

१ ग-पुस्तके 'राजा० कुर्वन्ति' एतदधिकम्। २ अनुष्टुप्। ३ ख-'काव्यं दृष्टम्'। ४ ग-हेम०'। ५ अनुष्टुप्। ६ दुग्ध-घृत-दधि-तैल-गुड-पक्वान्नेति षड् विकृतयः।

कण्ठस्थसमस्यापादत्रयं गोपगिरौ श्रीआमराजे निवेदितवान् । राजा दध्यौ—अहो सुगन्धितमपत्यम् ! । तथाप्युक्त—केन कथं पूरिता समस्या ? । भृत्यैरुक्तं—बप्पभट्टिसूरिभिः । ततः पूरिता(भू)रिष्य तस्योचितं दानं चक्रे ।

अन्यदा राजा नगर्यां बहिर्ययौ । स्कन्धोपगृह्य पान्थं मृत ददर्श । तत्रासीनं कण्ठस्थं जरत्पत्रकमेकं निपुणं च्युतं तद्वाचयत् । गाथाद्वं च लिखितमासीत् लिखितं दैवलिम्पा (कटिम्पा?) मप्यस्वत् ।

तैया मह निग्गमणे स्याय चोरासुपदं वं कव्वं ।

तदपि समस्यापादत्रयं राजा कविभ्यः कथितम् । न कस्यापि सम्यक् पूरितम् । राजा चिन्तयति स्म—

येस्मन्नप्रभिव विलासो मुखं कैः केन सुम्बितम् ! ।

दत्तमाद्विनसर्वंशां हिता सन्ति च सन्ति वा ॥१॥

समस्यापादी स एव मम मित्रं सूरिवरः । स एव दौत्योऽस्मिन्ने नृपे प्रेषसूरि प्रेषि । सूरिणाऽपि निमेषमात्रेण पूरिता समस्या—

वेरर(प?)तपनिद्रनमिवरजेण तं मम्म सोमरियं ॥१॥

तत् पुनर्दृष्ट्वाऽऽश्चर्येणाकुला राजा स्नेहोत्कण्ठितेन सूरेरानाय यात्रिकाः सचिवाः प्रस्थापिताः । तथाऽम्बसचिवस्य विज्ञप्तिश्च ददे । प्राप्तास्ते तत्र । दृष्टास्तत्र सूरयः । तथाऽम्बस्य वन्दिताः । राजविज्ञप्तिर्दत्ता । तत्र किञ्चित् वाचितं गुरुभिः—

न गङ्गा माहेय सुपुनतिकपोलस्थलगता

न वा कुक्षि मुक्तामणिसरसिजस्पर्शरसिकः ।

न कोटीरारस्य स्मरति न सखीं मधुकय—

स्ततो मन्ये चित्रं स्वगुणविरता लोकविरतम् ॥२॥

---

१ क-ख च(स)तिम्पान्' ।

२ अथवा—तव प्रेम सिंधमनो त्रिनया चे(त्)तागुलियं कथितम् ।

३ ग-'त्तोर्णं' स्तुपदर

४ अथवा—कररयनविनुरमीनकनैव तव् वना सूपर । ५ आर्या । ६ शिखरिणी ।

छायाकारणि[1] सिरि[2] धरिय पंचवि[3] भूमि पडंति ।
पत्तह [4]इहु पत्तत्तणउ तरुअर काइं करंति ? ॥ २ ॥[5]

सचिवा अप्यूचुः—स्वामिन् ! आमराजो निर्व्याजप्रीतिर्विज्ञ(ज्ञा?)पयते(ति?)— शीघ्रमागत्याऽयं देशो वसन्तावतमितोद्यानलीलां लम्भनीयः । [6]भवद्वाग्रसलुब्धानामस्माकमितरकविवाग् न रोचते ।

कथासु ये लब्धरसाः कवीनां
ते नानुरज्यन्ति कथान्तरेषु ।
न [7]ग्रन्थिपर्णप्रणयाश्चरन्ति
[8]कस्तूरिकागन्धमृगास्तृणेषु ॥१॥[9]

तदाकर्ण्य लेखं दत्त्वा सूरिभिः सचिवाः प्रोचिरे—श्रीआमो गीष्पतिसमप्रज्ञ एव भापणीयः—

अस्माभिर्यदि वः कार्यं, तदा धर्मस्य भूपतेः ।
सभायां छन्नमागम्य, स्वयमापृच्छ्यतां द्रुतम् ॥१॥[10]

अस्माकमिति हि प्रतिज्ञाऽऽस्ते धर्मेण राज्ञा सह—स्वयमामः समेत्य त्वत्समक्षं यदाऽस्मानाकारयति किल तदा तत्र यामः, नान्यथेति । प्रतिज्ञालोपश्च नोचितः सत्यवादिनां प्रतिष्ठावताम् । ततो मन्त्रिण उप'कन्यकुब्जे'ऽभ्याजग्मुः । [11]सूरीणामुक्तमुक्तं लेखश्चादर्शि । तत्र लिखितं यथा—

"[12]विज्झेण विणा वि गया, नरिंदभवणेसु हुंति गारविया ।
विंझो न होइ वझो, गएहिं बहुएहि वि गएहिं ॥१॥"[13]

---

१ छाया—छायाकारणाच्छिरसि धृतानि प्रत्युत भूमौ पतन्ति ।
पत्राणामेतत् पात्रत्व (पत्रत्व) तरुवराः किं कुर्वन्ति ? ॥
२ घ—'कारिणी' । ३ घ—'पच्चिवि' । ४ ग—'पहुपत्त०' । ५ एतच्छन्दोनाम न ज्ञायते ।
६ ख—'भवद्वाक्यरस०' । ७ घ—'निर्ग्रंथिमुकमाश(?)पर्ण०' । ८ क-ख—'ग्रथि०' ।
९ उपजातिः । १० अनुष्टुप् । ११ ख-घ—'सूरीणां तदुक्त०' ।
१२ छाया—विन्ध्येन विनाऽपि गजा नरेन्द्रभवनेषु भवन्ति गौरविताः ।
विन्ध्यो न भवति वन्ध्यो गतेषु बहुकेष्वपि गजेषु ॥
१३ अतः परं दशमपर्यन्तानां पद्यानां छन्द आर्या ।

माणसरोहिणि सुहाई जइ न लब्भति रायहंसेहिं ।
तह तस्स वि तेहिं विणा तीरुच्छंगा न सोहंति ॥२॥
[4]परिसेसियहंससउणं पि माणसं माणसं न संदेहो ।
अन्नत्थ वि जत्थ गया हंसा वि बया न भण्णंति ॥३॥
हंसा जेहिं गया तहिं गया महीमंडणा हवंति ।
छेहउ ताइं महासर-ह जे हंसेहिं मुच्चंति ॥४॥
मेलवे सव्वंसु विय, [illegible] ।
पम्माइ पि हु मउया-उ चेइण जायए महग्घं ॥५॥
[illegible] मेहुणा [illegible] वि मच्चइ ।
[illegible] वि विहूणो, सुमा वि किं महुअविहूणो ? ॥६॥
[illegible] विणा वि रयणायर [illegible] समुद्दा ।
[illegible] ति तर जस्स [illegible] सो वि हु महग्घा ॥७॥

---

१ छाया—[illegible] सुखानि यदा न लभ्यन्ते राजहंसैः ।
तदा तस्यापि तैर्विना तीरोत्सङ्गा न शोभन्ते ॥
१ ख—"[illegible]" । ३ ख—"विय" ।
४ छाया— परिशेषितहंसशकुनं [illegible] मानसं न सन्देहः ।
अन्यत्रापि यत्र (पुनः) गता हंसा अपि बका न भण्यन्ते ॥
हंसा यत्र गतास्तत्र गता महीमण्डना भवन्ति ।
[illegible] तानि महासरांसि ये हंसैर्मुच्यन्ते ॥
५ ख—"मर्व" ६ ख—"विमल(?) वद्दिनयमा" ।
५–६ छाया—[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
९ ख—"मुसुमा ग "मधुरम(?)"
१ छाया—[illegible] ।
न [illegible] ॥
१ ख "[illegible]"

[1]पइ मुक्काण वि तरुवर! फिट्टइ पत्तत्तण न पत्ताण ।
तुह पुणच्छाया जइ होइ कहवि ता तेहिं पत्तेहिं ॥८॥
जे केवि पहू महिमंडलमि ते [2]उच्छुदंडसारिच्छा ।
सरसा जडाण मज्झे विरसा पत्तेसु दीसंति ॥९॥
संपइ पहुणो पहुणो पहुत्तण किं चिरंतणपहूण ? ।
दोसगुणा गुणदोसा एहिं कया न हु कया तेहिं ॥१०॥

एतद् वाचयित्वा सोत्कण्ठः नृपः सारकतिपयपुरुषवृत्तोऽचालीत् । 'गोदावरी'तीरग्राममेकमगमत् । तत्र खण्डदेवकुले वासमकार्षीत् । देवकुलाधिष्ठात्री व्यन्तरी सौभाग्यमोहिता गङ्गेव भरतं तं भेजे । प्रभाते करममारुह्य तां देवीमापृच्छ्य प्रभुपादान्तं प्राप । गाथार्धं पपाठ—

[3]अज्ज वि सा सुमरिज्जइ, को नेहो एगराईए ? ।

सूरीन्द्रः प्राह—

[4]'गोदा'नईइ तीरे, सुन्नउले जसि वीसमिओ ॥ १ ॥[5]

इति । अन्योन्यं गाढमालिङ्गितुरुभौ । ततः आमः आह स्म—

अद्य मे सफला प्रीतिः—रद्य मे सफला रतिः ।
अद्य मे सफलं जन्म, अद्य मे सफलं कुलम् ॥ १ ॥[7]

रात्रौ इष्टा गोष्ठी च ववृते मधुमधुरा । ततः प्रभाते सूरिर्धर्म-नृपास्थानमगमत् । आमनृपोऽपि प्रधानैः स्वैः पुरुषैः सह

१छाया—त्वया मुक्तानामपि तरुवर ! भ्रश्यति पत्रत्वं (पात्रत्वं) न पत्राणाम् ।
तव पुनश्छाया यदि भवति कथमपि तर्हि तैः पत्रैः ? ॥
ये केऽपि प्रभवो महीमण्डले ते इक्षुदण्डसदृशाः ।
सरसा जडानां (जलानां) मध्ये विरसाः पत्रेषु (पात्रेषु) दृश्यन्ते ।
सम्प्रति प्रभवः प्रभवः प्रभुत्वं किं चिरन्तनप्रभूणाम् ? ।
दोषगुणा गुणदोषा एभिः कृता न खलु कृतास्तैः ॥ २घ-'उच्छदंड०
३ छाया- अद्यापि सा स्मर्यते कः स्नेहः एकरात्र्याः ? ।
गोदा(वरी)नद्यास्तीरे शून्य(देव)कुले यदसि विश्रमितः ॥
४ ग-'गोदानईय०' । ५आर्या । ६ क ख-'फलम्' । ७ अनुष्टुप् ।

पयमंसरहिएहिं सुवाहं जाइ न कम्मवि रायहंसेहिं ।
तह तस्स वि तेहिं विणा तीरुच्छंगा न सोहंति ॥२॥
'परिसेसियहंसउलं पि माणसं माणसं न संदेहो ।
अन्नत्थ वि जत्थ गया हंसा वि बया न लग्गंति ॥३॥
हंसा जेहिं गया तहिं मेहा महीमंडणा हवंति ।
छेहउ ताणं महासर-ह जे हंसेहिं मुच्चंति ॥४॥
[illegible] रयणायरु व्विय [illegible] ।
पम्भट्ठ पि हु मलया-इ [illegible] ॥५॥
[illegible] मेहुरया [illegible] वि [illegible] ।
[illegible] वि विड्डो हुओ वि किं [illegible] ॥६॥
[illegible] पुंसुहेण विणा वि रयणायरु व्विय [illegible] ।
[illegible] पि उरे जस्स ठिय सो वि हु [illegible] ॥७॥

---

१ छाया—[illegible] यथा न कम्पन्ते राजहंसैः ।
तथा [illegible] तेन विना तीरोत्सङ्गा न शोभन्ते ॥
२ [illegible] । ३ [illegible]—'पिय' ।
४ छाया—परिशेषितहंसकुलमपि मानसं मानसं न सन्देहः ।
अन्यत्रापि यत्र (पुन) गता हंसा अपि बका न लगन्ते ॥
हंसा यत्र [illegible] ।
[illegible] ॥
५ [illegible]—'[illegible]' । ६ [illegible]—'[illegible](?) [illegible]' ।
७-८ छाया—[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
९ [illegible]—'[illegible]' [illegible]—'[illegible](?)' ।
१ छाया—[illegible] ।
[illegible] ॥
११ [illegible] '[illegible]' ।

पइ मुक्काण वि तरुवर! फिट्टइ पत्तत्तण न पत्ताण ।
तुह पुणच्छाया जइ होइ कहवि ता तेहिं पत्तेहिं ॥८॥
जे केवि पहू महिमंडलंमि ते [2]उच्छुदडसारिच्छा ।
सरसा जडाण मज्झे विरसा पत्तेसु दीसंति ॥९॥
संपइ पहुणो पहुणो पहुत्तण किं चिरंतणपहूण ? ।
दोसगुणा गुणदोसा एहिं कया न हु कया तेहिं ॥१०॥

एतद् वाचयित्वा सोत्कण्ठ नृप सारकतिपयपुरुषवृत्तोऽचालीत् । 'गोदावरी'तीरग्राममेकमगमत् । तत्र खण्डदेवकुले वासमकार्षीत् । देवकुलाधिष्ठात्री व्यन्तरी सौभाग्यमोहिता गङ्गेव भरत त भेजे । प्रभाते करभमारुह्य ता देवीमापृच्छ्य प्रभुपादान्त प्राप । गाथार्धं पपाठ—

[3]अज्ज वि सा सुमरिज्जइ, को नेहो एगराईए ? ।

सूरीन्द्र प्राह—

[4]'गोदा'नईइ तीरे, सुन्नउले जसि वीसमिओ ॥ १ ॥[5]

इति । अन्योन्य गाढमालिङ्गितुरुभौ । तत आम आह स्म—

अद्य मे सफला प्रीति-रद्य मे सफला रति ।
अद्य मे सफल जन्म, अद्य मे सफल कुलम् ॥ १ ॥[7]

रात्रौ इष्टा गोष्ठी च ववृते मधुमधुरा । तत प्रभाते सूरिर्धर्म-नृपास्थानमगमत् । आमनृपोऽपि प्रधानैः स्वैः पुरुषैः सह

१छाया—त्वया मुक्तानामपि तरुवर ! भ्रश्यति पत्रत्व (पात्रत्व) न पत्राणाम् ।
तव पुनश्छाया यदि भवति कथमपि तर्हि तैः पत्रैः ? ॥
ये केऽपि प्रभवो महीमण्डले ते इक्षुदण्डसदृशा ।
सरसा जटानां (जडानां) मध्ये विरसा पत्रेषु (पात्रेषु) दृश्यन्ते ।
सम्प्रति प्रभव प्रभव प्रभुत्व किं चिरन्तनप्रभूणाम्? ।
दोषगुणा गुणदोषा एभि कृता न खलु कृतास्तैः ॥ २घ-'उच्छुदड'।
३ छाया- अद्यापि सा स्मर्यते क स्नेह एकरात्र्या ? ।
गोदा(वरी)नद्यास्तीरे शून्य(देव)कुले यदसि विश्रमित ॥
४ ग-'गोदानईय०' । ५आर्या । ६ क ख-'फलम्'। ७ अनुष्टुप् ।

स्पर्शितया भूपाऽऽगमत् । आम आवउ इति भूपाली सूरिभिर्भाय आमस्य विशिष्टयुक्त्या दर्शिता । एते आमवत्सरा नियाक्लानाभानुम यास्या इति । धर्मेण राज्ञा पृष्ट विशिष्टमथार्थं— मो आमग्रन्थनग । स सम्पर्श स्वामी सदैवाम्रस्य ॥ वैशिष्ट्यरितम्— सारस्य स्पर्श अस्त्यागमोस्ति । प्रथम मातुलिङ्गा केन्द्रे वासवित्ता आम वसीनाऽस्ति । सूरिभि पृष्टम्— मा स्वर्गीयर । तत्र करे स्थितेनव ॥ । स्वर्णाचरीसूनन श्रीआममनातम् — शीघउच इति । अन्यरोम वाचमप्प सूरिभि सूक्ष्मनन्मारितम्—

तेर्ह मीचरी मेगारा पडी पत्र उवालखी पिउ मंडलमेहा ।
१ विरहि मानुसु ना मरा मह्य वचग मिहोस कमिनाचित्ती चतु
बाणइ दोरा ॥ १ ॥

इति । गुरुणा कथितम्—आम आवउ आम आवउ । धर्मेण राज्ञा पुनरपिदाद स्मृत्या पृष्टम्— अहा स्वर्णधर ! किमिदम् ? । तनान्तम् — नू भवि तनारत्मन । इत्यादि गोष्ठ्यां धर्ममानार्थं
२ शान्तं धर्मे श्रीआमराजाधिकृता मेमपत्रयविमृश्य पुराह वहि स्मान स्थान स्थापितगाथैः नियमीत्यपि सूरिमप्यपाग्यत् । मानना सूरीणा विज्ञप्य प्रहार्ष्य वाणि कथमपोत्थत् । रसास्पदा स वाग्रहि याला च रम्भा-तिलोत्तमाप्रमुखमपिपेक्षि

---

१ आमनृपतेः उवाची आम ? आम्पत्त्य । २ क 'आमगुप्तरा ।
३ क- 'धर्म' । [illegible] तस्मात् क्रियी रात
४ [illegible] श्रीवाचनमहिमसिरि [illegible]
[illegible] ।
५ [illegible] 'मित मैं,
[illegible]
[illegible]
[illegible]
[illegible]

दुर्लभः। आमो राजाऽमूल्य कङ्कण ग्रहणके मुक्त्वा वेश्यागृहे उषित आसीत्। सा तु 'लक्षणावती'पतेर्धर्मस्य । एक कङ्कण आमो राजद्वारे मुञ्चन्नगात्। अपराह्णे राज्ञ पार्श्वाद् बप्पभट्टि-सूरिभिर्मुत्कलापितम्— देव ! 'गोपगिरौ' आमपार्श्वे याम', अनुज्ञा दीयताम्। धर्मेण भणितम्—भवतामपि वाणी विघटते ? भवद्भिर्भणितमभूत्—यदा तत्र दृष्टौ आमः समेत्यास्मानाह्वयति तदा याम, नार्वाक्, तत् किं विस्मृतम् ? जिह्वे किं यो द्वे स्त ?। आचार्या जगदु —श्रीधर्मदेव ! मम प्रतिज्ञा पूर्णा। राजाऽऽह —कथम् ?। सूरिर्वदति— आमराजोऽत्र स्वयमागतस्तव दृष्टौ ?। राजाऽऽह—कथ ज्ञायते ? । सूरि —यदा भवद्भिः पृष्ट भवतां स्वामी कीदृश विशिष्टैस्तदा भणितम्—स्थगिका-धररूप, तथा, ' बीजउरा ' शब्दोऽपि विमृश्यताम्। ' दोरा '-शब्दोऽपि यो मयोक्तोऽभूत्। तस्मात् प्रतिज्ञा पूर्णा मे। अत्रान्तरे केनापि राजद्वाराद् आमकङ्कण धर्मनृपहस्ते दत्त आमनामाङ्कितम्। द्वितीय वेश्यया दत्तम्। तद् दृष्ट्वा नष्टसर्वस्व-स्तद्धन इव धर्मः शुशोच— धिग् मां यन्मया शत्रु स्वगृहमायातो नार्चित, न च साधित । धर्मेण मुत्कलिता सूरय पुर क्वापि स्थितेनामेन सह जग्मु । मार्गे गच्छता आमेन पुलिन्द एको जलाशयमध्ये जल करालवन्मुखेन पिबन् दृष्ट । आमराजेन सूरीणामग्रे एत्योक्तम्—

[4]पसु जेम पुलिंदउ पउ पियइ [5]पथिअ कवणिण कारणिण।

सूरिभिरभाणि—

[6]कर बे वि करंभिय कज्जलिणमुद्धहअमुनिवारणिण ॥१॥

---

१ ग-'आमो राजाऽत्र '। २ 'दोराशब्दोऽपि विमृश्यताम्' इत्यधिकः ख-पाठः।
३ ग-'नृपधर्महस्ते'।
४ छाया—पशुरिव पुलिन्द पय पिबति पथिक केनापि कारणेन। ५ ग-'पथिउ'।
६ छाया— करौ द्वावपि करम्भितौ कज्जलेन उद्वहदश्रुनिवारयतः।

राजा प्रस्तावार्थं स समाकार्य पृष्टः । तेनोक्तम्—सत्यं सूरिवचः । दृष्टौ दर्शितौ । राजा तेन वाक्संवादेन प्रीतः । 'अज्ज वि सा परितप्पइ' इत्यादि तदुक्तं सर्वं सारस्वतविजृम्भितमिति निरणैषीत् । श्रीसूरीश 'गोपालगिरिं' गत । पताकातोरणमञ्चप्रतिमञ्चादिमहोत्सवाद्यैः । दिवसाः कतिचिदतिक्रान्ताः । तत्र श्रीसिद्धसेनसूरयो वार्धक्येन पीडिता अनशनं प्रतिपन्नाः श्रीबप्पभट्टिसूरीणामाकारणाय श्रीतार्यमुनियुग्मं प्रैषिषुः । ते तत् गुरोर्लेखमर्पितवन्तः । तत्र लिखितं पद्यम्—

'अभ्यागतोऽसि परमामधिरोपितोऽसि
तद् किञ्चनापि कुरु वत्सक! बप्पभट्टे! ।
प्रायोपवेशनरते विनिवेश्य येन
सम्प्रेक्षयस्व मरणाय निजान्तमस्मान् ॥१॥'

तद् दृष्ट्वा आममूपतिमापृच्छ्य 'मोढेरक'पुरं प्रययावम्बिकास्थापितवीरजिनमहोत्सवमध्यं प्रापुस्ते । गुरून् ननमिरे । गुरवोऽपि तान् वात्सल्यादाश्लिष्य । वत्सा! मद्गुणस्थितमरणाय स्मरणम् । मुक्तकालमपि ते विस्मृतम् । राजानुगमने तेऽस्माकं तु चाभवीत् । मरणं समयम् । बभूवो मम । ततोऽप्यवसानमानुमरणमनन्तं दुष्कृतगर्हा-सुकृतानुमोदन-तीर्थमाराधनादिरूपं विधिना विधापिताः । गुरवो देवलोकमलंचक्रुः मानवभवानुसमानम्तु । शोक उत्पन्नः । ततो बप्पभट्टिः श्रीगोविन्दसूरये श्रीनन्नसूरये च गच्छभारं समर्प्य श्रीआमपार्श्वमगात् । पूर्ववत् समस्याविनोदाः स्फुरन्ति ।

एकदा सूरिर्नृपसभायां चिरं पुस्तकव्याख्यानात् तस्थौ । तत्रैव नर्तकी नृत्यन्ती आसीत् स्पर्शयौवनाढ्या । सूरिदृष्टिः किंचित् तस्या गुरुनितम्बस्तनयोः श्रीखण्डमुक्तिकमयं दा

निवेशयामास । आमस्तद् दृष्ट्वा मनसि पपाठ—

[2]'सिद्धततत्तपार-गयाण जोगीण जोगजुत्ताण ।
जइ ताण पि मयच्छी, मणमि ता तच्चिय पमाण ॥१॥'[3]

आमो रात्रौ पुवेषा तां नर्तकीं सूरिवसतौ प्रैषीत् । तया[1] सूरीणां विश्रामणाऽऽरब्धा । करस्पर्शेन ज्ञाता युवतिः सूरिणाऽभिहिता सा—का त्वम् ? । कस्मादिहागता ? । अस्मासु ब्रह्मव्रतनिविष्टेषु वराकि ! भवत्या कोऽवकाशः ? । वात्याभिर्न चलति काञ्चनाचलः । तयोक्तम्—भवदभ्य उपदेष्टुमागता—

राज्ये सारं वसुधा, वसुधायामपि पुरं पुरे सौधम् ।
सौधे तल्पं तल्पे, वराङ्गनाऽनङ्गसर्वस्वम् ॥१॥[4][5]

इति । किञ्च—

प्रियादर्शनमेवास्तु, किमन्यैर्दर्शनान्तरैः ? ।
प्राप्यते येन निर्वाणं, सरागेणापि चेतसा ॥२॥[6]

श्रीआमेन प्रेषिताऽहं प्राणवल्लभा भवतां शुश्रूषार्थम् । ततः सूरिशक्रो वदति स्म— अस्माकं ज्ञानदकूप्रपातदृष्टद्रष्टव्यानां नैव व्यामोहाय प्रगल्भसे ।

मलमूत्रादिपात्रेषु, गात्रेषु मृगचक्षुषाम् ।
रतिं करोति को नाम, सुधीर्वर्चोगृहेष्विव[8] ॥१॥[7]

साऽपि निर्विकारं सूरिवरं निश्चित्य ध्वनच्चेता प्रातर्नृपतिसमीपं गता । पृच्छते राज्ञे रात्रीयः सूरिवृत्तान्तः सम्यक् कथितस्तया— पाषाणघटित इव तव गुरुः, नवनीतपिण्डमयः शेषो लोकः । यावन्तः कूटप्रपञ्चा हावभाव-कटाक्ष-भुजाक्षेप-चुम्बन-

---

१ च-'स्तथा' ।
२ छाया— सिद्धान्ततत्त्वपारङ्गतानां योगिनां योगयुक्तानाम् ।
यदि तेषामपि मृगाक्षी मनसि तर्हि सदेव प्रमाणम् ॥
३ आर्या । ४ ख—'वराङ्गनानां सर्व०' । ५ आर्या । ६—७ अनुष्टुप् । ८ क ख-'वराको' ।

गज-दन्तकाष्ठादिविनिर्मितास्तत्र सर्वे आजन्मपरिशीलितास्तत्र मनुष्याः। पुनस्तिर्यग्योनिमात्रमपि मनोऽस्य नाकर्षत्। मनुराग-प्रकार पुष्पसर-सौरभ्य-कृष्णतादिविनिर्मितानिरपि नाद्भुतम्। तत्रैव मन्ये महाप्रतापा न देवकन्याभिर्न विद्याधरीभिर्न नागकन्याभि-र्वाप्यस्ते; मानुषीणां तु का कथा। अस्मिन् सूरेर्मतैर्वैष नृपो विस्मयमगात् ... संवृत्त। तस्मै च गुरु व्याजप्रसाद इत्थं—

न्युन्छने यामि वत्सलां ... ।
यतिः ... सौहार्द-... इत्याय ते ॥१॥

प्राकर्षेण समग्र। राजा हीनो न वदति किञ्चित्। सूरिभिर्जल्पितम्—राजन्! मा ... ; महर्षीणां ... राजा ... न ... । राजोक्तम्— ... । एवं गुणैर्जितो नृपो ... —

... एव ...
... ।
... ना
... इति ... न ... ॥२॥

इत्युक्त्वा ... प्रणनाम श्रीसूरीन्।

अन्येद्युः राजा ... एरण्डवृक्षस्य संवृतत्वमवितर्क्य एरण्डपत्राणि विचिन्त्यानां ... गाथार्धं श्रीनितवान्—

न(त ?)... एरण्डो ... ।

---

१ ... २ ... । ३ ... । ४ ... ।
५ ... । ६ ... । ७ ... ।
... ।

तत् तु सूरीणा पुर समस्यात्वेन समर्पितवान् । सूरय ऊचु·—

'इत्थ घरे हलियवहू ईद्दहमित्तत्थणी वसइ ॥ १ ॥'

राजा विस्मित. । अहो सार सारस्वतम् ! ।

अन्यदा साय प्रोषितभर्तृकां वासभवन यान्तीं वक्रग्रीवा दीपकरां ददर्श । गाथार्द्धं चोच्चैः सूर्यग्रे पपाठ—

'दिज्जइ वक्कगीवा—इ दीवओ पहियजायाए ।

सूरिर्गाथापूर्वार्द्धमुवाच—

'पियस्समरणपलुट्ट—तअसुधारानिवायभीयाए ॥ २ ॥'

इति । सूरि-भूपौ सुखेन काल गमयतो धर्मपरौ ।

अन्यदा धर्मनृपेण आमनृपस्य पार्श्वे दूत प्रहित । एत्या वोचत्—राजन् ! तव विचक्षणतया धर्मनृप सन्तुष्ट । पुनः स आह— भवद्भिर्वय छलिता । यतो भवद्भ्यो गृहमागतेभ्यो नास्माभिर्महानल्पोऽपि कोऽपि सत्कार कृतः । अधुना शृणु— अस्मद्राज्ये वर्धनकुञ्जरो नाम महावादी बौद्धदर्शनी विदेशाद्याग-तोऽस्ति । स वाद जिघृक्षु । य कोऽपि वो राज्ये वादी भवति स आनीयताम् । अस्माक भवद्भि सह चिरन्तन वैरम् । य कोऽ-पि वादी विजयी भविष्यति तत्प्रभुरपरस्य राज्य ग्रहिष्यति । मम वादिना यदा जित तदा त्वदीय राज्य मया ग्राह्यम् । यदा तव वादिना जित तदा मदीय राज्य त्वया ग्राह्यम् । अय पण । वाग्युद्धमेवास्तु । किं मानवकदर्थनेन ? । आमेनोक्तम्—दूत ! त्वया यदुक्त तद् धर्मेण कथापितमथवा त्वया स्वतुण्डकण्डूतिमात्रे-

---

१ छाया–अत्र गृहे हालिकवधूरेतावन्मात्रस्तना वसति ।

२ घ–'इद्दहमिहछणी' । ३ ग–'अत्थि' । ४ आर्या । ५ ख–'भुवन ' ।

६-७ छाया— दृश्यते वक्रग्रीवया दीपक पथिकजायया ।

प्रियस्मरणप्रक्षुठदश्रुधाराभिपातभीत्या ॥ ८ आर्या ।

९ ख–'पदि' ।

घोऽस्त्वम् ?। यदि तव प्रभुः ईदृशं राज्यं वादे जित्वा समर्पयिष्यति मे इति सत्यं तदा मम वादिसमाजायानीयताम् । दूतेनोक्तम्— भारतयुद्धात् युधिष्ठिरेणापि 'द्रोण'पर्वण्यसत्यं भाषितम्, अस्मत्प्रभुस्तु मरणेऽपि न मिथ्या भणति । आमेन दूतः प्रैषि । तत्सविनोपारे च सप्तमाहि गुर्जरभूपाऽर्थपथ संचरमाणो आमाऽगमत् । धर्मनृपतिरपि यथेनाऽऽसारं [illegible] तेनाजगाम । 'परमार'वंश्य नरेन्द्र [illegible] वाक्पतिनामानं [illegible] समानयौ । उचितमवसरे [illegible] स्थापयामास । तौ वादि-प्रतिवादिनौ पक्षप्रतिपक्षपरिग्रहेण वादमारेभाते । सभ्याः कौतुकाक्षिप्ताः पश्यन्ति । [illegible] । वादे षण्मासा गताः । द्वयोः कोऽपि न हारयति न जयति । आमेन सूरयः प्रोक्ताः सत्वरम्— राजकार्याणां प्रत्यूहः स्यात्, निर्वाहयतामतः शीघ्रम् । सूरिणा भणितम्— प्रातर्निर्वाहयिष्यामि, मा स्म वो व्यग्रता भूत् । रात्रौ सूरीश्वरेण मन्त्रजापतस्या मध्ये [illegible] मणिमाली [illegible] भगवती भारती साक्षादानीता । चतुर्दशभिः [illegible] स्तुता । देव्योक्तम्— वत्स ! केन कारणेन स्मृता ? । सूरीश्वरेण भणितम्— षण्मासा वादे जाताः, तथा कुरु यथा वादं निस्तरीष्यामि ॥ । देव्या गदितम्— वत्स ! [illegible] प्राक् [illegible] । [illegible] । [illegible] यो [illegible] । सूरिणोक्तम्— न वेद्मि । किं [illegible] येन [illegible] न दत्से ? । भारती ऊचे— वत्स ! [illegible] पार्श्वात् । [illegible]

"[illegible] ॥" इत्यमरकोशे १ [illegible] इति । ३ क 'यदि' [illegible] ख आमो (आम)[illegible] ५ ख [illegible]
६ ख [illegible] ख 'जगाद' ति । १ ख [illegible]

कुर्वतस्तस्य वदनाद् गुटिका ममेच्छया पतिष्यति तदा त्वया जेष्यते, एकं तु याचे—मत्स्तुतेश्चतुर्दशकाव्य कस्याप्यग्रे न प्रकाश्यम् । तत्पठने हि मया ध्रुवं[1] प्रत्यक्षया भाव्यम् । कियता प्रत्यक्षा भवामि ? । क्लेशेनालम् । एवमुक्त्वा देवी विद्युज्झात्कारलीलयाऽन्तर्दधे । सूरिभिर्निशि परमाप्त शिष्य एको वाक्पतिराजसमीप प्रहित्याख्यापितम्, यथा सूरयो वदन्ति—राजन् ! त्वं विद्यानिधिरस्माकं[2] 'लक्षणावती'पुरीपरिचितचर । तदाऽवादी —भगवन् ! निरीहा भवन्तः, कां भवद्भ्यो भक्तिं दर्शियामि ? ।" तदा वयमवोचाम—अवसरे कामपि भक्ति कारयिष्याम[3] । भवद्भिर्भणितम्—तथाऽस्तु । इदानीं सोऽवसरोऽत्र समायात । वाक्पतिना शिष्य पृष्ट — सूरय किं मे समादिशन्ति ? आदिष्टं कुर्वे ध्रुवम् । शिष्यो न्यवेदयत्—राजन् ! गुरव आदिशन्ति—प्रातर्धर्मा-ऽऽमयो सद स्थयो सतोस्त्वया वाच्य यथा वदनशौच विना भारती न प्रसीदति । तस्माद् वादिप्रतिवादिसभ्यसमेशा मन्त्रे शौच कुर्वन्तु । एतावति कृते भवता न सर्व स्नेह कृत एव । वाक्पतिना तदङ्गीकृतम् । शिष्येणोपगुरु गत्वा नत तत्प्रतिज्ञात कथितम् । तुष्टा गुरव । प्रत्यूषे उदयति भगवति [6]गभस्तिमालिनि लाक्षालिप्त इव प्राचीमुखे राजानौ सभायामागाताम् । वाक्पतिना वदनशौच सर्वे कारिता , बौद्धवादीन्द्रोऽपि । तस्य वदनकमलाद् विगलिता गुटिका पतद्ग्रहे । बप्पभट्टिशिष्यै पतद्ग्रहो जनैर्दूरे कारापित । गुटिका सुरीन्द्रसाज्जाता । बौद्धो गुटिकाहीन सूरिणा पार्थेन कर्ण इव दिव्यशक्तिमुक्त नि शङ्क वाक्पुष्पैर्हत । निरुत्तरीकृत राहुग्रस्तश्चन्द्र इव हिमानाविलुप्तस्तम्बखण्ड इव वाट निस्तेजतां भेजे । तदा श्रीबप्पभट्टिर्निर्विवाद 'वादिकुञ्जरकेसरी'ति विरुद मेव परेश्च

१ ग-'ध्रुव प्रत्यक्ष०' । २ ख-'रस्मान्' । ३ ख-'कारापयिष्याम' । ४ क-'आदिशतु' । ५ ग--'सम्येशा' । ६ सूर्ये ।

दत्तम् । धर्मेण समार्द्धं राज्यं भामाय दत्तम् । भवतीदम् । धर्मोऽपि राज्यं लभ्यते । कथम् पर्वा ? । भामेन गृहीतम् । तदा सूरिणा भाम प्रोक्तः — राजन् ! पुना राज्यं धमाय देहि । महाहम्मभिदम् । शोभते च त । राजस्यापराधाचार्याय पारम्पर्येण यूनम् । एव श्रीरामेण वनस्थेनापि सुग्रीव-विभीषणौ राजीकृतौ । लक्ष्मणेन कुम्भकर्णपु तेजुल्म । एतदुपचारक्रमेण भामेन गाम्भीर्यौदार्यधाम्ना धर्माय तदा च समर्प्य स धर्मः परिताषितः । स्वे मता करिण यत्र सार्द्धं गुहाद्य रक्ता, सहर्ष समरूप देयाः सर्वं वाद्यिवाणि प्रावापित । सर्वं सर्वं स्थानं गता सर्वे । सूरि-नृपौ यशोधवलितसकलभुवनौ गोपगिरौ श्रीमहावीरमन्दिरा-तम् । तत्रा सूरिकृत श्रीवीरस्य स्तवनम् — "शान्तो वेष" शमसुखफलम्' इत्यादि काव्येनादिसकलमपि सद्दे पठ्यते । सद्वेन प्रभुर्वन्द्यते । तुष्टे च —

रोषेणैवाक्रमः अन्यः कोऽप्यपायुरपमर ॥

न तमास्ति न तेनास्ति यस्मिर्धर्मनुरिते सवि ॥ १ ॥

अन्यदा स्वपरसमयसूरिं प्रवेश्य राजा प्रभुभिर्निर्मांसादि देतम्यसमनियम कैरित । सम्यक्त्वपूर्वकद्वादशव्रतनिरतश्च श्रावक कृतः । तदा अत्र नेमिचिह्नविमानकल्पं प्रथमचरम्यजिनतुपसो विविध सिद्धान्ते ।

---

१ प- तुष्य २ क 'भनार्हि' । ३ प पक्ष । ४ प-'धम्मुले सति ५ प्रभूत

१ एष मार्ग इत वेषा वासचिह्नोरीय धरा ।

वरविक्रम वेदि सर्वेन भवधानि ति ॥ ४ ॥

इति श्रीसोमप्रभसूरिविरचिते सातापत्ससप्ताधसमुच्चये ।

क 'मवीरा' । स्पृह्यमानाच शिवाजितम-स्तूप-कुचमारकीराम-शुभ्रमरतारक-विरम-वारतनयनविरचन-स्मृतरतिमहतिरम शिवाक-श्रीतीर्थकृ्यदीरमताम्र्वरण विरचन-दामदिन-वैरमगमित-धीवसैमिर्गतसकम् ।

एकदा 'लक्षणावत्यां' बौद्धो वर्धनकुञ्जरो धर्मनृपमाह सगद्गदम्— अहं बप्पभट्टिना जितस्तन्मे न दूषणम्। बप्पभट्टिर्हि भारती नररूपा, प्रज्ञामयः पिण्डः, गीष्पुत्रः, न च दुनोति। एतत् तु दुनोति यत् तव भृत्येनापि वाक्पतिराजेन सूरिकृतभेदान्मम मुखशौचोपायेन गुटीं हारयामहे। एतावदभिधाय स तारं तारं रुरोद। स निवारितः क्ष्मापेन रोदनात्। उक्तश्च—किं क्रियते? । अयं नश्चिरसेवकोऽनेकसमराङ्गणलब्धजयप्रतिष्ठः प्रबन्धकविः पराभवितुं न रोचते। क्षमस्वेदमन्यायम्। ततो बौद्धो जोषं स्थितः। अपरेद्युर्यशोधर्मनाम्ना समीपदेशस्थेन बलवता भूपेन 'लक्षणावती'मेत्य रणे धर्मनृपो व्यापादितः। राज्यं जगृहे। वाक्पतिरपि बन्दीकृतः। तेन कारास्थेन 'गौडवध'-सञ्ज्ञकं प्राकृतं महाकाव्यं रचयित्वा यशोधर्माय राजेन्द्राय दर्शितम्। तेन गुणविशेषविदा ससत्कारं बन्देर्मुक्तः क्षमितश्च। "विद्वान् सर्वत्र पूज्यते"। ततो वाक्पतिर्बप्पभट्टेः समीपं गतः। द्वयोस्तयोर्मैत्री पूर्वमप्यासीत्, इदानीं विशेषतोऽवृधत्। तेन वाक्पतिना 'महामहविजया'ख्यं प्राकृतं महाकाव्यं बद्धम्। आमाय दर्शितम्। आमो हेमटङ्कलक्षमस्मै व्यशिश्रणत्।

कियती पञ्च सहस्री, कियती लक्षा च कोटिरपि? ।
औदार्योन्नतमनसां, रत्नवती वसुमती कियती? ॥ १ ॥[5]

अपरेद्युः प्रभुः श्रीआमेन पृष्टः— भगवन्! यूयं तावत् तपसा विद्यया च लोके लब्धपरमरेखाः। किमन्यः कोऽपि क्वाप्यस्ति यो भवत्तुलालेशमवाप्नोति? । बप्पभट्टिरभाणीत्—अवनिपते! मम गुरुबान्धवौ गोविन्दाचार्य-नन्नसूरी सर्वैर्गुणैर्मदधिकौ 'गूर्जर'-धरायां 'मोढेरक'पुरे स्तः। गुणोत्कण्ठयाऽमितसैन्य आमस्तत्र गतः।

१ ख-'हसरेणु०'। २ ग-'राज्ञे'। ३ घ-'महमहवि०'। ४ न चेदं मे दृष्टिपथमागतम्। ५ आर्या।

तथा नगरपरिसरस्थितमानेऽन्तरापातात् वात्स्यायनाख्यान् कामशास्त्रज्ञान् पण्डितानाकारीत् । राजा पूर्वं तत् सर्वम् । अकथितस्यया । अहो मम स्वामिनोऽपि मैतान् मानाम् विद्याः; अथ तु वेत्ति सम्यक्; तस्मादयमस्य नित्यं योगिराजो [illegible] किमस्य प्रणामेन ! । [illegible] शिरेवोत्पातमस्तु 'गोपगिरि'नामात् । चिराद् एव स्वाप इति रक्तरक्तकल्पस्तस्याः प्रथमो व्यापपितुमैवक । राजा निराकरो न वन्दते तदा । एव दिनानि कतिपयानि गतानि ।

एकदा गुरुभिः पप्रच्छे— राजन्! यथा पुरा भक्तोऽभूस्तथेदानीं भक्तो नास्ति । किमस्माकं दोषः कोऽपि ! । राजा स्माह—सुरिवर ! महात्मा अपि कुपात्रकार्यं कुर्वते निःशुल्कं ! । [illegible]कथम् ! । आमः प्राह—यौ भवति त्वौ गुरुभ्रातरौ स्तुतौ तत्र गत्वा एको नयसूरिनामा तव शृङ्गारकथाम्भावनाकल्पतरूपोऽपि [illegible] अभ्यासति नमयति च मनाम्बुधः । तस्मात् [illegible] । सूरयो मनसि मार्दवमयत्नाः [illegible] । तत्रोप निज तौ साधू मोढेरकपुरं प्रहिणी । तत्पार्श्वात् तत्र कथापितम्—आमराजस्य प्रणामो गतात्पार्श्वसागत । यवमेव पुनः निम्बति । तत् कर्तव्यं येनासौ मयस्त्वाम्येष्वपि सभ्येषु वस्त्राभरणान् न मन्यति । सर्व तस्य श्रुत्वा तौ द्वावपि गुरिवस्य पर्यन्तरपरतर्के कृत्वा नटवेषधरौ गोपगिरि'मीयतुः । श्रीदुःशमनश्चरितं नाटकत्वेन वनन्दतु । नयत् शिक्षयामासतुः । आमराजमन्तरं यथास्तु । राजाऽऽसरो दत्त । मितिना सामाजिका तत्त्वसमानका । ताभ्यां नाटकं दर्शयितुमारेभे । भरत वाहुबलिसमरायसरोऽभिनीयते । यत्र वज्रकरणा-दीक्षारणरम्भारणपरिवर्णना-महाकोपा-दयात्मापनपर्यारिवर-वाक्यरचनादीनि ताभ्यां वर्णयितुमारम्भाप् बाहुबलेश्च रसोऽनातारीत् तथा [illegible] 'घातिम्नी'

[illegible]

[illegible]

प्रवाहस्यामदीर्घानसीनाकृष्योत्थिता हंत हत इति भाषन्ते स्म। अत्रान्तरे नन्नसूरि-गोविन्दाचार्यौ स्वरूपमुद्रे प्रकाश्याहतु – राजन्! राजन्! भटा! भटा! शृणुत शृणुत कथायुधमिदम्, न तु साक्षात्। अलं सम्भ्रमेण। इत्युक्त्वा लज्जिता विस्मिताश्च ते राजाद्या सधूत्याकारमस्थु। तदा गोविन्दाचार्य-नन्नसूरिभ्यां भूपोऽभाणि– किल शृङ्गारानुभाविनो वयमिति न सम्यग् व्याख्यातु विभ, किमु समराजिरमपि भवद्भटप्रविष्टा स्म? कुरङ्गा इव शस्त्रे दृष्टेऽपि त्रिसिम। आबाल्याद् गृहीतव्रता पापभीरव स्म, पर भारतीप्रभावप्रभव-वचनशक्त्या रसान् सर्वान् जीवद्रूपानिव दर्शयाम। राजन्! 'मोढेरके' यैस्ते वात्स्यायनभावा व्याख्यातास्ते वय नन्नसूरय इमे च गोविन्दाचार्या। भवता तदा मृषा विकल्प समजनि। राजा सद्यो लल्जे। तौ सूरी क्षमयामास आनर्च्च बप्पभट्टिं च। तौ कतिचिद् दिनानि उपराज स्थित्वा बप्पभट्टेरनुज्ञया पुन'मोढेर'-पुरमगाताम्। गत समय क्रियानपि।

अन्यदा गाथकवृन्दमागतम्। तन्मध्ये बालिकैका तमालनीलो-त्पललोचना मृगाङ्कमुखी किन्नरस्वरा विदुषी गायति। तां दृष्ट्वा मदनशरज्वरजर्जरो गलितविवेको गतप्रायशौचधर्माभिनिवेश 'कन्य-कुब्जे'श. पद्यद्वय प्रभुप्रत्यक्षमपाठीत्—

वक्त्र पूर्णशशी सुधाधरलता दन्ता मणिश्रेणय
कान्ति. श्रीर्गमन गज परिमलस्ते पारिजातद्रुमा।
वाणी कामदुघा कटाक्षलहरी सा कालकूटच्छटा
तत् किं चन्द्रमुखि! त्वदर्थममरैरामन्थि दुग्धोदधि? ॥१॥

जन्मस्थान न खलु विमल वर्णनीयो न वर्णो
दूरे शोभा वपुषि निहिता पङ्कशङ्का तनोति।

१ घ–'हनहनति'। २ ग–'कथायुद्धमिद'। ३ क–'प्रविष्टा'। ४ क–ख–'निम्बा'। ५ ख–घ–'तमालनीलो०'। ६ ग–'मदनज्वर०'। ७ शार्दूल०।

विश्वार्त्याः सकलसुरमिर्दिष्यकर्पापहारी
नो वागीशः परिमितगुणः कस्तु कस्तुरिर्वचना ॥२॥

सूरिभिर्विभावितम्—अहो महत्वमपि कौतुकं मतिविपर्यासः ! ।

मया भावन सूरिरनुविषिकस्तवमकलसेविनी
सा संस्कृतरागी अपार्थमधुरां कामामुपैति स्तुतिम् ।
अन्यास्तत्वरतोर्मिर्वीक्तमतयोऽप्येता नु काव्याधिपा
क्लिश्यन्ति स्तुत्ये नमन्ति च गुरु कस्याम पुरुमर्त्य ! ॥३॥

समर्पिता सभा । विभिर्विनैर्मर्षेन पूर्वोहि सीव कारितम्, मातङ्गी-सहितोऽत्र अस्यामीति विया । तत्पश्चात् श्रीभद्रमहिसूरिभिः । ध्यानप्रसादा हि तयां अगमत्तवम् । तथो माऽधौ मेरवं वासीरिवि स्पथा तैर्मिथ्यानामसूत्रमारपह लिपि वाणिरूपा बोधक्षमि पचानि लिखितानि । यथा—

शैत्यं नाम गुणस्तवैव तदनु स्वाभाविकी स्वच्छता
किं ब्रूम शुचितां भजन्त्यशुचयस्त्वत्सङ्गतोऽन्ये यत ।
किञ्चात परमस्ति ते स्तुतिपदं त्वं जीवितं देहिनां
त्वं चेन्नीचपथेन गच्छसि पयः ! कस्त्वां निरोद्धुं क्षमः ! ॥१॥

स्मतुपत्यग्गुमपर्मव्यार्पिकान्त—
कान्तापनस्तनतटोचितचारुमूर्ते ! ।
का पामरीकटिनकम्पविकसमाप्त !
हा हार ! हारितमहो भवता गुणित्वम् ॥२॥

जीवं अवणितुरार्थं सपत्तीओ तरंगकोल्लम्बो ।
इसिमयसर्मं च पिम्म जं जाणसि तं करिज्जासि ॥३॥

---

२ भवान् । २ अमत । ३ कारीक । ४ क—माशीवर । ५ क—भरक्यता । ६ प 'विपाक्ता' । कार्तुर । कम्प ।
६ छाया—जीवित अर्जितुरार्थं अन्यपत्तादवीश्च ।
स्वासह च प्रेम मन्यालपति तत् कुर्याः । ७ आर्या ।

[1]लज्जिज्जइ जेण जणे, मइलिज्जइ निअकुलक्कमो जेण ।
कण्ठट्ठिए वि जीए, त न कुलीणेहिं कायव्व ॥४॥[2]

प्रातरमूनि पद्यानि स्वयमामो ददर्श । वर्णान् कवित्वगतिं च उपलक्षयामास । अहो गुरूणा मयि कृपा ! । अहोतमा मम पापाभिमुखता इति ललज्जे । दध्यौ च–साङ्कल्पिकमिद [3]मातङ्गीसङ्गमपाप मयाऽऽचरितम् । मारितोऽह क्व यामि ? किं करोमि ? कथ गुरोर्मुख दर्शयामि ? किं तप समाचरामि ? किं तीर्थं सेवे ? । ऊर्ध्वं मुख गृहीत्वा गच्छामि ? । कूपे पतामि ? । शस्त्रेणात्मान घातयामि ? । अथवा ज्ञातम्–सर्वजनसमक्ष पापमुदीर्य काष्ठानि भक्षयामि । एव [4]टलवलायमानोऽनुचरानादिदेश– अग्निं प्रगुणयत । प्रगुणितस्तैरग्नि । समागता श्रीबप्पभट्टिसूरय । मेलित चातुर्वर्ण्यम् । उक्त तदघम् । यावत् [5]सहसा [6]कृशानु प्रवेक्ष्यति आमस्तावत् सूरिभिर्बाहौ धृत्वोक्त राजन् ! शुद्धोऽसि । मा स्म खिद्यथा । त्वया हि सङ्कल्पमात्रेण तत् पाप कृत, न साक्षात्, सङ्कल्पेनाग्निमपि प्रविष्टोऽसि । चिर धर्मं कुरु ।

मनसा मानस कर्म, वचसा वाचिक तथा ।
कायेन कायिक कर्म निस्तरन्ति मनीषिण ॥१॥[7]

इति वचनाद् विसृष्टोऽग्नि । जीवितो राजा । तुष्टो लोक । प्रीत सूरि ।

समयान्तरे वाक्पतिराजो 'मथुरां' ययौ । तत्र श्रीपादस्त्रिदण्डी जज्ञे सः । तल्लोकादवगम्य आम सूरीन् बभाषे– भवद्भिरहमपि श्रावक कृत । दिव्या वाणी च प्रसन्नैव । जानामि च शक्तिपरमरेखा यदि वाक्पतिमप्यार्हतदीक्षा ग्राहयथ । आचार्येन्द्रै[8]

१ छाया—लज्ज्यते येन जने मलिनीक्रियते निजकुलक्रमो येन ।
कण्ठस्थितेऽपि जीवे तत् न कुलीनै कर्तव्यम् ॥ २ आर्या ।
३ चाण्डाली० । ४ 'टळवळतो' इति भाषायाम् । ५ ग–'सहसाऽग्नि' । ६ अग्निम् ।
७ अनुष्टुप् । ८ ग–'आचार्यै' ।

प्रतिज्ञा चक्रे – तदा शिष्या मे प्रमाणं यदि वाक्पतिं स्वशिष्यं चेतावन्तं कुर्वे । वाक्पतिरेव क्वास्ति इति उपलभाम् । राज्ञोक्तम् – मथुरायां तिष्ठते । सूरयो 'मथुरा'यां गता मधुमि श्रीरामामन्दिरे सह । 'वराहमन्दिरा'ख्ये प्रासादे ध्यानस्थं वाक्पतिं गत्वाऽऽशु । तन्नुत्यै सूरिभिस्तत्तत्स्तोत्रेण आसीर्वादः पठितुमारब्धा —

सन्ध्यां यत् प्रणिपत्य लोकपुरतो बद्धाञ्जलिर्याचसे
धत्से यच्च परां विलज्ज ! शिरसा तच्चापि सोढं मया ।
श्रीर्जाताऽमृतमन्थनाद् यदि हरेः कस्माद् विष भक्षितं
मा स्त्रीलम्पट ! मां स्पृशेत्यभिहितो गौर्या हरः पातु वः ॥१॥
एकं ध्यानविमीलनान्मुकुलितं चक्षुर्द्वितीयं पुनः
पार्वत्या विपुले नितम्बफलके शृङ्गारभारालसम् ।
अन्यद् दूरविकृष्टचापमदनक्रोधानलेनोद्दीपितं
शम्भोर्भिन्नरसं समाधिसमये नेत्रत्रयं पातु वः ॥२॥
रामा नाम बभूव तु तदवचः सीतेति तां पितु-
र्वाचा 'पञ्चवटी'वने विचरतस्तस्याहरद् रावणः ।
निद्रार्थं जननीकथामिति हरेर्हुंकारिणः शृण्वतः
पूर्वस्मर्तुरवन्तु कोपकुटिला भ्रूभङ्गुरा दृष्टयः ॥३॥
दधिमथनविधौ रतमन्मथरणरती पाणिनैकेन रुद्धा
कृत्वा वाम्येन वासो विगलितकबरीभारमंसे वहन्त्या ।
सद्यस्तत्कायकम्पग्लपितपृथुलकुचतश्रीतिना ह्रीरि(श्री)रिवा च
वाञ्छापर्याप्तिभूप वीक्ष्य मधुरमसृणं सस्मितं तस्या पुनातु ॥४॥

एवं चतुः पेठे । अथ वाक्पतिर्ध्यानं विसृज्य सम्मुखीभूय सूरिभ्यः – हे बप्पभट्टिमिश्रा ! यूयं किमस्मत्पुरतः शृङ्गारगर्भाणि पद्यानि पठथ ? । बप्पभट्टिः प्राह – भवन्तः शास्त्रज्ञा ।

१ ग–'भर्ता' । २ ख 'कन्तो' ३ यामं । ४ वा(रि ५ ग–'पुनः प्रीतिवा विपुल्या ६ कामाय ।

साङ्ख्या निरीश्वराः केचित्, केचिदीश्वरदेवताः ।
सर्वेषामपि तेषां स्यात्, तत्त्वानां पञ्चविंशतिः ॥१॥'

इति गाथां सदस्मिन्नदेवागारेऽपि पठन्ति स्म । यथार्थाऽपि हि श्रोतुः पुरः पठनीयं समर्थ्यते । वाक्पतिराह— यद्यप्येवं तथापि मुमुक्षवो वयमासन्ननिधनं ज्ञात्वा इह पवित्रे स्थातुमायाताः स्म । बप्पभट्टयो जगदुः— किं नाहं रुद्रादयो मुक्तिदातारो न भवन्तीति मनुषे? । वाक्पतिः प्राह— एवं सम्भाव्यते । बप्पभट्टयो बभाषिरे— तर्हि यो मुक्तिदानक्षमस्तं शृणु । पठामि । स जिन एव ।

"मदेन मानेन मनोभवेन, क्रोधेन लोभेन ससम्मदेन ।
पराजितानां प्रसभं सुराणां, वृथैव साम्राज्यरुजा परेषाम्"॥१॥'

'जं दिट्ठी करुणातरंगियपुडा एयस्स सोमं मुहं
आयारो पसमायरो परियरो संतो पसन्ना तणू ।
तं मन्ने जरजम्ममच्चुहरणो देवाहिदेवो जिणो
देवाणं अवराण दीसइ जओ नेयं सरूवं जए ॥२॥'

इत्यादि बहु पेठे । वाक्पतिः प्राह— स जिनः क्वास्ते? । सूरिः— स्वरूपतो मुक्तौ, मूर्तितस्तु जिनायतने । वाक्पतिर्ब्रूते— प्रभो! दर्शय तम् । प्रभुरपि आमनरेन्द्रकारिते प्रासादे तं निनाय । स्वयं प्रतिष्ठितवरं श्रीपार्श्वनाथमदीदृशत् । शान्तं कान्तं निरञ्जनं रूपं दृष्ट्वा प्रबुद्धो ब्रुवाणः— अयं निरञ्जनो देव आकारेणैव लक्ष्यते । तदा बप्पभट्टिसूरिभिर्देवगुरुधर्मतत्त्वान्युक्तानि । रञ्जितः सः । मिथ्यात्ववेषमुत्सृज्य जैन ऋषिः श्वेताम्बरोऽभूत् । जिनमवन्दिष्ट अपाठीच्च—

---

१ अनुष्टुप् । २ कलिकालसर्वज्ञश्रीहेमचन्द्रसूरिविरचितायामयोगव्यवच्छेदिकायां पञ्चविंशतितमं पद्यमिदम् । ३ उपजातिः । ४ छायार्थिना प्रेक्ष्यतां द्वासप्ततमं पृष्ठम् । ५ ग च– 'दन्तो' । ६ शार्दूल० । ७ ख–'दगाये' ।

मेघमालाविहुरविए-णं हमिणा किंकरफलं जयवरेण ।
इच्छामि कर्त्तं जिणवर ! पणाम किंण कयुसिर्य कर्ड ! ॥१॥
ऐ रे मि गिरिए ता घणम्ब वर्त्तं का गिर कम्प निपत मणीअं ?
सारंभे सारंभ पुग्गर कस्तु करमण किम(अ) गुन(ना)र ॥२॥

वरपासस आयुनि मथुरा चातुर्मास्यम् आमर्षनाथविचवस्य न मत्पार्श्वं वाक्यत्यापपरस्तानामि कायिना । समरकर पञ्चपरमेष्ठि-मयं मानित । जीवतु क्षेममणी कारितो वाक्पतिः सुखेन स्वच्छन्दुर्दिवमगमत् । तत् सर्वं प्रभावैरन्यैरपि प्रथमं ज्ञापिता नृपः । पश्चात् बप्पभट्टि रैवतगिरिं गतः । राजा गुरुस्तुते सूरिराम-

आलोकमात्र सम्येन भूर्यस्तौ भारसूदयः ।
करुणानेन तु माव-बालकर्माणि कर्मठ ॥१॥

एकदा राज्ञा सूरिः पृष्टः—किं कारणं येनाहं शास्त्रैमत्तोऽपि अन्तराऽन्तरा तापसधर्मे रतिं बध्नामि ? । सूरिराह— प्राग्भवस्वामः । प्रागुपमाना मोतु —राजन् ! अस्माभिर्मारवीनचाडा तव प्राग्भवा ज्ञात । तं कालिञ्जर गिरेस्तीरे वासनाम्न तपस्वी शालगुमा-घोमाणे द्रुपनायाम्मरिक्षमोदकस्त्वपा बहूनि वर्षाम्यतपस्य । स मृत्वा त्वमु गमः । तस्यातीर्णोर्णा जटास्तथैव कान्तारिता अंतापि सन्ति । तदाकर्ण्य आसनगमनाय राजा प्रहिताः । तैर्बद्ध्वा आनीता । सूरिवाक्यसत्यतो दृढ । भूपतिः सूरीणां पदोर्निकस्य तस्थौ । परं मार्हतो बभूव ।

१ क-'रवाय' ख ग- 'मेवमाए'
२ छाया— मेघमालाविधुरविरहिणेन हि किंकरफलं जयवरेण ।
इच्छामि जिनवर प्रणाम किं कल्पितं कर्तुम् ? ॥
३ छाया—हसति गुरुत्वी वीर्यं कीड नमता च किम वनन विनिर्ति वचिर ? ।
सारम्भः सारम्भ पुण्यानि कर्तुं कर्णोय किंतु हुन्मति ? ॥
४ एतत्पर्यन्तम् गगनस्थ- ५ ख 'मचदेवं' । ग तूर ।
ख-ग—'सत्यवां' कामुष् । ६ ग-'जय हवेन । ७ ग-अमनयसिन । ११ ग—'आनीता ।

अन्यदा सौधोपरितलस्थेन आमेन क्वापि गृहे भिक्षार्थं प्रविष्टो मुनिर्दृष्टः । तत्र युवतिरेका कामार्ता गृहागतं मुनिं पञ्चत्रैकचित्तं रिरमयिषुः कपाटसम्पुटं ददौ । मुनिर्नेच्छति ताम् । तया मुनये पादतलप्रहारे दीयमाने नूपुरं मुनिवरचरणे प्रविष्टं 'काकतालीय' न्यायेन 'अन्वर्तकी'न्यायाच्च । राजा तद्[1] दृष्ट्वा सूरये समस्यां ददौ—

[2]कवाडमासज्ज वरगणाए अब्भत्थिओ[3] जुव्वणगव्वियाए ।

सूरिः प्राह—

[4]न मन्निय तेण जिइंदिएण सनेउरो पव्वइअस्स पाओ ॥१॥[5]

[6]अन्यदिने प्रोषितभर्तृकाया गृहे भिक्षुः कश्चिद् भिक्षार्थी प्रविष्टः । राज्ञा सौधाग्रस्थेन दृष्टः । तया भिक्षोः पारणायान्नमानीतम् । उपरि काकैर्भक्षितम् । भिक्षुकस्य दृष्टिस्तस्या नाभौ [7]स्थिता । तस्यास्तु दृष्टिस्तन्मुखकमले । आमः सूरये समस्यामार्पिपत् । यथा—

[8]भिक्खयरो पिच्छइ नाभिमंडलं सा वि तस्स मुहकमलं ।

सूरिराह—

[9]दुण्ह पि कवालं चडुयं पि काया विलुंपंति ॥२॥[10]

इति आमः श्रुत्वा चमत्कृतः । अहो सर्वज्ञपुत्रा एते ! ।

अन्यदा कोऽपि चित्रकृद् भूपरूपं लिखित्वा उपभूपं गतः । बप्पभट्टिना श्लाघिता तत्कला । नृपात् तेन टङ्ककलक्षं लेभे ।

---

१ च-'तम्' ।

२ छाया—कपाटमासाद्य वराङ्गनयाऽभ्यर्थितो यौवनगर्वितया ।

३ ग-'अब्भुत्थिओ' ।

४ छाया—न मतं तेन जितेन्द्रियेण सनूपुरः प्रव्रजितस्य पादः ॥

५ उपजाति । ६ ग-'अन्यदा' । ७ ग-'पतिता' ।

८-९ छाया—भिक्षाचरः पश्यति नाभिमण्डलं साऽपि तस्य मुखकमलम् ।
द्वयोरपि कपालं चाटुकमपि काका विलुम्पयन्ति ॥ १० आर्या ।

चैत्यचतुष्टयं च कारितम्— एकं 'मथुरा'याम्, एकं 'मोढेरकसंज्ञके पा'मणाहिलपुरे एकं गोपगिरौ ए(५) कं सतारपुर'पुरे । तत्र तत्र प्रतिष्ठाः प्रमाणमाश्च कारिताः । श्रम्परपि बहूनकारि ।

अथ आमगृहे पुत्रो जातः दुन्दुकः । सोऽपि उत्सवेन तस्य दुन्दुक इति नाम प्रतिष्ठितम् । सोऽपि कुमारो तैलर्गुणैः पितृवत् पप्रथे । एकदा समुद्रसेननृपाधिष्ठितं 'राजगिरि'नामदुर्गं आमो रुरोध । बलिष्ठे सैन्ये कुमारादिसामग्री मैरवबद्धमे प्रत्यमेदाः कल्पिताः । प्राकारोऽपि चैकेन मपातयितुमारेभे । मापतद् । आमः खिन्नः । तेन सूरयः पृष्टाः— कथमपि प्राकार करोऽस्मागमिष्यति ? । सूरिभिरभ्यधे— तव पुत्रपुत्रो भोज नामाऽयं प्राकार दृष्टिपातमात्रेण पातयिष्यति नान्यो नैव । आम-स्तमारभ्य प्राकाराद् बहिरविनाभ्युपगमात् । न कुत्रापि प्रयाति । दुन्दुकगृहे पुत्रो जातः । तस्य 'भोज'नाम दत्तं । सप्तसमाः पर्यन्तकम्बलस्थो दुर्गद्वाराग्रमानीतः प्रयत्नेन । तद्दृष्टिपातमात्रेण प्राकारः खण्डशो विशीर्णः । समुद्रसेननृपो धर्मद्वारे निःसृतः । आमो 'राजगिरि'मग्रहीत् । प्रजाभारो न कृतः । सपुत्रा हि सैवा मदर्पणं राजर्षयस्य वचापरास्ते । राजौ आमाय राजर्षिं विज्ञप्तं स्वमितम्— राजन् ! यदि त्वमत्र त्वास्यसि तदा तव लोकं हनिष्यामि । आमः प्राप्तः— कोऽसि त्वं किं ते स्वरूपम् ! । यदि हनिष्यसि तदा मामेव जातम् । एतद्विमृश्य आमः चन्द्र तुष्टो जल्पन् उवाच— प्रीतोऽस्मि ते सत्येन वरं वृणु किंचित् । राज्ञोक्ते — न किमपि न्यूनं मे केवलं तदा मे मृत्युं सूचितम् । आमोऽवोचत् उवाच— षण्मासावधौ आयुषि त्वमेव गतासि ।

---

१ 'सतारपुरे' । २ क ख-ग 'मुद्रा' । ३ ग—'दृष्टिनिर्विणे' । ४ क-'पातयिष्यति । ५ ख—'धर्मद्वारेण' ।

षण्मासावशेषे आयुषि पुनरागत स । राज्ञोक्तम्— कियन्मे आयुरिति[1] । व्यन्तरो वदति— देव !

'गङ्गा'ऽन्त'र्मगधे'[2] तीर्थे, नावाऽवतरत सत ।
मकाराद्यक्षरग्रामोप—कण्ठे मृत्युरस्ति ते ॥१॥[3]

षण्मासान्ते इति विद्या । पानीयान्निर्गच्छन्त धूम यदा द्रक्ष्यसि तदा मृत्युर्ज्ञातव्य । साधना च कार्या पारलौकिकी । इति गदित्वा गतो देवजातीय । राजा प्रात सूरिपार्श्वं गत । सूरिरुवाच— राजन् ! यद् व्यन्तरेण वोऽग्रे कथित आयु[4] प्रमाण तत् तथैव । धर्मपाथेय गृह्णीया । तदाकर्ण्य भूपस्तुतोष विसिष्मिये च । अहो ज्ञानम् ! अथवा विस्मय एव क ? । सूरस्तेजस्वी, इन्दुराल्हादक , 'गङ्गा'ऽम्भ पावनम्, जैना ज्ञानिन इति । दिनद्वये गते सूरि श्रीआमस्य पुर प्रसङ्गेन श्रीनेमिनाथस्याशीर्वाद पपाठ । यथा—

लावण्यामृतसारसारणिसमा सा 'भोज'भू स्नेहला
सा लक्ष्मी स नवोद्गमस्तरुणिमा सा 'द्वारिका' तद् बलम् ।
ते गोविन्द-शिवा-समुद्रविजयप्राया [5]प्रियाप्रेरका
यो जीवेषु कृपानिधिर्व्यधित नोद्वाह स नेमि श्रिये ॥२॥[6]

भूयोऽपि—

मग्ने कुटुम्बजम्बाले, यैर्मिथ्याकार्यजर्जरै[7] ।
'नोज्जयन्ते' नतो नेमि—स्ते चेज्जीवन्ति के मृता ? ॥२॥[8]

तथा 'रैवतक'तीर्थमहिमा सूरिभिर्व्याख्याय पल्लवित । यथा भूमिमाहत्योत्थाय परिकर बद्ध्वा सरभस भूपः प्रतिशुश्राव—'रैवतके' नेमिमवन्दित्वा मया न भोक्तव्यमिति । लोकैर्निषिद्ध — राजन् ! मा, मा, दूरे 'रैवतिको' गिरि , मृदवो भवादृशा ।

---

१ घ-'आयु'। २ क-'मगधं'। ३ अनुष्टुप्। ४ ग-'आयुष्प्रमाण'। ५ ख-'प्रिया प्रेरका'। ६ शार्दूल०। ७ घ-'काम०'। ८ अनुष्टुप्।

राजाऽऽह— प्रतिष्ठाने मे न चलति । तत्र सह सूरिणा आमो हयानेक पृष्ठचारा भूरभा करभसहस्र २ हस्तिशत ७ अथवाश्व-मेक पदाति[illegible] भावपुद्गलसहस्र २ सारसैन्यैर्युक्तिप्र-यातः रैवतक[illegible]मित्यादि । 'स्तम्भन'तीर्थं यावत् गतः । तत्र क्षुधापरेण व्याकुलितोऽपि प्राणसन्देह प्राप्तोऽपि नाहारमग्रहीत् । मौनी स्थितः । किन्तु सूरिः मन्त्रस्तव्या कूष्माण्डीदेवी समाहूतेत्यादि । उवाच वप्पाभट्टिं— तत् कुरु येन राजा जेमति जीव-ति च । तद्वचनात् कूष्माण्डी बिम्बमेकं महाप्रभावं निवर्त्य गगने च आमसमीपे गत्वा कथेयं च— वत्स ! साम्प्रतमिदम् । तत्र सत्येन तुष्टा । गगने बापभट्टी मां तं साक्षाद्दर्शी । मन्येऽहं रैवत'कस्य[illegible]पि[illegible]मिदम् । इह वन्दस्व । अस्मिन् वन्दिते मन्त्रोभिर्वन्दित एव । कुरु पारणकम् । सूरिभिरपि तत् समर्थितम् । लोकमापि स्वामिनम् । तद् बिम्बं वन्दित्वा राजा भक्तमकरोत् । अथापि तत् बिम्बं 'स्तम्भ'तीर्थे पूज्यते । 'उज्जयन्त' इति प्रसिद्धं तत् तीर्थम् । तथा तानि ध्यान-मग्नानि भिन्नगिरी तृप्तमन्ता सोत्सवं वन्दित्वा मनः रैवत'गिरि गतः यावत् तत् तीर्थं दिगम्बरैः रुद्धम्, श्वेताम्बरदर्शनः प्रवेष्टुं न लभ्यते । आमेन तन्मतम् । सर्वोक्तं— युद्धं कृत्वा निष्कासयामि सर्वान् । तावत् तत्र दिगम्बरपक्षे एकादश राजानो मिलिताः । सर्वे युद्धेच्छवः । तदा बप्पभट्टिना भणितं आमाय— रे मित्र ! धर्मकार्ये प्राणसन्देहः कथं क्रियते ? । वादेनैव तीर्थमिदमस्मदायत्तीभवति । भवद्भिः स्थिरं स्थेयम् । एवं युक्तं प्रोक्त्वा बप्पभट्टिरपरिग्रहनृपैः सह आमं नृपं च गतैः प्रतिकृतमापत्— इदं तीर्थं यस्याऽभिमतं स्यात् तस्य पक्षस्य सत्यमिति मन्यते । तेऽ-

---

१ घ 'आमः स सैन्येन रैवतकं' । २ 'अत्र इति नास्ति' । ३ क-ख-ग-'कार्यालयम्' ४ ग 'नामान' ५ घ 'कृत्वा मेदिनीं' । ६ घ 'पञ्च' । ७ घ 'सहस्रयुगं'

क्रम्—युक्तमेतत् । ततो बप्पभट्टिना 'सुराष्ट्र'वास्तव्यानां श्वेताम्बरीयाणां दिगम्बरीयाणां च श्रावकाणां शतशः कन्यकाः पञ्चसप्तवार्षिक्यो [1]मेलिताः । मिलिताः सभ्याः । बप्पभट्टिना अम्बादेवीपार्श्वात् कथापितम्— यदि सर्वा [2]श्वेताम्बरश्रावककन्यका —

[3]"'उज्जिन्त'सेलसिहरे दिक्खा नाणं निसी(सी?)हिया जस्स ।
तं धम्मचक्कवट्टिं अरिट्ठनेमिं नमसामि"॥१॥[4]

इति गाथां पठिष्यन्ति तदा श्वेताम्बरीयं तीर्थम्, पक्षान्तरे तु दिगम्बरीयं तीर्थमिति । तत आनीता मुग्धबालिका । सर्वाभिः श्वेताम्बरपक्षश्रावकबालिकाभिः पठिता सा गाथा । अपराभिस्तु नैकयाऽपि । ततो जातं श्वेताम्बरसाद् 'रैवत'तीर्थम् । अम्बिकया च स्वयं पुष्पवृष्टिः श्वेताम्बरेषु कृता । ततो [5]नष्टा दिक्पटा 'महाराष्ट्र'दिदक्षिणदेशानगमन् । राज्ञाऽन्यैरपि सर्वसङ्घैश्चिरात् तत्र मिलितैर्नेमिर्नेमे । वित्तं ददे । 'प्रभासे' चन्द्रप्रभः प्रणेमे । बन्दिमोक्षः सर्वत्रापि कारितः । आमस्य भुक्तौ 'गूर्जर'दिदेशास्तदा तीर्थानां चिरं पूजोपयोगिनो हट्टाद्या या(?) प्रक्लृप्ताः । एवं कार्याणि कृत्वा ससूरिर्नृपो 'गोपगिरिं' प्राविशत् । सद्धपूजादिमहास्तत्र नवनवाः । [6]प्राप्तप्राये काले दुन्दुको राज्ये प्रतिष्ठितः । आपृष्टः सः । लोकोऽपि क्षमितः । अनृणो देशः कृतः । सह सूरिणा नावाऽऽरूढो [7]'गङ्गा'सरित्तीरे तीर्थे 'मागध' गतः । तत्र जले धूमं दृष्टवान् । तदा सूरीन्द्रमक्षमयत् । संसारमसारं विदन् अनशनमगृह्णात् । समाधिस्थः श्रीविक्रमकालात् अष्टशतवर्षेषु नवत्यधिकेषु व्यतीतेषु भाद्रपदे शुक्लपञ्चम्यां पञ्च परमेष्ठिनः स्मरन् राजा दिवमध्यष्ठात् । सूरयस्तत्त्वज्ञा अपि रुरुदुः । चिरप्रीतिमोहो दुर्जय एव । सैव-

---

१ ख–'मिलिता' । २ 'श्वेताम्बरकन्यका' ।

३ छाया—'उज्जयन्त'शैलशिखरे दीक्षा ज्ञानं निषेधिका यस्य ।
तं धर्मचक्रवर्तिनमरिष्टनेमिं नमस्यामि ॥

४ आर्या । ५ ग–'नष्टा' । ६ ग–प्राप्तकाले । ७ घ–'गङ्गा सह तीरे' ।

करस्तु चक्रन्द—हा शरणागतवज्रपञ्जरकुमार ! हा रामस्याग्रदास्यरूपे ! हा अवरमनस ! हा मत्सभागुप्तयुधिष्ठिर ! हा हेमदानकर्ण ! हा गाजानेग-नभयितः ! हा सूरिशेखरसम्भव ! हा अनुगीतरूपविमलमादित्य ! हा जीविष प्राणशातन ! अस्मान् विहाय क्व गतोऽसि ? । दर्शयस्वाऽस्माकमात्मानम् । मैवं निर्मोमुच । एवं विलपंस्तस्य सूरिभिः प्रतिबोधिता—मो मा सर्वं हैव पापेन ।

कान्ता वा कामधेनु रसकिराकरवन्दनवर्णिनो वा
छिन्ने मन्दारवृक्षे करगुरुमवत गर्जितः कामगुप्रः ।
हाधः कर्पूरकारा बलहरिन्दिरा प्रेमधारिस्वचारा
भाग कुम्भः सुधाया समम्युपर्षेव केलिहरे हस्तोऽस्यम् ॥१॥[1]
तथापि त्वं राजन् मा शोचत्व पुन—
पूर्वाह्णे प्रतिपद्य पङ्कजवनमाशुसार्थे नैशं तमः
कृत्वा चन्द्रमस प्रकाशरहित मिलत्योवर्षे तमसा ।
मध्याह्ने सरितां जलं प्रविसृतिरातीय दीप्तः करै
सायमह रविरस्तमेति विवशः किं नाम लोकं भवेत्[2] ॥२॥
इति श्लोकं निःशोकं कृत्वा राजा सह सूरिमंत्रिभिरिन्द्रम् । सूरिभिर्गुरुक्ता राजा आमन आमश्येनेन आत्मगुरुकलत्रपूर्णानि अभूष्युद्धरन् क्षिप्रमायामयदीयवरनिध्याचारस्तो नमाधाय राजन् । कोऽयं महरसस्य चितुप्पाकः ? । स हि चतुर्वर्णो संसार्य स्त्रायत्तो बभूव । यशोमयेन देहेन जायन्ते जीवभेदास्ते । पुण्यश्च्योः कीर्तिरुपमेति हे भरत्स्पात्मचारिण्यो यद्भवे ।
पुण्यकामस्याय कीर्तेय विचारयत चान्यत् ।
स्वामिना सह पान्येकाः परा तिष्ठति पृष्ठतः ॥१॥
अन्योऽप्येवंविधः कोऽपि जायतु । इत्येवंविधप्रभिर्वाग्मिस्तुनुक

1 क 'मोहितम । २ ख काकवन्त्या' । ३ कम्पका । ४ तृतीयवर्ष्योर्थे । ५ प 'प्रीणन्ते । ६ कर्तृक । ७ मद्दार ।

राज सूरिराजो नि शोकमकार्षीत्[1] । दुन्दुक शनै. शनै परमार्हतोऽभूत् । राजकार्याणि अकार्षीत् । त्रिवर्गं स समसेविष्ट ।

एव वर्तमाने काले एकदा दुन्दुकश्चतुष्पथे गच्छन् कण्टिकां नाम गणिकामुदाररूपां चिद्रूपां युवजनमृगवागुरां मदनमायामयीमार्गेऽद्राक्षीत् । तां शुद्धान्तस्त्रीमकार्षीत् । तया दुन्दुकस्तथा वशीकृतो यथा— यदेव सा वदति तत् सत्यम्, यदेव सा करोति तदेव हितं मनुते । सा तु कार्मणकारिणी वाक्पटु मंत्रं राज्य प्रसते हिमानीव पद्मिनीम्, भोजमातरं पद्मां नाम अन्या अपि गम्भीरल्वयवतीर्विनयवतीर्लावण्यवतीस्तृणाय मनुते ।

एकदा कलाकेलिर्नाम ज्योतिषिको निशि निभृते सेवकलोके दुन्दुकराज विजन दृष्ट्वाऽवादीत्—देव ! वयं भवत्सेवकत्वेन सुखिनः एयाता श्रीनाथ । ततो यथातथ[2] ब्रूमः । अथ ते भोजनामा तनयो भाग्याधिकस्त्वां हत्वा तव राज्ये निवेक्ष्यते । यथार्हं स्वयं कुर्याथा । राजा तदवधार्य वज्राहत इव क्षणं मौनी तस्थौ । ज्योतिषिकं विससर्ज । सा वार्ता भोजजननीसहचर्या दास्यिकया विपुलस्तम्भान्तरितया श्रुता । भोजमात्रे चोक्ता । सा पुत्रमरणाद् बिभाय । राजाऽपि कण्टिकागृहमगात् । साऽपि राजानं सचिन्तमालोक्यालापीत्—देव ! अद्य कथं म्लानवदन ? । राजाऽऽह स्म— किं क्रियते ? । विधि कुपित । पुत्रान्मे मृत्युर्ज्ञानिना दृष्टप्रत्ययशतेन[3] कथित । कण्टिका वदति स्म— का चिन्ता ? । मारय पुत्रम् । सुतमपि निर्दलयन्ति राज्यलुब्धा । सुतो न सुत । सुतरूपेण शत्रुरेव स । तद्वचनाद् दुन्दुकः सुतं जिघांसामास । यावता घातयिष्यति तावता भोजमात्रा पाडलीपुत्रे[4] स्वभ्रातॄणां शूराणां[5] राज्यश्रीस्वयंवरमण्डपानां स्नेहलानां धर्मज्ञानामग्रे प्रच्छन्नलेखेन ज्ञापितम्, यथा— एवमेव भवता भागिनेयो[6] विनक्ष्यति । रुष्टो[7] राजा । आगत्य

१ अशोकवृक्षम् । २ क–'तथ तथ । ३ क–'दृष्टिप्रत्यय०' । ४ ख-ग-'पाडली पुरे' । ५ ख–'शराणां' । ६ ख-घ–'भागिनेय' । ७ घ–'राजा रुष्ट.' ।

एवं गदित्वा गच्छत । रक्षत जीवितम् । मा स्मार्षं भवन्तु सन्तु निम्बुकोऽभूवम् इति । तेऽप्यागच्छन्, कुन्तुकमभवन् । तस्माणि पेण 'भागिनेयं मार्गं गृहीत्वा 'पाटलीपुत्र'मगमम् । तत्र समर्पकम् । केलीकुर्वन् । शालाभ्यासमन्वीतम् । कौशेयमस्त । तस्य पश्चात्तो दिने कतिभिरप्युत्ताऽतीतमति स्म । कस्मिन् कुन्तुकाये कल्पति स्म— देव । पुत्ररूपस्ते मद्गुर्मदोषात्ते गर्जति । मत्स्येष पर्युत्थेय मा कुरु । कनानीय चक्र समस्तरम मन्त्र । राजाऽऽह स्वमेनत् । ततो गम्भुक्तम कुन्तुका मोर्चं क्रमं मातुलपार्श्वेऽन्वगात । ते मोर्चं मार्यन्ति । पुन पुन स्वान् कुन्तुक प्रतिरोधिनि । मोचमाकुला प्राहु— राजन् । मम तव मान पिता न पेयाम एवैतम् । कर्मपात्रमस्ति । कन्योऽपि स्मरणा— गतो रक्षा भणिपि किं पुनरीदृक् भगिनीपुत्र' । बलात्कारं कुर्वे येद् पुत्राय प्रगुणीभूयागत्य । भागिनेयस्तवे चमत्कार दर्शयि ष्यामः । तद् हृतीयमस्याद्य । कुन्तुकः कुपितोऽपि तान् हन्तु न क्षम । मोचोऽपि तै पितृदुःखात् कारिणा चमत्कार उपनिदा मेति । ततो कुन्तुकेन सम्यमद्दिहत्य मार्थित्वा—पूप गत्वा मोर्च पुत्रसम्भुक्तिपापस्य मामयत माम् । अनिच्छन्तोऽपि तस्यैर्मित्रैः सह 'पाटलीपुत्र' येतु । कर्मकर्म सम्प्राप्ते विरूपा विमृष्ट ग्रामरेखा— मोचस्तानन्यम कश्वा भूपसमीपं नेष्यति । कालीपचे वा यथा तथा तमाऽऽनीतोऽपि पिता हन्यते । मातुलद्वयमे राजाऽपि कुन्तो मां हन्ति । तस्मादितो व्याम इतो कुन्तटी इति स्वप्नः मास । समास च मभातुः विषसदृयमवतीर्यते तस्यारम्भस्य कारणम् । इति विमृत्याऽऽत्मसफलपो मार्गिताः— नयसूरि-गोविन्दाचार्यौ

१ म 'रहति' २ ग—ह—'जामेय' । ३ ग—घ 'पक्षपी' । ४ क-ख-अर्वाचीनम्' । ५ 'भीमाख्य' इति मालपकम् ६ ग 'तस्यातुकेमयीध्यावीत्' । ७ ग 'महुपीस्वरतानपम्' । ८ घ—'धाम्मी' । ९ ग 'पाथा' ।

प्रति हिता भवेत । श्रावकेभ्यो मिथ्या दुष्कृत ब्रूयात् । परस्परममत्सरतामाद्रियध्वम् । क्रिया पालयेत । 'आबालवृद्धान् लालयेत । नै वय युष्मदीया , न यूयमस्मदीया , सम्बन्धा कृत्रिमा सर्वे । इति शिक्षयित्वाऽनशनस्था. समतां प्रपन्ना. ।

अर्हतस्त्रिजगद्वन्द्यान्, सिद्धान् विध्वस्तबन्धनान् ।
साधूंश्च जैनधर्मं च, प्रपद्ये शरण त्रिधा ॥१॥'
महाव्रतानि पञ्चैव, षष्ठक रात्रिभोजनम् ।
विराधितानि यत तत्र, मिथ्या दुष्कृतमस्तु मे ॥२॥'

इति ब्रुवाणा आसीना अदीना कालमकार्षु । श्रीबप्पभट्टिसूरीणा श्रीविक्रमादित्यादष्टशतवर्षेषु गतेषु भाद्रपदे शुक्लतृतीयाया रविदिने हस्तार्के जन्म, पञ्चनवत्यधिकेषु गतेषु स्वर्गारोहणम् । तदैव 'मोढेरे' नन्नसूरीणामग्रे भारत्योक्तम्—भवद्गुरव 'ईशान'देवलोक गता' । तत्र बाढ शोक. प्रससार ।

शास्त्रज्ञा सुवचास्विनो बहुजनस्याधारतामागता
सद्वृत्ता स्वपरोपकारनिरता दाक्षिण्यरत्नाकरा ।
सर्वस्याभिमता गुणै परिवृता भूमण्डना सज्जना
धात ! किं न कृतास्त्वया गतधिया कल्पान्तदीर्घायुष ॥१॥'

वृद्धैस्तु प्रबोधो दत्त —

हित्वा जीर्णमय देह, लभते भो पुनर्नवम् ।
कृतपुण्यस्य मर्त्यस्य, मृत्युरेव रसायनम् ॥२॥''

इति । दुन्दुकेन सूरिभि सह प्रहिता ये सैनिकास्ते निवृत्य दुन्दुकपार्श्वं गता । सोऽपि पश्चात्तापानलेन दन्दह्यते स्म । भोजेनाऽपि समातुलेन सूरिशिष्याणामन्येषामपि लोकानां मुखादवगतम्, यथा—सूरय एव मम्रु , तव पार्श्वे नाजग्मु ।मा स्माय-

---

१ ख–'प्रतिहता भवेत् (?) । २ क–'बालवृद्धान्' । ३ क–'नो' । ४-५ अनुष्टुप् ६ पद्यत्व भाषा । ७ ख–'हस्तार्क्षे' । ८ हे भगवन् ! । ९ शार्दूल० । १० ख-ग–'कृत्यपुण्य०' ।११ अनुष्टुप् ।

मस्तकपुरोपसङ्कटे पतित पितुः पार्श्वे गत सन् विधेय इति ज्ञाप्य तम्ः । तदेतदाकर्ण्य भोजस्तथा पीडितो यथा कण्ठगतेनापि न पीयते । पितुरन्तिकं नागमत्सः ।

एकदा पैशुनिकः कोऽपि पूर्णमासराजमार्गे विरेचो 'भक्तिमा मात्राम्बिकमातृणा 'पाटलीपुरे' । तेनाभ्यधाम्– देव ! त्वं कस्यापि कुलदीप । यथा विरेचो सद्गुरार्भुखाद् विवेच्य कन्या 'मातु-ङ्गी' नाम यस्याऽपि मातङ्गिनेन मातुङ्गिन्न हता 'करि हरिमणा अपि कन्यो विचन्ते मामपावां तु का कथा ! ! देव ! गृहाण तास् । भोजेन सा तस्मादाया । प्रयाणिका । सत्ता । भाक्तिके दान-मणाभ्यां भाजन रक्षित । मन्तुणा सर्वे भाजेन विना-शर्थि प्रपञ्च वोषिता । ते ऊचु –करीच व शक्तिस्तस्य मातृव मिरेण मातुङ्गिगामि गृहीत्वाऽस्मभिः सह पितुः समीप गत । पितरं निपात्य राज्य गृहाण । तद् रूप्ये भोजाय । नाक्षिके मुमन्तुङ्गिपतोऽसौ सन् गतः पितुर्हर्षं क्वापितं च— तात ! त्वं पुण्योऽहं पितुः , त्वत्तो मरणं वा राज्यं वा सर्वं रम्य मे । राजा सन्तुष्ट —अहो विनीतसुत । वत्साम्तु । इति विमृश्य आहूते भोजा । पोषितो मन्यमानेन । एवमजनसी 'कन्दिरुद्ध-राजगौ पुन्ह् पुनर् मातुङ्गिनेन यथाम । सम्यगुपिता हि वाम्बका । अपितु कुन्दराम्ये भोजा । तस्मात्तुल आतुर्यं तोषं दधुः । माता पद्मा प्रसवरुद् । कुम्भकेन बैमहरण-प्रासोरातनादिपूलभाव राज-म्पत्र पुनर्मातमात्मान मेनिरे । महाजनो विजीव । वर्णाः सर्वे उन्मेदु । ससारसरोऽभ्योर्यं भोज कमला मेन । दोर्दण्डस् परि पवरत्तनाथ पार्थिवयप । अथ एकदास्या मोढेर'पुरे नवसतुपे विहृति कृत्वा ससामन्तरान् प्रैषीत् । ते गत्वाऽऽतम । विहरिर्दर्शिता

---

१ प–'कोषी' २ 'माती' इति मातास्मन् । ३ प महत्त्वा । ४ प 'अपीत । ५ 'कुन्द-मीर ६ क–'कन्दीरञ्ज प–'कन्दरेण मनोन । क–'पुनरन्यानर्थं ।

तैस्तत्र । याचिता नन्नसूरि-गोविन्दाचार्यपर्षदा— 'इयन्ति श्री-'मोढेरे' परमगुरुश्रीनन्नसूरि-श्रीगोविन्दगणिपादान् समन्तान् 'गोपगिरि'दुर्गात् श्रीआमराजः परमजैनो विज्ञपयति यथा— इह तावत् प्रभावकप्रादिर्भावादि समाचारीनागौसौभाग्यवर्धनमकरध्वजाः क्षिति-पतिमद कुमुदिनाथितदीक्षितयः भारतीधर्मपुत्राः श्रीबप्पभट्टि-सूरयः दिवलोकलोचनलेखान्तरितपुण्यलावण्यतामादधिरे । तत्स्थाने सम्प्रति दीर्घायुषो यूयं स्थ । 'दशविंशतिकाप्रमाणेनात्र पादोऽव-धार्य' । तद् दृष्ट्वा भक्तिरञ्जस्य सूरयः ससङ्घाः सुतरां जहृषुः । सङ्घानुमत्या गोविन्दाचार्यं 'मोढेरके' मुक्त्वा श्रीनन्नसूरयो 'गोप-गिरि'मगमन् । भोजः पादचारेण सम्मुखमायात । गुरोः पादोदकं पपौ । उद्धरन्तृष्णा गिरं शुश्राव । स्थानस्थानमिलित-जनहृदयमदनहर्षोत्सवदाम्भीकिनक्षत्रमितराजपथं पुरं निनाय । सिंहासने निवेशयामास तान् । मङ्गलं चकार । तदाऽऽगमयो वभूव । तद्व्याख्यानामृतं ददर्श । तद्भक्तान् निरवद्यशिक्षाग्रहे । तदुप-देशाज्जिनमण्डिता मेदिनीं विदधे । दुन्दुकस्य तादृग् मरणं स्मृत्वा कुपथेषु न रेमे । 'मथुरा'-'शत्रुञ्जया'दिषु यात्रां चकार । एकादश व्रतानुचचार । पूर्वराजर्षियशांसि उद्दधार । चिरं राज्यं भेजे । इत्येवं 'गोपगिरौ' भोजो धर्मं लालयामास उदियाय च । अन्यैरपि पुण्यपुरन्ध्रेरेवं भाव्यम् ॥

॥ इति [5] श्रीबप्पभट्टिचरित्रम् । ग्रन्थाग्र ६०० ॥



१ ग- 'हेमा०' । २ क-'दशविंशतिप्रमाणेन' । ३ ख 'हरितहार०' । ४ घ- 'यात्राप्रचार' । ५ घ-'भट्टिसूरिचरित्रप्रबन्ध' ।

[१०]

॥ अथ हेमसूरिप्रबन्धः ॥

पूर्णतल्ल'गच्छे श्रीदत्तसूरि प्राग् 'वागड'देशे 'वटपद्र' पुरं गताः । तत्र स्वामी यशोभद्रनामा राणकः ऋद्धिमान् । तत्सौधासन्निक उपाश्रयः आदिष्टः । रात्री चन्द्रप्रभचन्द्रप्रभासाम्यं राणकेन गवाक्षं स्थित्वा उपाश्रयं निरीक्ष्य । अवकस्मादयमार्यो पृष्टम्— के एते ? । अमात्य प्राह— देव ! महामुनयोऽमी निरवद्यमनधारिणः । राणकस्य श्रद्धा बभूव । प्रगे वन्दितुं गतः । देशना । श्रावकत्वं प्रपन्नः । मासकल्पमेकं स्थिताः । परतो गता गुरवः । तावता वर्षाकालः । देवगृहादिधर्मस्थानानि कारयन्नपि समयति राणकः । गतः शरद् । चरित्रेच्छयापि मुक्तुं गतो राणः । तावता मुंवयपि जनान्तिकं पश्यतः । तत्र सर्पिण्येका गर्भभारालसा ज्यावादिभिश्छाद्यमाना वेल्लन्तमन्ता किल्बिलिषय-मन्ना राणेन दृष्टा । दयाधुतः । निरवध । हा हा संसारं, धिग् गृहवासं कस्य कृते पापमिदमाचर्यते ? । राज्यमपि दुष्कार्यं नरकफलम् । तस्मात् सर्वसङ्गपरित्यागः कार्यः । इति ध्यायन् सौधमध्यासीत् । निशि श्रावकत्वमिच्छता रहोऽध्याशीत् मम धर्मगुरवः श्रीदत्तसूरयः क्व विहरन्ति ? । कश्चिदाह— 'डिण्डुआणक' । चिन्तयता सर्वत्र सपरिच्छदस्य । राणकः स्निग्धं परिवारं सार्धं द्वादशमानं सह गृहीत्वा रात्रौ डिण्डुआणकं प्राप । गुरवस्तत्र वन्दिताः । सर्वाराम्याद् भरित । परोपकारिना कर्मिणं तपागच्छ । गुरुभिर्भणितम्— राणक ! चारित्रं विना न छुटन्ति पापेभ्यो जीवाः । राणकेन भणितम्— प्रभो दीक्षा तर्हि दत्त । गुरव औत्सुक्याद् दत्त । राणकेन 'डिण्डुआणकीय'

[illegible] । २ [illegible] । ४ [illegible] । ५ [illegible] इति [illegible] । ५ [illegible] इति [illegible] । ६ 'पूर्वे' इति [illegible] ।

श्रावका समाकारिता, द्वारोऽर्पित । दिव्य प्रासाद कार्यतामिति । तथाऽऽचरित ते । अद्यापि दृश्यते स तत्र । राणकैर्व्रतमात्तम् । नन्द्यामेव षड्विकृतिनियम, एकान्तरोपवासा यावज्जीवम् । तस्य राणयशोभद्रस्य गीतार्थत्वात् सूरिपद जातम्। श्रीयशोभद्रसूरिरिति नाम । तदीयपट्टे प्रद्युम्नसूरिर्ग्रन्थकार । तत्पट्टे श्रीगुणसेनसूरि । श्रीयशोभद्रसूरिपादास्त्रयोपवासा 'रैवते' नेमिनाथदृष्टौ कृतानशना स्वर्लोकमैयरु । गुणसेनसूरिपट्टे श्रीदेवचन्द्रसूरय [२]ठाणांगवृत्ति-शान्तिनाथचरितादिमहाशास्त्रकरणनिर्व्यूढप्रज्ञाप्राग्भाग । ते विहरन्तो '[३]धन्धुक्क'पुर 'गूर्जर'धरा'सुराष्ट्र'सन्धिस्थ गता । तत्र देशनाविस्तर ।

एकदा नेमिनागनामा श्रावक समुत्थाय श्रीदेवचन्द्रसूरीन् जगौ— भगवन्! अय 'मोढ'ज्ञातीयो मद् भगिनीपाहिणिकुक्षिभू ठक्कुरचाचिगनन्दनश्च(श्चा)ङ्गदेवनामा भगवतां देशनां श्रुत्वा प्रबुद्धो दीक्षा याचते । अस्मिंश्च गर्भस्थे मम भगिन्या सहकारतरुः स्वप्ने दृष्ट । स च स्थानान्तरे उप्तस्तत्र महतीं फलस्फातिमायाति स्म । गुरव आहु —स्थानान्तरगतस्यास्य बालस्य महिमा प्रैधिष्यते । महत् पात्रमसौ योग्य सुलक्षणो दीक्षणीय, केवल पित्रोरनुज्ञा ग्राह्या । गतौ [४]मातुल-भागिनेयौ पाहिणि-चाचिगान्तिकम् । उक्ता व्रतवासना । कृतस्ताभ्या प्रतिषेध करुणवचनशतै । चाङ्गदेवो दीक्षा ललौ । स हेमसूरि प्रभु । तेन यथा श्रीसिद्धराजो रञ्जित, व्याकरण कृतम्, वादिनो जितास्तथा च कुमारपालेन सह प्रतिपन्नम्। कुमारपालोऽपि यथा पञ्चाशद्वर्षदेशीयो राज्ये निषण्ण । यथा श्रीहेमसूरयो गुरुत्वेन प्रतिपन्ना । तैरपि यथा देवबोधिः प्रतिपक्ष पराकृत । राजा सम्यक्त्व ग्राहित श्रावक कृत । निर्वीराधन (?) च मुमोच स । तत्

१ क-घ-'भादयम्' । २ जैनानां तृतीयमङ्गम्। ३ क-'धुंधुक्क', ख-धुंधूक०'।
४ घ-'मातुल[ग]भागेयौ' ।

प्रबन्धचिन्तामणितो ज्ञेयम् । किं चर्वितचर्वणेन ? । नवीनास्तु केचन प्रबन्धाः प्रकाश्यन्ते—

कुमारपालेन अमारौ प्रारब्धायां आश्विनशु(सु)दिपक्षे समागते । कण्टेश्वरी-प्रमुखाणां देवानां पूजकैर्नृपो विज्ञप्तः — देव ! सप्तम्यां सप्त शतानि पशवः सप्त महिषाः अष्टम्यां अष्ट महिषा अष्टौ शतानि पशवः नवम्यां तु नव शतानि पशवो नव महिषा देवीभ्यो राज्ञा देया भवन्ति पूर्वपुरुषक्रमात् । राजा तदाकर्ण्य श्रीहेमान्तिकमगमत् । कथिता सा वार्ता । श्रीप्रभुभिः कर्णे एवमेवमित्युक्तम् । राजोत्थितः । भणितास्तेन—दास्यामः । इत्युक्त्वा परिपाटी(?)क्रमेण रात्रौ देवीभवने क्षिप्ताः पशवः । तालकानि दत्तानि । आप्ताः शिक्षितास्तेषु प्रभृता आसन्नरक्षकाः । प्रातरागतो नृपेन्द्रः । उद्घाटितानि देवीसदनद्वाराणि । मध्ये दृष्टाः पशवो रोमन्थायमाना निवातवास्यमुक्ताः । भूपालो जगाद— भो अधिकारिणः ! एते पशवो मयाऽमूभ्यो दत्ताः । यद्यमूभ्यो रोचिष्यन्त ते तदा भक्षिष्यन्, परं न भक्षिताः ; तस्मादमूभ्यो पशवः न रुचितम् । भवद्भ्य एव रुचितम् । तस्मात् तूष्णीमास्ध्वम् । नाहं जीवान् घातयामि । विस्मितास्ते विप्रकाराः । मुक्ताश्छागाः । छागमूल्यसमेन तु धनेन देवेभ्यो नैवेद्यानि दापितानि । अथ दशमीरात्रौ कण्टेश्वरी देवी त्रिशूलपाणिः राजानमुवाच— राजन् ! अहं तव कुलदेवी कण्टेश्वरी । देयम् किमिति त्वया मामकं दानम् ? । राजाऽऽह— देवि ! दयां विधाय मयि मा कुप्य । राज्ञो धर्मे का कथा ? । ततश्च कण्टेश्वरी तदा राजानं त्रिशूलेन शिरसि दत्त्वा अदृश्याऽभूत् । राजा कुष्ठी जातः । एतदाकर्ण्य विस्मितः ।

२ अ १३ (अष्टमी ?) १ मेषक (?) ३ अष्टौ ... नवम्यां ... २ नवपि दत्ताः

भृत्येन मन्त्रिणमुदयनमाकार्य तत्स्वरूप निगद्य पप्रच्छ—मन्त्रिन् ! देवी पशून् याचति, दीयन्ते न वा [1] । मन्त्री दाक्षिण्यादाह —देव ! राजा यत्नेन रक्ष्य एव । भूपो न्यगादीत्—निःसत्त्वो वणिगसि । यदेव ब्रूषे मम किं कार्यं जीवितेन [2] । कृत राज्यम् । लब्धो धर्मः । हता शत्रवः । केवल काष्ठानि देहि रह , येन प्रातर्मामीदृश दृष्ट्वा लोको धर्मे नोद्दाह करोति । उदयनेन चिन्तितम्—अहो महत्कृच्छ्रमापतितम् ! । पारवश्यमूल नियोग धिक् । मन्त्रिणोक्त सद्यो बुद्धिवशात्—श्रीहेमसूरयो विज्ञप्यन्ते । राज्ञोक्तम्—तथाऽस्तु । गतो मन्त्री उपसूरि । सूरिभिर्जलमभिमन्त्र्यार्पितम् । अनेन राजाऽऽच्छोट्य इति । सचिवेन तथा चक्रे राज्ञः । राजा [3]दोगुन्दुकदेव इव दिव्यरूपसम्पन्नो भक्तश्च समधिक श्रीगुरु वन्दितु ययौ । गुरुर्देशना दत्ते—

शूरा सन्ति सहस्रश प्रतिपद विद्याविदोऽनेकश
सन्ति श्रीपतयो निरस्तधनदास्तेऽपि क्षितौ भूरिश ।
किन्त्वाकर्ण्य निरीक्ष्य वाऽन्यमनुज दुःखार्दित यन्मन-
स्तद्रूप प्रतिपद्यते जगति ते सत्पूरुषा पञ्चषा ॥१॥[4]

राजा स्वावास गत । राज्य समृद्ध भुनक्ति ।

एकदा प्रभुभिर्भरतस्य चक्रिण साधर्मिकवात्सल्यकथाऽकथि । ता श्रुत्वा भूप. साधर्मिकवात्सल्य दिव्यभोजन-वसन-कनकदानै प्रतिग्राम प्रतिपुर प्रारेभे । तद् दृष्ट्वा कविश्रीपालपुत्र सिद्धपाल सूक्तमपाठीत्—

क्षिप्त्वा वारिनिधिस्तले मणिगण रत्नोत्कर 'रोहणो'
रेण्वावृत्य सुवर्णमात्मनि दृढ बद्ध्वा '[5]सुवर्णाचल' ।
क्ष्मामध्ये च धन निधाय धनदो बिभ्यत् परेभ्य स्थित
कि स्यात् तै कृपणै समोऽयमखिलार्थिभ्य समर्थं ददत् ॥१॥[6]

---

१ उपहासम् । २ एतत्स्वरूपार्थं प्रेक्ष्यतां परिशिष्ट । ३ ख-घ-'सुरा'। ४ शार्दूल० । ५ मेरुः । ६ शार्दूल० ।

प्रमर्षमत्सरत्विरम । पुनः कदाचित् पठितम्—

श्रीवीरे परमेश्वरेऽपि भगवत्याख्याति धर्मं स्वयं
प्रज्ञावत्यभयेऽपि मन्त्रिणि न यां कर्तुं क्षमः श्रेणिकः ।
अक्लेशेन कुमारपालनृपतिस्तां जीवरक्षां व्यधात्
यस्यास्वाद्य वचः सुधां स परमः श्रीहेमचन्द्रो गुरुः ॥११॥[1]

तथापि सप्तदशि । अन्येद्युः कथाप्रसङ्गे प्रभुः प्राह स्म— पूर्वं श्रीभरतो राजा श्रीमाल'पुरे 'नगर'पुरे 'शत्रुञ्जये' 'सोपारके नाथदेवे' च श्रीजीवन्तस्वामिश्रीऋषभप्रतिमाचतुर्मार्गं च 'चतुरङ्ग' ममूर्त्तोच्छ्रितरथ पुण्यमाभिर्व्यतिरिक्तमकारयत् सङ्घपतिर्भूत्वा चक्रे । तदाकर्ण्य श्रीचौलुक्यः स्वयं चरितरथेर्ष्ययाऽक्रमेणैव ससैन्य 'शत्रुञ्जयो' 'ज्जयन्ता'दियात्रार्थं चचाल । सङ्घे उदयन सुते वाग्भटश्चतुर्विंशतिर्जिनप्रासादकारापकः, सुपनागापत्यमेतिमू श्रीमान् आमभटः, पद्मावतीकर्मिवक्ती श्रीपालः, नृपःसिद्धपालः, कवीनां वाकुणां च धुर्यो भाण्डागारिकः कपर्दी, 'परमार'वंशे 'पूर्णाम्बरस्वती' 'प्रह्लादन'पुरनिवेशको राजः प्रह्लादनः राजेन्द्रदौहित्रः प्रतापमल्लः, नगतिश्रेष्ठेस्वामी प्रतिष्ठाकारकः राज्ञी मोपलदेवी चौलुक्यपुत्री लीलूः, रैणभम्भडमाता माऊः, आमडपुत्री चाम्पल इत्यादि कोटीश्वरो लक्ष श्रीहेमचन्द्रसूरिपादाः श्रीदेवसूरयः श्रीधर्मसूरय सहस्रशः मानवाः । स्थाने स्थाने प्रभावना । दिने दिने छत्रचामरादिदानम् । यात्राया इत्यसिद्धि । प्रथमं 'धैवल'वितवे सङ्घ श्रीपादलीप्यां स्थिति भक्ता स्थितः क्षितिपतिः । नामदेविर्गेयं राज्ञी मारस्या श्रीहेमसूरिभ्यः आदिष्टम्— राजा भैरवाचारेऽस्य

१ क— अन्य इति २ कर्तुं ३ च च श्री पुरे । तत्सद्य-श्रीसदेशी चतस्री पैशाची-अपभ्रंश इति भाषामष्टकम् । ४ ख— च । ५ शत्रुञ्जय'एवं पाठमाह् । ख 'राजा अम्बड । ७ ख 'चाम्पलम् इत्यादि' । ८ ख— श्रीहेमसूरि ९ ख— यात्रा । १० ख 'भैरवी करोति' ।

विघ्नसम्भवात् । अत्रैव देवो मदनसूदनो नेमिर्वन्द्य । तथैव कृतम् । सङ्घस्तु 'रैवत'गिरौ श्रीनेमिस्नानविलेपनपुष्पफलवस्त्रपूजानैवेद्यनादमाल्यादिग्रहणैर्भावमपूपुरि । गजाऽप्यक्षवाटकवस्त्रापथराजीमत्यादिगुहाप्रायस्थानयात्रया महादानैश्च धनजीवितव्ययोर्लाभमग्रहीत । 'देवपत्तने' चन्द्रप्रभयात्रा ससङ्घस्यान्यासीत् । ततो व्यावृत्य 'शत्रुञ्जया'द्रिं गत । आरूढ । मरुदेवादर्शनपूजे । तत्राशी —

वालो मे वृषभो भर सुमनसामध्येष किं सामहि—
मन्द धेहि किरीटमस्य करयोर्मा काङ्कणी भूद् व्यथा ।
गाङ्गेय कटिसूत्रमत्र तनुक युक्त वलिष्टेऽप्ययम्—
र्नाथे मातृदयागिर सुरजने हास्यावहा पान्तु व ॥१॥

पुर कपर्दी, तत्र कायोत्सर्ग । आशीस्तु—

रूढि किलैव वृषभः कपर्दिन
नियैवतेऽस्मिन् 'विमला'चले पुन ।
अय कपर्दी वृषभं शुभाशन—
स्तनोतु व शान्तिकपौष्टिकाश्रयम् ॥१॥

पुरो वृषभप्रभुप्रासाद । देवदर्शन पूजा । आशीर्वाद —

नव्योद्वाहविधौ वधूद्वययुत पुत्र मवित्रीगति—
प्रीत्यासन्नमिव स्मर किट ददौ य वीक्ष्य मत्याशिषम् ।
कल्पद्रुर्भुवि जङ्गम किमधुना पत्रद्वयेनोद्गत—
स्तस्य स्या शतशाख इत्यनुदिन स श्रेयसे नाभिभूः ॥१॥

चैत्यपरिपाट्या कपर्द्यादि—

श्रीचौलुक्य स दक्षिणस्तव कर पूर्वं ममान्तिन
प्राणिप्राणविघानपातकलग्न शुद्धो जिनेन्द्रार्चनात् ।

१ घ-'मरुदेवीदर्शन०' । २ शार्दूल० । ३ द्रवश्चा (?) । ४ क- 'स्र', ख-घ-'स्मर' । ५ ख-'स्तर' । ६ शार्दूल० । ७ क 'मुत्र' ।

वामोऽप्येष तथैव पातकशतैः भूमिं कथं प्राप्नुयात्
न स्यूतेन करेण चेद् धृतिधरः श्रीहेमचन्द्रप्रभो ॥२॥[1]

[2]मेरुमहाप्रभावनाप्रारितावदानयात्राजलहरा प्रवर्तन्ते । अथैकदा [illegible] व्यापारी सद्व्ये रात्रिं च निपन्ने सर्वे वाग्भटः प्रथमं [illegible] । [illegible] कश्चित् [illegible]; स्वसम्पाद्येष्वीश्वरेषु वर्षेषु कश्चित् सपादकोटी चकार । राज्ञा-ऽपि चमत्कारं उवाच च— अस्याम्बड्डे ते पो गृह्णामि । उत्थितः स । यावद् वदते तावद् वीतरागविम्बवसन्ती धणिमूल्य । राज्ञा धाम्भणे भाषित — हेम्नमूल्यं कृत्वा देहि । वाग्भटो वणिजा सहेत्याय पादुकान्तिके गत्वा हेमसूल्यं पप्रच्छ तम् । वणिजा सपादकोटिमूल्यं माणिक्यं दर्शितम् । वणिजा पृष्टम्—कुत इदं ते ? । वणिगाह— 'भृगुकच्छ'वास्तव्यो वणिक्त हैसास्य: सौराष्ट्रिक भ्रातरः । अहं ज्येष्ठोऽस्मि । माता मे [illegible] । मम पिता निधन-समयेऽहं भाषित — वत्स ! पितृ हत्या प्रवहणयात्रा फलिताय । मौक्तिक वगम् । तेन च मयि प्रत्येकं सपादकोटिमूल्यं माणिक्य-पञ्चकम् । अधुना प्रभुप्रणमकरणी दारणं मे । बलदानं प्रतिपन्नम् । [illegible] सर्वे [illegible] माणिक्यं श्रीऋषभाय एकं श्रीनेमिनाथाय एकं श्रीचन्द्रप्रभाय दत्तं माणिक्यद्वयमस्मोऽन्यर्थेन दध्या । [illegible] प्रभुत्वमान्य । इदानी मत्ता मिथ सहानीत कपर्दि भवने मुख्यऽस्ति । तां जननी मातरं सर्वतीर्थाधिपतेः पुरतापुरुषे निवेदितामेतां भार्यां परिधापयिष्यामि । श्रुत्वा हृष्टो मन्त्री राजा सहृदयः । मातृसम्मुखागमनं सर्वश्रावकाणां माल्यपरिधापनम् । तन्माणिक्यं हेम्ना वणिजा ऋषभाय कथयन्मनुष्यारितम मरितैवनगर्भम गृह्यामहे । [illegible] सद [illegible] पत्तनम् । प्रवर्तन्ते

1 [illegible] । 2 [illegible] । 3 [illegible] । 4 [illegible] ।
5 प– 'सर्वेतरन' । 6 प 'माता' [illegible] । [illegible] ।
7 [illegible] 'जननी' इति [illegible] ।

सहभोज्यानि प्रतिलाभनाश्च। अमारिस्तु नित्यैव।

तस्य च कुमारपालदेवस्य भगिनी 'शाकम्भरी'श्वरेण 'चाहमान'-वंश्येन राज्ञा आनाकेन परिणीताऽस्ति। एकदा तौ सारिभिः[1] क्रीडतः। क्रीडता राज्ञा सारिगृहे मुख्यतोक्तम्[2]— मारय मुण्डिकान्, पुनर्मारय मुण्डिकान्। एवं द्वित्रिः। टोपिका[3]रहितशीर्षकत्वान्मुण्डिका 'गूर्जर'लोका विवक्षिताः। अथवा श्वेताम्बरा गूर्जरेन्द्रगुरवो मुण्डिका इति हासगर्भोक्तिः। राज्ञी कुपिता वदति— रे जङ्गलक! जिह्वामात्रेऽप्य नोच्यते[?], किं वक्षि[?]। न पश्यसि माम्[?]। न जानासि मम भ्रातरं राजराजम्[?]। क्रुद्धो राजा तां पदा जघान। साऽप्याह— यदि ते जिह्वां अवटुपथेन[4] कर्षयामि तदा राजपुत्री मा-ममस्थाः। इति वदन्त्येव सा सर्वैन्या निर्विलम्ब्य 'श्रीपत्तन'मेत्य चौलुक्याय तं परिभवं प्रतिज्ञां च स्वोपज्ञामजिज्ञपत। चौलुक्योऽभाषत— इत्थमेव करिष्यामः, कौतुकं पश्ये। ततश्चानाकस्त्र्यां तत्र गतायां 'गूर्जर'नृपतेर्नो दुर्गं विदधुःक्षोभ। चौलुक्योऽपि वह्वानपरिच्छदं मन्त्रिणमेकं तत्रस्थवृत्तान्तज्ञानाय प्रैषीत्। गतः स तत्र। जग्राह गृहम्। राजासन्नदासीमेकां धनेन रञ्जयित्वा आत्मीयं भोगपात्रमकरोत्। नित्यं सा याममात्र्यां रात्र्यामायाति रञ्जयति तम्। एकदा निशीथे साऽऽगात्। मन्त्री कुपितः— आः पापे! परनृगामिनि! किमिति विलम्बेन समागताऽसि[?]। साऽपि सप्रश्रयं मन्त्रिणमभाषत— स्वामिन्! मा कुप। कारणेन स्थिताऽस्मि। मन्त्रिणोचे— किं कारणम्[?]। सा जगाद— प्रभो! अहं अस्य राज्ञस्ताम्बूलदासी। रात्रेर्यामे एकस्मिन् राज्ञा परिच्छदः सर्वो विसृष्टः। अहमपि विसृष्टा। विसृजता चाप्तनर एकोऽभाणि— व्याघ्रराजं हक्कारय। अहं स्तम्भान्तरिता कौतुकेन स्थिता। को व्याघ्रराजः[?]। कथमाहूयते इति। ततो राज्ञाऽऽकारितः स आगतः,

१ ख-ग-'क्रीडतां'। २ घ 'मुख्यतो०'। ३ 'टोपी' इति भाषायाम्। ४ ग-'अवटपथेन'। ५ कूपमार्गेण। ६ क-'पश्य'। ७ ग-'परापरनृ०'। ८ सविनयम्।

कृष्णवर्णः सन् राज्ञाऽऽज्ञापि— भो ! भिक्षुरस्ति इति भाष्यस ! त्वमस्माकं कुलक्रमागतः सेवकः । सत्यं मम । गुर्वेरैश्वर्यानर्थं मृत्वा व्याघ्रत्वम् । व्याघ्रत्वं देवो नास्ते । अथ स व्याघ्रराजो वक्ति बभाषे— देव ! हनिष्याम्येव त राजानम् । मा एव तद्वर्थं कृथा स्वामिन् ! । तमस्तद्वचः श्रुत्वा पुनः दानवस्त्वरीश्वरः सत्ये हेमवज्रमयकररत्नोत्तरगृहस्यान्तीपवत् । व्याघ्रराजं पप्रच्छ कथं केनोपायेन तं हनिष्यसि [1] । व्याघ्रराजोऽभाणीत् नाथ ! अत्र रविवारो वर्तते । आगन्तुकमे सोमवारे चन्दनात्वस्य कन्या हनिष्यामि । उपायं तु मरटकरूपं करिष्यामि । राजा तु [2]कर्णं मेरुप्रासादं यास्यति सोमवारे शुभम् । देवं नत्वा व्याघ्ररूपमस्मै याचकरूपेण भोगार्थमिषेण पुष्पकरण्डकमुत्पाटयिष्यामि । तत्र भूत्वा निर्गत्य कुटुम्बं घातयिष्यामि । अश्रीहतसहस्राणां न किञ्चिदपि दुष्करम् । अथ हतश्चेद् तत्र तदा मम्मानुभावानुपरि कृपा करणीया । तद्वृत्तवशात् तदा जितं भितम् । एवं व्याघ्रराजस्य निगदितं आनाय्य पीठकं न्यस्तम् । निगूढोऽसौ । तत् सर्वं सावकाशतया स्तम्भान्तरिततया मया श्रुतम् । रात्रि प्रभाते गतेऽहं त्वद्विशेषार्थमायाता । तस्मात् त्वं मनो मयि अतोऽत्रभवत्स्वामिनं कार्यम् । एतद्दासीवचः श्रुत्वा चातुर्यवशियोगी चिन्तयति— इदं राष्ट्रमर्म । मन्त्रिणोऽपि मर्मपरत्वाय । इति पराङ्मुखन् दासीमभाषत— मयि प्रयासमितिषि ! । क त्वमपि अस्ति विचारः ! ।

कृपण यत्र शास्त्रेषु तत्कोपेऽपि न दृश्यते ।
तत् कम्पयन्ति लोकाश्चो अन्यान्ति स्थापयन्ति च ॥१॥

इत्यादि व्याविश्य तां व्यसर्जीत् । स्वयं तु चतुरोपायो मन्त्रिणामनुरूपं प्रागल्पयत् । विजयन्ता चाकारयत्— छायाने रोषम् । अत्र हत्वं स्वामिगात्रस्योपरि शत्रुरूप कपट वर्तते । मरटविधिस्मीप । वातुबन्धः सावधानतत्त्वे । सोमवारे गतो

---

१ अ—ड— एते पुनर । २ ड— 'कर्णीरिका' । ३ अतिविशेष चतुर ।

राजा 'कर्णमेरु'म् । प्रकटीभूत पूर्वोक्तचेष्टया भरटक । दृष्टमात्रमेव त नृपो मल्लैरदीधरत् । कर्तिका च लब्धा । बद्धो व्याघ्रराजः । जल्पितश्च— रे वराक! जङ्गडकेन प्रेषितोऽसि[2] । सेवकस्त्वम् । सेवकस्य च हिताहितविचारो नास्ति । स्वाम्यादेशवशवदस्त्व मा भैषी । मुक्तोऽसि । तमत्र हनिष्यामि य एव द्रोहमाचरति दुर्दुरूढ । इत्युक्त्वा परिधाप्य व्यसृजत् । स्वय तु सौध गत्वा सामग्रीं योद्धीं व्यरचत् । पार्ष्णिरक्षा विधिवद् विधाय चलित । 'सपादलक्षा'न् प्रविष्ट । भट्टेन आनाकनरेन्द्रमालीलपत् । यथा—

अये भेक! च्छेको भव भवतु ते कूपकुहर
शरण्य दुर्मत्त किमु रटसि वाचाट! कटुकम्[3] ।
पुर सर्पो दर्पी विषमविषफूत्कारवदनो
ललज्जिह्वो धावत्यहह भवतो जिग्रसिषया ॥१॥[4]

आनकोऽपि तदुद्दामशौण्डीर्यरिपुदूतवच श्रुत्वा लक्षत्रयाश्वेन नरलक्षदशकेन पञ्चाशता च मदान्धैर्गन्धगजैरचलत् । 'शाकम्भरी'त पञ्चक्रोश्याऽर्वागागत । दिनत्रयेण युद्ध भविष्यतीति निर्णीतमुभाभ्यां राजेन्द्राभ्याम् । अन्योन्यमक्षान् दीव्यन्ति राजपुत्रा । योधयन्ति मल्लयोध-च्छुरीकार-मेष-वृषभ-महिष-गजान् । स्फोटयन्ति नालिकेराणि । तावन्तमवकाश लब्ध्वा 'सपादलक्ष'क्ष्मापालेन निशि द्रव्यबलेन 'नड्डलीय''केल्हणा'दयो राजकीया'श्चौलुक्य'-भक्ता भेदिता स्वपक्षे कृता । सर्वेषामेको मन्त्र — युद्धाय सन्नद्धव्यमेव, न तु योद्धव्यम् । राजा चौलुक्य एकाकी मोचनीय । शत्रुभिर्हन्यताम् । अर्थो हि परावर्त्तयति त्रिभुवनम् ।

दधाति लोभ एवैको, रङ्गाचार्येषु धुर्यताम् ।
आरङ्कशक्र यन्नाट्य-पात्राणि भुवनत्रयी ॥१॥[6]

---

१ ग—'सौधे' । २ क—'विहाय' । ३ क 'फूत्कारैवदने। । ४ शिखरिणी ।
५ ख-घ — 'त्रयाश्वा नर० । ६ अनुष्टुप् ।

धर्म च तर्हि मर्म चानुकम्पाऽपारि न वेत्ति । अथ एकदा राजा कुमारपालः कलहपञ्चाननं गजमारूढः महामात्यश्यामलसार्धं पुरं प्रस्थापयत् । तदन्तरे कोटीनिर्वृत्तम् निरणैषीत् । कुमारं गन्ति श्यामलः—त्रिलोकपतेः उन्मीलन इव लक्ष्मीः ? । श्यामलेन विज्ञप्तम्—देव ! वरिष्ठमार्गे गजाश्वौ त्वयि प्रेषणः सम्पदा । राजाऽऽह—तर्हि तव का चेष्टा ? । श्यामलोऽप्याचष्ट—देव ! एका दृष्टः ? अपराऽहम् ? अन्यस्तु कलहपञ्चाननो हस्ती ; एष मम कदापि न पराभवन्ते । नृपो वदति—तर्हि सम्मुखीने दृश्यमान सकुम्भपञ्जरको गजं प्रेरय ।

साहसनुष्य देव पद(चरण ?)इ देवह ठवइ कपालि ।
सेवा विणु सीकर नहीं केलिम(क्षण ?) सेवा टालि ॥१॥

तदैव चारण एका व्याहार्षीत्—

कुमारपाल ! मेघ विण कवि चिन्तिइ किंपि न होइ ।
जिणि तुह रज्ज समप्पिउं चिन्त करेसइ सोइ ॥१॥

तत् ततीय चर्म कृत्वा कुमारं सन्नमात्र पुरस्थे महाघोरघनिरम् । नरमस्तकेन सह मन्त्रन् तत् एका मयाख्य कुमारपालं आनायकमान्विताः । आत्मकीर्त्या गतो गजेन । कृत्वा चर्म करेण । आत्मकीर्त्या हस्ती हस्तचर्माम् । पृष्ठदत्तमिव दृष्टिरम्भोरभूत् । महार्घ तुङ्गं भीमगजे । तदपि वक्त्री महात्मा राजेभो । तथापि कलहपञ्चाननमीन्दारान् मुञ्चन् पुनः पुनः पश्चाभिमुखैति । तदा

साहसमुख्य दर्भ चरण(कर ?)इ देवह कपालि ।
कुसम् विना सामग्री न वर्षइ ? कुसम् व्यवस्था ॥
१ दै तै ति च के । कुल दृष्टेपि स्थापकये गृहीतव्यवस्था ।
२ प—तु' । ३ च 'कूपं' ४ प—पुस्तके तु एवम्—
कीर्तिम मेला दर्पि मय विण जीवन वहि ।
दिइन्त्व कपालि वाहन वसहन्मकर ॥ ॥
५ छाया—कुमारपाल ! मा चिन्तां कुरु चिन्तया किमपि न भवति ।
येन तुभ्यं राज्यं समर्पितं चिन्तां करिष्यति स एव ॥
७ क—'कवि चिंत करि' । ७ ग—'एकम्' ९ क—'गीत सोइ' । १ श्रीहेमचन्द्र

चौलुक्येन श्यामल ऊचे– कथमथ निवर्तते'। श्यामलो गदति स्म– स्वामिन्! श्रीजयसिंहदेवे विपन्ने ३० दिनानि पादुकाभ्यां राज्यं कृतम्। 'मालवीय'राजपुत्रेण चाहडकुमारेण राज्यं प्रधान-पार्श्वे याचितम्। प्रधानैस्तु परवश्यत्वान्न दत्तम्। ततो रुष्ट्वा चाहड आनाकसेवकः सञ्जातः। स भगदत्तनृपवन्महामात्रधुर्यः, अतुलबलः। तस्य सिंहनादेन कलहपञ्चाननः क्षुभ्यन् पश्चान्नि-वर्तते। किमत्र क्रियते न विद्मः। चौलुक्यस्तदाकर्ण्य द्विपटीं विदार्य फालिकाद्वयेन द्वौ गजकर्णौ पूरयामास। ततश्चाहडसिंह-नादमशृण्वन् कलहपञ्चाननः स्थिरतरः स्थितो गिरिवत्। वर्तते षट्त्रिंशदायुधैर्युद्धम्। चमत्कृते द्वे अपि सैन्ये। उदासीनतया प्रथमं स्थिता 'चौलुक्कीया'श्चकम्पिरे भयेन अहो एकाङ्गमात्रस्यापि कुमार-देवस्यासमसमरसम्पल्लम्पटत्वम्! । सैन्ययोर्युद्धमपि निवृत्तम्। तावेव युध्येते। अत्रान्तरे चौलुक्यो विद्युदुत्क्षिप्तकरण दत्त्वा आनाकगजपतिस्कन्धमारूढः। क्षिप्तो भुवि राजोपरि। कसण-कानि च्छुरिकया छित्त्वा आनाकं सदम्भकं च भूमौ पातयित्वा योक्त्रबन्धं क्षिप्त्वा हृदि पादं दत्त्वा छुरीं कराग्रे गृहीत्वा अवा-दीत्–रे वाचाट! मूढ! निर्धर्मन्! पिशाच! स्मरसि मद्भगि-न्यग्रे 'मारय मुण्डिकान्' इति वदिष्यसि। पूरयामि निजभगिनी-प्रतिज्ञाम्। छिनद्मि ते दुर्वाक्यपङ्कदूषितां जिह्वाम्। इत्येवं वदति कृतान्तदुष्प्रेक्ष्ये चौलुक्ये 'सपादलक्षीय' किञ्चिन्नोचरर्यो, केवलं तरलतारकाभ्यां चक्षुर्भ्यामद्राक्षीत्। चौलुक्योऽप्युत्पन्नलोकोत्तर-करुणापरिणामः प्राभाषीत–रे जाल्म! मुक्तोऽसि, न भगिनीपति-त्वेन, किन्तु कृपापात्रत्वेन। पूर्वं तव देशे टोपीबन्धाग्रभागे जिह्विके

१ ग-'परवशत्वात्'। २ ख-'फालक०'। ३ एतत्सामाग्यं दृश्यतां पद्मानन्दमहाकाव्यस्य परिशिष्टे (पृ० ५८०–५९०)। ४ ग-'प्रथमस्थिता–'। ५ ख-घ-'ल्पम्पटत्वम्'। ६ क-'किरण'। ७ क-'आनक०'। ८ 'दांचो' इति भाषायाम्। ९ क-घ-'नाचरत्यात्'। १० ग-'भ्रुषेऽप्र०'।

[illegible]स्वास्थ्यम् । कस्मा(द्या?)चा विद्येति सम्भा । अत परं विज्ञाप्य पश्चात् करणीयम्, [illegible]मिति[illegible]सिद्धि[illegible]मित्युक्तवत् । एवं कृते तथेति प्रतिपेदे आनाकः । [illegible] सह कृत विरोधिनोऽपि [illegible]स्यात् । [illegible] विरात [illegible] तपस्विन् । [illegible] मि घोषितानि । पश्चात् [illegible]परिनिर्वाहित । [illegible]रोपितश्चाचार्यो हि [illegible]पालरेवमन्वतः । गम्भीरस्तथा [illegible] गोपायन्त्या । [illegible]स्ते च सेवन्ते । मेरुतुङ्ग सत्वरं [illegible] । 'पाली[illegible]'स्थाने [illegible] । ततः पठितं चारणेन—

कुमारपाल [illegible] [illegible] कुमरि [illegible] ।
[illegible] [illegible] मारि [illegible](?) [illegible] [illegible] ॥

इति चिरं तस्थौ [illegible] तत्र । श्रीहेमचन्द्रसूरय [illegible] [illegible] । पृष्टस्तु तेन— भगवन् ! '[illegible]' राजानो 'गूर्जर'[illegible] प्रासादान् [illegible] [illegible] । [illegible] । [illegible]पाषाणमयानि [illegible] ! । श्रीहेमसूरिपार्श्वे प्रत्यपादि—राजेन्द्र ! पाषाणमयानि [illegible] [illegible] पुण्यकीर्तिमयात् । [illegible]स्ते तेन [illegible] । [illegible] मम पठिता [illegible] [illegible] । [illegible] [illegible] परतापूर्ण [illegible] । [illegible] '[illegible]'म् । [illegible] प्राग्[illegible] । न तु सा [illegible] [illegible] । [illegible] । राजा '[illegible]'पुरे [illegible] । [illegible] [illegible] । पुन '[illegible]'मित् । गृहीत- [illegible] [illegible] [illegible] निगूढ [illegible] श्रीकुमारपालः श्रीहेमसूरिपादान् पर्युपास्ते [illegible]ति ।

[illegible] पूर्व राजा— भगवन् ! [illegible] [illegible] पूर्वजन्मे

1 क—[illegible] । २ [illegible]—'[illegible]' ३ [illegible] ।
४ [illegible]— कुमारपाल[illegible] [illegible] ।
[illegible] [illegible] [illegible] [illegible] [illegible] ॥
५ [illegible] ६ [illegible]— [illegible] । '[illegible]' इति [illegible] । [illegible]-[illegible] [illegible] । ९ '[illegible]' इति [illegible]

कीदृशोऽभूवम् ? । गुरुराह— राजन् ! निरतिशय कालोऽयम्, यत श्रीवीरमोक्षगमनाद् वर्षाणां चतु षष्ट्या चरमकेवली जम्बूस्वामी सिद्धिं गत । तेन सम मन पर्यवज्ञानम्, परमावधि, पुलाकलब्धि, आहारकशरीरम्, क्षपणश्रेणि, उपशमश्रेणि, जिनकल्प, परिहारविशुद्धि-सूक्ष्मसम्पराय-यथाख्यातचारित्राणि, केवलज्ञानम्, सिद्धिगमन च इति द्वादशस्थानानि 'भरत'क्षेत्रे व्युच्छिन्नानि । सप्तत्यधिके वर्षशते गते स्थूलभद्रे स्वर्गस्थे चरमाणि चत्वारि पूर्वाणि समचतुरस्रसंस्थान वज्रऋषभनाराचसंहनन महाप्राणध्यान व्युच्छिन्नम् । आर्यवज्रस्वामिनि दशम पूर्व आद्यसंहननचतुष्कं च व्यपगतम् । तत पर शनै शनै सर्वाणि पूर्वाणि प्रलय गतानि । [1]सम्प्रति अल्पश्रुत वर्तते तथापि देवतादेशात् किमपि ज्ञायते । राज्ञा विज्ञप्तम्— यथातथा पूर्वभव ज्ञापयत माम् । गुरुभि प्रतिपन्नम् । तत 'सिद्ध'पुरे निर्जराप्ततपोधनै सह 'सरस्वती'तीर गत्वा विजने ध्याने निषण्णा । द्वौ मुनी दिग्रक्षाया मुक्तौ । दिनत्रयान्ते [2]विद्यादेव्य आजग्मु । प्रभूणामग्रे ताभिरुक्तम्—यद् भवता सत्त्वेन तुष्टा स्म, याच्यता किञ्चित् । सूरिभिरभाणि— कुमारपालस्य प्राग्भव वदत । ता ऊचु – 'मेदपाट'परिसरे पर्वतश्रेण्यां 'परमार'पल्लीशो जयताको राज्यमकरोदन्यायी । एकदा धनकनकसमृद्धा बलीवर्दश्रेणी तेन गृहीता । बलीवर्दाधिपतिर्नष्ट । जयताकेन सर्वं लुण्टितम् । 'बलीवर्दा'धिपतिस्तु 'मालव'देश गत्वा राज्ञा सह मिलित्वा सेना गृहीत्वा तस्या पल्ल्यां वेष्टमकृत । कीटमारि कृता । जयताको नष्ट । तस्य भार्या(हस्ते) चटिता । तस्या उदर विदार्य पुत्र गर्भमुपले आस्फाल्य वाणिज्यारकोऽवधीत् । 'पल्ली'ग्रामादि प्रज्वाल्य पुन-

१ 'सम्प्रति' इत्यधिको ग–पाठ । २ एतन्नामार्थमेतासां प्रतिकृत्यर्थं च प्रेक्ष्यता बप्पभट्टिसूरिकृतचतुर्विंशतिकाया मदीय संस्करणम् । ३ 'बळद' इति भाषायाम् । ४ 'वणजारो' इति भाषायाम् ।

'मल्लिकार्जुन'दिशं गतः । राज्ञा हसित्वा पृष्टः — कथं तव विग्रहः कृतः?¹ । वणिग्व्यापारकेणोक्तम्—स्वामिन् ! तत्पुरं प्रत्यावर्तितम्, अयशस्का मया तत्पत्नी घटिता सवर्णा कृता । राज्ञोक्तम्— त्वया न शुभं कृतम् । दण्डश्च गृहीतम् । अयशस्कमप्युत्सर्गं समाप्तिकं जग । निष्कासितः । लोकनिन्दोपद्रुतितः । तपोवनं गत्वा तपस्विदीक्षा जगृहे । तत्र तपस्तप्त्वा मृत्वा च वणिग्व्यापारकः अपसिद्धदेवो जातः । अयशस्कस्तु स्वात्मदोषं ज्ञात्वा देशान्तरं गतः । अटवीं गच्छन्तस्य 'चण्डर'गच्छस्वामिनः श्रीपद्मप्रभसूरयो मिलिताः । सूरिभिरभिहितम्— यद् भवतोऽधुना सर्वं गतम्, किमर्थमन्यायं करोषि ? । अयशस्केनोक्तम्— बुभुक्षितः किं न करोति पापम् ? । ततः सर्वमन्यायं करोमि । सूरिभिरुक्तम्— अधुना पञ्चमदिने मासमध्ये कासयिष्यसे । [illegible] मा कृथाः । मोक्षमपत्नानीर्थं कस्यापि पापात् दमिनम् । सार्वे हि तदारेखकारिणा बहवः नीति-नियमा यावज्जीवं गृहीताः । स 'निवाहु' 'उरस्थ'पुरे ओसर-वणिग्व्यापारकगृहे भोजनादिवृत्त्या स्थितोऽभवत् । तत्र विहरन् पद्मप्रभसूरयः प्राप्ताः । चतुर्मासे मिलिताः अयशस्कस्य । अन्यैकपाक्षमो दत्तः । अयशस्केन तत्र गत्वा गुरुपुरस्ता पुनर्धर्मनियमो गृहीतः अन्येऽपि बहवो गृहीता नियमाः । तत्पुरे ओसरगृहं गतः । ओसरस्य पुत्रम्— तव क्व वेला जाता ? । तां विना कर्माणि सीदन्ति । तेनोक्तम्— मम गुरवः समागताः सन्ति तत्कृतमवलोकनाय गताः स्म [illegible] । नियमान् गृहीत्वा । ओसरेणापि सम्पूर्णमनसोक्तम् व्याहृतम्— वयमपि गुरून् वन्दिष्यामः । अयशस्केनोक्तम्— पुण्यात् पुण्यमिदम् । ओसरस्तत्र गतः । गुरून् वन्दित्वा न्यषदत् । देशना श्रुता । तत्त्वार्थमुत्पादितम् । सम्यक्त्वं गृहीतम् । पश्चात् गुरुदक्षिणा गृह्यतामिति ओसरेणोक्ते सूरिभि-

१ ख-'मल्लिकार्जुन' २ कथोऽभिन् । ३ ख-ग 'निवाहु' दर । ४ [illegible] ५ 'कर्मी' इति [illegible] । ६ [illegible]

रुक्तम्— वय निर्ममा निष्परिग्रहा धनादि न गृह्णीम । अथ तवात्याग्रह एव तर्हि **महावीर**प्रसादकारापण दक्षिणाऽस्तु । कारित प्रासाद । **ओढरस्य जयताकेन** सह सोदरत्वमिवासीत् ।

एकदा पर्युषणे **ओढर** सपरिवारश्चलितो **जयताकेन** सम देवगृह प्रति । पुष्पाणि गृहीत्वा **ओढरेण** देवस्य पूजा कृता, **जयताको** जजल्पे— इमानि पुष्पाणि मे गृहीत्वा पूजा कुरु । **जयताको** जगाद– पुष्पाणि भवदीयानि, एभि पूजाया कृताया किं मे फलम् ? । विष्टिरेव केवला । केवल ममापि पञ्च वराटका सन्ति । तत्पुष्पै पूजयिष्यामि जिनेन्द्रम् । तथैव पूजित । **जयताको** पुण्यमगण्यमुपार्जयत् । तत **ओढर-जयताकौ** गुरून् वन्दितु जग्मतु । उपवास कृतो **जयताकेन** । द्वितीयदिने मुनिभ्यो दत्त्वा पारण कृतम् । एव पुण्याढ्य सन् मृत्वा श्री**मूलराज**वशे **तिहुअणपाल**देवगृहे श्री**कुमारपालो**ऽभूत् । एवमुक्त्वा विरतासु देवीषु प्रभुभि प्रोक्तम्— कोऽत्र प्रत्यय ? । पुनर्देव्य प्राहु – उपराज वदे नवलक्षतिलकशृङ्गारनगरे 'उरङ्गले' मानवान् प्रेषय । अद्यापि **ओढरस्य** वशीया सन्ति । तेषा दासी **स्थिरदेवी** जीर्णवृत्तान्तान् जानाति वक्ष्यति च । इद श्रुत्वा विसृज्य गच्छन्तीभिर्देवीभिस्तत्रत्ये **ओढरगृहे** लप्स्यमानानि निधानानि कथितानि । विज्ञाय 'पत्तने' राजान्तिक गता प्रभव । पृष्ट तत्र राज्ञा । तथैव राज्ञोऽग्रे न्यगादि । नरप्रेषणात् सर्वं ज्ञातम् । जिनधर्मे स्थैर्यं जातम् । सह **सिद्धसेने**नापि वैरकारणमुपलब्धम् । पूर्वभवे गर्भघातात्त्र **सिद्धराजस्य** पुत्र । इति **कुमारपाल**पूर्वभव ॥

॥ इति हेमसूरिप्रबन्ध ॥ १० ॥

---

१ ग–तर्हि श्रीमहा०'। २ ग–'इमानि मे पुष्पाणि' । ३ 'वेठ' इति भाषायाम् । ४ ग–'वेष्टिरेव'। ५ ख–'नवलक्षनवशृङ्गार०', घ–'नवलक्षतिलिङ्ग०'। ६ 'जूना' इति भाषायाम् । ७ क-ख-'इत्युक्त्वा देव्या गता स्वस्वस्थानम्। पत्तने राजान्तिक' । ८ ग–'सह सिद्धसेनापि' । ९ ग–'सन्तानम्' ।

[११]

॥ अथ श्रीहर्षकविप्रबन्धः ॥

पूर्वस्यां दिशि 'वाराणस्यां पुरि गोविन्दचन्द्रो नाम राजा ७५ अन्तःपुरीयौवनरसपरिमज्जनशाली । तत्पुत्रो जयन्तचन्द्रः । तस्मै राज्यं दत्त्वा पिता योगं प्रपद्य परलोकमसाधयत् । जयन्तचन्द्रः ससैन्यो यौवनशस्त्रमना पृथ्वीं विजयते । मेघचन्द्रः कुमारस्तस्य च । सिंहनादेन सिंहानपि मारकुमारकम् किं पुनर्मदान्धगजेन्द्रमहसा '। तस्य राजचक्रस्य सैन्ये 'गङ्गा' 'यमुने' विना नान्यत्सा प्रत्यति । नदीद्वयमध्यप्रयाणात् 'पङ्गुराजो' राजेति लोके पूज्यते । यस्य योमती दासी पश्चिमदेशेषु यात्रा प्रचरा(र) निवेशयन्निवेशयन्ती परचक्रं भास्यति । राजा भ्रम एव नः ? । तस्य राज्ञो लघो विद्वांसः । तन्मध्ये हीरनामा विप्रः । तस्य नन्दनः प्राज्ञचक्रवर्ती श्रीहर्षः । सोऽस्यापि बालकस्य । उभयोः राजसभायामेकेन पण्डितेन वादिना हीरो राजसमक्षं जित्वा मुद्रितवदनः कृतः । सभायां मम । वैरं स्मर पेशलम् । मृत्युकाले श्रीहर्षं स वक्ष्यते— वत्स ! अमुके न पण्डितेनाहमनेन राजसभे जितः । तस्मै दुःखम् । यदि सत्पुत्रोऽसि तदा तं जये लब्धपराजयसि । श्रीहर्षेणोक्तम्— ओमिति । हीरो दिवं गतः । श्रीहर्षस्तु कुटुम्बभारमात्मीयेष्वारोप्य विदेशं गत्वा विविधाचार्यपार्श्वेऽधिगत्य तर्क-अलङ्कार-ज्योतिष-गणित-चूडामणि-मन्त्र-व्याकरणाद्याः सर्वा विद्याः सत्त्वरा प्रजग्राह । 'गङ्गातीरे गुरुदत्त 'चिन्तामणि'मन्त्रं वर्षमेकं अत्युपचारात् । प्रत्यक्षा त्रिपुराऽभूत् । अमोघवरेण तस्याविर्बभूविः । तथापि राजगोष्ठीषु नमति । श्रीजिनभक्तेरुपरि तत्त्वं मार्गं करोति यं कोऽपि न बुध्यते तथोऽतिविषयाऽपि लोकगोचरमूलता विद्या । पुन

---

१ क 'पूर्वस्यां दिशि' । २ क- 'पूर्वस्यां वाराः' । ३ क 'पृथ्वीति' । ४ क्वचित् 'पञ्चर' इति पाठान्तर् । ५ पाठस्य पाठान्तर् दीन् ।

भारतीं प्रत्यक्षीकृत्याभणत्—मात ! अतिप्रज्ञाऽपि दोषाय मे जाता । बुध्यमानवचन मा कुरु । ततो देव्योक्तम्— तर्हि मध्यरात्रेऽम्भ क्लिन्ने शिरसि दधि पिब । पश्चात् स्वपिहि । कफांशावताराज्जडतालेशमाप्नुहि । तथैव कृतम् । बोध्यवागासीत् । खण्डनादिग्रन्थान् पर शताङ्कग्रन्थ । कृतकृत्यीभूय 'कासी'मायासीत्[1] । नगरतटे स्थित **जयन्तचन्द्र**मजिज्ञपत्— अहमधीत्यागतोऽस्मि । राजाऽपि गुणस्नेहलो हीरजेतृपण्डितेन सह सचातुर्वर्ण्य पुरीपरिसरमसरत । **श्रीहर्षो** नमस्कृत । तेनापि यथार्हमुचित लोकाय कृतम् राजान त्वेव तुष्टाव—

गोविन्दनन्दनतया च वपु श्रिया च
माऽस्मिन् नृपे कुरुत कामधिय तरुण्य ।
अस्त्रीकरोति जगतां विजये स्मर स्त्री–
रस्त्रीजन पुनरनेन विधीयते स्त्री ॥१॥[2]

व्याचख्यौ च तारस्वर सरसविस्तरम् । तुष्टा सभा राजा च । पितृवैरिण तु वादिन दृष्ट्वा सकटाक्षमाचष्टे[3]—

साहित्ये सुकुमारवस्तुनि दृढन्यायग्रहग्रन्थिले
तर्के वा मयि सविधातरि सम लीलायते **भारती** ।
शय्या वाऽस्तु मृदूत्तरच्छदवती दर्भाङ्कुरैरास्तृता
भूमिर्वा हृदयङ्गमो यदि पतिस्तुल्या रतिर्योषिताम् ॥१॥[4]

एतच्छ्रुत्वा स वादी प्राह– देव ! वादीन्द्र ! **भारतीसिद्ध** तव समो कोऽपि न, [5]किं पुनरधिक ? ।

हिंस्रा सन्ति सहस्रशोऽपि विपिने शौण्डीर्यवीर्योद्धता–
स्तस्यैकस्य पुन स्तवीमहि मह सिंहस्य विश्वोत्तरम् ।
केलि[6] कोलकुलैर्मदो मदकलै[7] कोलाहल नाहलै[8]
सहर्षो महिषैश्च यस्य मुमुचे साहङ्कृतेर्हुङ्कृते ॥१॥[9]

---

१ क–'काशीमायासीत्' । २ वसन्त० । ३ घ–'चचक्षे' । ४ शार्दूल० । ५ घ–'न स्वधिक' । ६ वराह० । ७ मदोन्मत्तगजैः । ८ म्लेच्छविशेषैः । ९ शार्दूल० । चतुर्विंशति० १५

इदं श्रुत्वा श्रीहर्षो निष्कोप इवासीत् । नृपेणोक्तम्—अत्र श्रीहर्ष एवैक चतुर्मर्दम् । प्रतिवादिनां कोऽर्थः ? । सम्मानसर मग्रासी' । श्रीहीरनैरिनिपर्य । अन्योन्य गाढालिङ्गनमन्वी-भवद् इयारपि चक्षुस्वरासुधांशु । विस्तरेण श्रीहर्षमपि समालि-ङ्गानि कारयित्वा गृहं प्रति प्रहित' । अक्षरलक्षमूल्यानि हेमानि ददिरे । निधिन्तीर्थयैकदा मुखा नृपेणोक्तं कवीश — नवीनं किञ्चित् प्रबन्धरत्नं कुरु । ततो नैषधं व्याकरणं कर्तुं दिग्भरस महाग्रन्थभाषास्वाद्य राज्ञे दर्शितम् । राज्ञोक्तं— सुष्ठुतममिदम् परं काश्मीरं व्रज । तत्रत्यपण्डितेभ्यो दर्शय । भारतीहस्ते च मुञ्च । भारती च तत्र पीठे स्वयं साक्षाद् वसति । असत्यं प्रबन्धं हस्ते न्यस्तमवकरमिवक्रामेव दूरे क्षिपति, सत्यं तु मूर्ध्नि समपूर्णं मुष्टु इत्युरीकरोति । उपरित पुष्पाणि वर्षन्ति । श्रीहर्षो राजदत्तार्थमिणमणिपुण्याक्षत्रिकः 'काश्मीरान्'गमत् । सरस्वती-हस्ते पुस्तकं न्यास्थत् । सरस्वत्या दूरे क्षिप्तं तत् । श्रीहर्षेण कथितम्— किं भारतीति शिक्षासि यत्सुष्ठुमपि प्रबन्धमिव प्रबन्धमिव मन्यसे ? । भारत्याह— भो परमर्मभाषक ! न स्मरसि यत्त्वया एकादशे सर्गे चतुर्थपद्ये अस्मे—

'देवी पवित्रितचतुर्भुजवामभागा
वागालपत् पुनरिमां गरिमाभिरामाम् ।
'एतस्य निष्कृपकृपाणसनाथपाणेः
पाणिग्रहादनुगृहाण गणं गुणानाम्' ॥१॥'

एवं मां विष्णुपत्नीत्वेन प्रकाश्य लोके मम कस्मात् कुमना-असि तत्तो मया पुस्तकं क्षिप्तम् ।

भाषकौ ब्राह्मणो व्याधिः पक्षात मर्मभाषकः ।
योगिनामप्यमर्षी एव प्रायेणोऽप्युत्कटः ॥२॥

---

१ ख– देवी काश्मीर २ ख– अस्यारि निष्कृप । ३ ख– ... ।
[illegible] ।

इति वाग्देवीवाच श्रुत्वा श्रीहर्षो वदति— किमर्थमेकस्मिन्नवतारे नारायणं पतिं चकृषी, त्व पुराणेष्वपि विष्णुपत्नीति पठ्यसे। तन 'सत्य किमिति कुप्यसि ? । कुपितै किं 'छुट्यते कलङ्कात् ? । इति श्रुत्वा स्वय गृहीत्वा पुस्तक हस्ते धारितम् । ग्रन्थश्च श्लाघित समासमक्षम् । श्रीहर्षेण पण्डिता उक्तास्तत्रत्याः— ग्रन्थमत्रत्याय राज्ञे माधवदेवनाम्ने दर्शयत । श्रीजयन्तचन्द्राय च शुद्धोऽय ग्रन्थ इति लेख प्रदत्त । इति श्रुतेऽपि ग्रन्थे भारत्यभिमते ज्ञातेऽपि ते लेख न ददते, न भूप दर्शयन्ति । स्थित श्रीहर्षो बहून् मासान् । जग्ध पाथेयम् । विक्रीत वृषभादि । मितीभूत परिच्छद ।

एकदा नद्यासन्नदेशे कूपतटासन्नतमे देवकुले रुद्रजप रह करोति । तत्रागते कयोश्चिद् गृहिणोरुल्लुण्ठे चेट्यौ । जलप्रथमपश्चाद्ग्रहणघटभरणविषये वादे लग्ने । तयोश्चिरमुक्तिप्रत्युक्तिरभूत् । शीर्षाणि स्फुटितानि घातप्रतिघातै । गते राजकुलम् । राजा साक्षिण गवेषयति । उक्ते ते— अत्र कलहे कोऽपि साक्षी विद्यते न वा ? । ताभ्यां जगदे—विप्र एकस्तत्रास्ते जपतत्पर । गता राजकीया । आनीत श्रीहर्षः पृष्टस्तयोर्नयानयौ । श्रीहर्षेण गीर्वाणवाण्योक्तम्— देव ! वैदेशिकोऽहम् । न वेद्मि किमप्येते प्राकृतवादिन्यौ ब्रूत , केवल तान् शब्दान् वेद्मि । राज्ञोक्तम्— ब्रूहि । तत्क्रमस्थमेव तद्भाषितप्रतिभाषितशतमभिहितमनेन । राजा चमत्कृत' । अहो प्रज्ञा ! अहो अवधारणा ! दास्योर्वाद निर्णीय यथासम्भव निग्रहानुग्रहौ कृत्वा प्रहित्य श्रीहर्षमपृच्छद् राजा— कस्त्वमेव मेधिरशिरोमणि ? । श्रीहर्षेणोक्त सर्वं कथानक स्वम् । राजन् ! पण्डितकृतदौर्जन्यात् तव पुरे दु खी तिष्ठामि । सम्यक्पारम्पर्यज्ञो राजा पण्डितानाहूयावादीत्— धिग् मूढा ! ईदृशेऽपि रत्ने न स्निह्यथ ? ।

---

१ ख—'सत्ये किमति०' । २ 'छूटाय छे' इति भाषायाम् ।

वरं प्रज्वलिते वह्नौ—पातय निहितं वपुः ।
न पुनर्गुणसम्पन्ने कृत स्वल्पोऽपि मत्सरः ॥१॥
वरं सा निर्गुणाऽस्त्वा यस्यां कोऽपि न मत्सरी ।
गुणपात्रे तु वैमुख्य माप शुभनसामपि ॥२॥

तस्मात् गतश्च नृपम् । गत्वा च एवं महाप्रबन्ध ग्रन्थेकं सम्मुख सम्मुख्य । तदा श्रीहर्षः प्राह यत्—

यथा यूनस्तद्वत्परमरमणीयाऽपि रमणी
कुमाराणामन्तःकरणहरणं नैव कुरुते ।
मदुक्तिश्चेदन्तर्मदयति सुधीभूय सुधिय
किमस्या नाम स्यादरसपुरुषानादरभरैः ? ॥१॥

इति श्रीहर्षेण पठिताः । सर्वे गृह गत्वा सन्तस्यानुलीय राजा च सम्मर्पिताः प्रहित श्रीहर्ष काशी(शी ?)'म् । चिन्तिते जयन्त चन्द्राय । ऊढ सर्वम् । तुष्टः सः । प्रसूत नैषधं काव्ये ।

अथान्तरे जयन्तचन्द्रस्य पद्माकरनाम्ना प्रधानवर श्रीभर्ग-हिकरपत्तनं गतः । तत्र शालापते रजकस्त्रीनाथ शालिकायां केतकमालिव मधुकरकुले निर्वापयमानं दृष्ट्वा विस्मितोऽस्थासीद् एव-मम्— यस्या युवतेरियं षष्टी तां न दर्शय । तस्य हि विधिना-स्त्रपयितीमे निर्णयस्य मनः । हर्षेन स्नाने यया तस्मै वस्तुं गत्वा समर्पयित्वा तत्स्वामिनी प्राप्तदेविनसी चाक्सरयिषया निपजा यौवनस्था रूपरूपा दर्शिता । तां श्रीकुमारपालनृप-पार्श्वभूपतेम्य तद्गृहपालीना सोमनाथयात्रां कृत्य 'काशीं' गत । तां पश्चिमी जयन्तचन्द्रोऽभिमानमकरोत् । प्राप्तदेवीमिति ख्यातिमगात् । सा च सगर्वा विदुषीति कृत्वा 'कलाभारती'ति

१ समुद्रम् २ रूपस्यानमे इति समानी । ३ कुमारपाल इति पकानी । ४ अकुररे । ५ क–'रूपस्पोरू' ६ ख–'मणरप्' । ७ विभारिणी । सभा–प–अतिरि' ८ ग 'अत्र' ।


पाठयति लोके। श्रीहर्षोऽपि 'नरभारती'ति पठ्यते। तस्य तन्न सहते सा मत्सरिणी।

एकदा ससत्कारमाकारितः श्रीहर्षः। भणितश्च– त्वं कः[1]। श्रीहर्षः– कलासर्वज्ञोऽहम्। राज्ञाऽभाणि– तर्हि मामुपानहौ परिधापय। को भावः[2]। यद्यहं न वेद्मि इति भणति द्विजत्वात् तर्हि अज्ञः। श्रीहर्षेणाङ्गीकृतम्। गतो निलयम्। तरुवल्कलैस्तथा तथा परिकर्मिते सायं लोलाक्षः सन् दूरस्थ स्वामिनीमाजूहवत्। चर्मकारविधिनोपानहौ पर्यदीधपत। 'अभ्युक्षणं निक्षिपच्च चर्मकारोऽहमिति वदन्। राजानमपि तत्कृतां कुचेष्टां ज्ञापयित्वा खिन्नो 'गङ्गा'तीरे मन्यासममहीत्। सा च सूहवदेविः साम्राज्येशा पुत्रमजनयत्। सोऽपि यौवनमाससाद। धीरः, परं दुर्नयमयः[3]। तस्य च राज्ञो विद्याधरमन्त्री। स च चिन्तामणिविनायकप्रसादात् सर्वधातुहैमत्वकरणप्रख्यातमाहात्म्यस्पर्शपाषाणलाभात् ८८०० विप्राणां भोजनं दाता, इति 'लघुयुधिष्ठिर'तया ख्यातः। कुशाग्रीयप्रज्ञः। राजा तं जगदे– राज्यं कस्मै कुमाराय ददामि?। मन्त्र्याह– मेघचन्द्राय सुवंशाय देहि, न पुनर्धूर्तापुत्राय। राजा तु तया कार्मणितस्तत्पुत्रायैव दित्सति। एवं विरोध उत्पन्नो मन्त्रि-राज्ञोः। कथङ्कथञ्चिन्मन्त्रिणा राज्ञीवाचमप्रमाणीकार्य भूपो मेघचन्द्रकुमाराय राज्यदानमङ्गीकारितः। राज्ञी क्रुद्धा। धनाढ्यतया स्वच्छन्दतया निजप्रधाननरान् प्रेष्य 'तक्षशिला'ऽधिपतिं सुरत्राणं[4] 'कासी'भञ्जनाय प्रयाणे प्रयाणे सपादलक्षहेमदानेन चालितः आयाति। तत् तु विद्याधरेण चरदृशा विदितम्। राज्ञे कथितम्। राजा तत्कार्मणोद्दिङ्मूढः[5] प्राह–ममेयं वल्लभेश्वरी नैव पतिद्रोहं समाचरति। मन्त्री तु वदति– राजन्! अमुकप्रयाणे तिष्ठति शाखीन्द्रः[6]। राज्ञा हक्कितो गतो गृहम्। चिन्तितं च तेन— नृपस्तावन्मूढः।

१ ग-'पाठते'। २ सिधनम्। ३ ख-'दुर्णय०'। ४ 'सुल्तान' इति भाषायाम्। ५ घ-'दृढमूढ'। ६ ख-'साखीन्द्रः'।

राज्ञी सवन्ती स्वमप्रसरा जातिवेशिनी । मम मरणं यदि त्वमि-मरणादर्वाग् भवेत् तदा सम्पातु । प्राणसम्भितो मन्त्री त्वत्समगात् । पवि गच्छन्तं 'पिप्पार्क ग्राम समविप्रसिपत् । पुन पुरो गत । स्वस्तिकयनमपिठ्ठमजाकेनय तदद्वे गतोऽप्रयत् । तेन कुवेराख्य देवालको विविधैपरीत्यं निर्वाणोपरातं गत्वा व्यज्ञपयत्– देव । अहं 'गङ्गा तटे महत्वा प्रिये प्रयाविज्ञासि । राजाऽऽस्मत्—यदि प्रियसे तदा सुखेन यामाम । कर्णज्वरो निवर्तते । मन्त्री दून हृदितवमानावर्णयन्, बलये दृष्टि प्रियेणापि देव निज गुरुमनेऽप्यतथा, मृत्यो निज पूर्वरूपाणि । आगत्य रत्नो मर णम् । राजाऽऽनमपृच्छय गृहं गत्वा सर्वस्वं विप्रादिभ्योऽयच्छत् प्रवास नमनिरच्छे अहाणीपचमर्यं प्रविश्य कुलपुरोहितमाह— दानं गृहाण । निर्मेणापि करः प्रसारितः । एष स्पर्शयापाचः । तेनो-क्तम्– किं ते दानं मद् आपाय दत्से । इति कुवेराणदत्तव विदिते । सोऽप्यय गङ्गायमुना भवे । मन्त्री पथे सहसा मृतः । राजाऽप्यापो यातः । सुरत्राण आयातः । नगरे माध्य मास्येव स्फुटितम् । राजा सुराणामिमुखमयाचत् । '८४ एतान्यपि निस्वानानि निवद्धे पर एकस्यापि निस्वानस्वनं राजा न शृणोति । आपृच्छय तत्स्थाम् । तैर्भणे– मोक्षमनुयान्ति महाणि व्यना-न्तराणि । राजा मध्ये अहारयत् । ततो न ज्ञायते किं हतो गतो मृतो वा । ग्रन्थाग्रं पू ॥

॥ इति श्रीहर्ष-विद्याधर-जयचन्द्रप्रबन्धः ॥ ११ ॥



१ निस्वनम् ... इति नास्ति । ४ क मन्दाम्' ३ ग ... निस्वानस्व । ... क-ग 'तत्स्थानं' । ५ 'आपृच्छयतत्' इत्यधिकं प-प्रतौ ।

[१२]

॥ अथ हरिहरप्रबन्धः ॥

'श्रीहर्ष'वंशे हरिहरः गौडदेश्यः सिद्धसारस्वतः । स 'गूर्जर'-धरां प्रत्यचालीत् । अश्वशतद्वयं, मानवानां शतपञ्चकं, करभा' पञ्चाशत् । अनिवारमन्नदानं 'धवलक्कक'तटग्राममागात् । राणश्री-वीरधवल-श्रीवस्तुपाल-श्रीसोमेश्वरदेवेभ्यः पृथक् पृथक् आशी-र्वादं प्रागल्भबटुहस्तेन प्राहैषीत् । श्रीवस्तुपालो जहर्ष । उत्थाय बटुं सह नीत्वा श्रीवीरधवलाय पण्डितस्याशीर्वादमदीदृशत् । तद्-गुणांश्चावर्णयत् । राणकेनोक्तम्— किमत्र युक्तम्? । मन्त्र्याह— देव ! विस्तरेण प्रातः पण्डितस्य प्रवेशमहोत्सवः क्रियते । विपुलं देयं दीयते । राणकेनोक्तम्— न्याय्यम्, ततो निवृत्तौ मन्त्रिराजश्च बटुश्च । बटुना तृतीयाशीर्वादः पण्डितसोमेश्वरदेवायादर्शि । कवितया तस्य मात्सर्यमदीपिष्ट । स निश्वासमधोऽद्राक्षीत् । बटु-मालापीदपि न । आगत उत्थाय बटुर्हरिहरान्तिकम् । उक्तं राणक-मन्त्रिणोः सौमनस्यं, सोमेश्वरस्य तु दौर्मनस्यम् । कुपितः सोमे-श्वरदेवे हरिहरः । जातं प्रातः । राणकः समन्त्रिकः सचातुर्वर्ण्यः सर्वद्धर्या सम्मुखो गतः । मिलितो हरिहरः । तत्र वीरधवलं प्रति—

शम्भु'र्मानस'सन्निधौ सुरधुनीं मूर्ध्ना दधानः स्थितः
श्रीकान्तश्चरणस्थितामपि वहन्नेतां निलीनोऽम्बुधौ ।
मग्नः पङ्करुहे कमण्डलुगतामेनां दधन्नाभिभू-
र्मन्ये वीर ! तव प्रतापदहनं ज्ञात्वोल्बणं भाविनम् ॥ १ ॥
दृष्टस्तेन शरान् किरन्नभिमुखः क्षत्रक्षये भार्गवो
दृष्टस्तेन निशाचरेश्वरवधव्यग्रो रघुग्रामणी ।

१ ख–'अभगार०' । २ ग–'धवलक्कनट०' । ३ क–'देवयोः' । ४ ख–ग 'बटुमाला०' । ५ विष्णु । ६ ब्रह्मा । ७ शार्दूल०

प्रस्तरेण ... गनोविदं सुमनापगि
छयो येन रणाङ्गणे सरस्वतीमस्तकपूजामपि ॥२॥

भट्ट एष पण्डितेन—अत्र सदसि सोमधरोऽस्ति न वा ? । भट्टराज—स ... । पण्डितो ज्ञातोऽस्मात् । यात प्रेक्षा । रामचन्द्र ... -कुम्भ-... -परिजन-... । अत्र ... गताऽसौ । पुनः सभा । ... । उक्तं च—

सुधा मधु सुधा सीधु, सुधा सोऽपि सुधारसः ।
आस्वादितं मनोहारि यदि हारिहरं वचः ॥ १ ॥

पण्डितस्तूर्ण—देव ! ... ! विचारचतुर्मुख ! सरस्वती-कण्ठाभरण ! ... वयं पण्डिता अस्माकं माता भारती सा च त्रिभुवनचारिणी ।

एकदा भारत्या सह महेन्द्रस्य सभामगमाम । सा च 'सुधर्मा' नाम । ... श्रीमान् । ... सुराङ्गना । ८४ सहस्राणि सामानिका । तथा

'हिरण्याक्षे वसो'ऽसौ विबोधेराखेलोहस ।
षट्त्रिंशत् तुषिताश्चैव यस्तिमास्करा अपि ॥ १ ॥'
षट्त्रिंशदधिके ... —राजवितथा दशे अमे ।

---

१ ... । २ ... । ३ ... । ४ ... ।
५ "... ।
... ॥
... ॥"
६ "... ।
... ॥
... ।
... ॥"
प–'...' । ९ ... । प–'...' ।

रुद्रा [1]एकादशैकोनं-पञ्चाशद् वायवोऽपि च ॥ २ ॥[2]

चतुर्दश तु वैकुण्ठा, सुशर्माणः पुनर्दश।

साध्याश्च द्वादशेत्याद्या, प्रसिद्धा गणदेवताः ॥ ३ ॥[4]

[5]एतत्समृद्धिस्वरूपं विलोक्य वयं विस्मिताः स्थिताः । अहो! तपः-फलभोग [6]इत्यादि चिन्तयन्तो यावता स्म । अत्रान्तरे आगतस्तत्र [7]कश्चन [8]बुम्बां पातयन्नाह—

---

१ "अज-एकपादऽहिब्र(र्बु)ध्न-स्त्वष्टा रुद्रश्च वीर्य्यवान् ।
त्वष्टुश्चाप्यात्मजः पुत्रो, विश्वरूपो महातपाः ॥
हरश्च बहुरूपश्च, त्र्यम्बकश्चापराजितः ।
वृषाकपिश्च शम्भुश्च, कपर्दी रैवतस्तथा ॥
एकादशैते कथिता, रुद्रास्त्रिभुवनेश्वराः ।"

इति गरुडपुराणे षष्ठेऽध्याये । अज, एकपात्, अहिब्र(र्बु)ध्न, पिनाकी, अपराजितः, त्र्यम्बक, महेश्वर, वृषाकपि, शम्भु, हरण, ईश्वर इति महाभारते दानधर्माधिकारे ।

२ "एकज्योतिश्च द्विज्योति-स्त्रिज्योतिर्ज्योतिरेव च ।
एकशक्रो द्विशक्रश्च, त्रिशक्रश्च महाबलः ॥
इन्द्रश्च मत्यदृश्यश्च, ततः पतिसकृत्परः ।
मितश्च सम्मितश्चैव, सुमितश्च महाबलः ॥
ऋतजित् सत्यजिच्चैव, सुषेणः सेनजित् तथा ।
अन्तिमित्रोऽनमित्रश्च, पुरुमित्रोऽपराजितः ॥
ऋतश्च ऋतवाहश्च, धर्ता च धरुणो ध्रुवः ।
विधारणो नाम तथा, देवदेवो महाबलः ॥
ईदृक्षश्चाप्यदृक्षश्च, एते दश मिताशिनः ।
मतिनः प्रसदृक्षश्च, समरश्च महायशाः ॥
धाता दुर्गो धितिर्भीम-स्त्वभियुक्तस्त्वपात् सह ।
धुतिर्वपुरनाम्योऽथ, वासः कामो जयो विराट् ।
इत्येकोनाश्च पञ्चाशन्-मरुतः पूर्वसम्भवाः ॥"

इति वह्निपुराणे गणभेदनामाध्याये ।

३-४ अनुष्टुप् । ५ ग-पुस्तके ' एतद्० विलोक्य ' एतदधिकम् । ६ ग-पुस्तके 'इत्यादि० स्म ' एतदधिकम्' । ७ ग-'कोऽपि' । ८ घ-'बुम्बानवकृत्' । ९ 'बूम पाडतो' इति भाषायाम् ।

देव । स्वजन । सर्वं मनु न इह प्रमाणमस्मा वस्मात्
सेन्नमन् न च देवान्तरद इव इमाः मानमत् सम्पूत ।
ईं स मानोन्नेमन् स्मि वचनात् मनवमो कदेव
मीनरुद्धेन्नमनु — त्रिजगदं । वस्तुपालस्य वे ॥१॥

सर्वे मयस्ते जना विस्मितास्ते पारस्या गत पञ्चषस्तुतं स्ता प्रवनम्य । एव विना शास्त्रं व्यवहाय विना पण्डितः । प्रश्नो नगर् कि दर्शन हरि विस्मरति नगर् 'वाईपांदेवपाल श्रीमद्वस जाता वस्तुपाले' चतुर्विंशतिप्रबन्ध च दिव्य दर्श प्रापनमर्थं गम् । तदेव पण्डितस्य सर्वं दत्तम् । गुरुश्री पञ्चम-कलानामसि हनुमता स्वयंवरकल्पत् ।

नगरे कदिरुप्रा विभिन्नयां सामर्थ्यां पुर च मामधर राजनेन षष्ठि-पुरीहर जता — पण्डित । तत्र गुर्जरमधिवीर मातापमाहेव भागर्नं कलितं दृष्टि । तस्याशरीरमाम्यवसायेन रामं सामधरदेवासनात् कलितम् । तत्र मस्मादेव तनु । यथा पुत्रस्ते निमषे सप्ति जनरो मम । महाशरणं प्रति रतौ जीवनधरीश्च मनः । हरिहरगाव गम् कल्पस्थानानि । उच्चानि सामधरस्य तानि । पुष्टा तानि हरिहर उत्ते—वत । इतु काम्यानि परिविधानि च न । यथा 'प्राणदेवे' प्रभवन्ती गीरस्तावि नरस्वतीसमभाष्य' प्रासादगर्भगृहे प्रतिमायां श्रीमोबिरदवर्धमानस्याभ्यसूनाह्न । यदि तु मास्ये मालिन तस परिपाठ्य कृतपन् । इतुमता सौम्य-स्मनिवासपराठ्य । निवा राणाय । सौम्यः गम्य । स्वविना श्रीवस्तुपालास्य समाना । हरिणा सभा । हन इव पुरा इव स्तम्भित इव जडित इव जाम सोमेश्वरः । गत स्वगृहम् । दिपा परम न दृष्टानि गृहेऽपि का कथा राजदरिद्रसमागमस्य ॥ ।

अथ सामधरो श्रीवस्तुपालसमन्दिर गतोवाच—मन्त्रिन् । अमेव तानि वस्त्राणि आम्यया; मम तानि जानासि त्वम् । हरिहरस्तेन

१ कस्यता । २ साधुं इति कस्यचम् । ३ क पूजनम् ।

मां व्यजूगुपत् । किमहं करोमि ? । मन्त्र्याह — तमेव शरणं श्रय । यतः — ' भजते विदेशमधिकेन जितस्तदनुप्रवेशमथवा कुशले. ' इति न्यायात् । पण्डितः — तर्हि मां नय । तथा कृतं मन्त्रिणा । पण्डितसोमेश्वरं बहिरासयित्वा मन्त्री स्वयं हरिहरान्तिकमगात् । बभाण च–पण्डितसोमेश्वरदेवस्तवान्तिकमागतोऽस्ति विशीप्सुः । हसितो हरिहरः । आनीनयत् स्वसमीपम् । चकाराभ्युत्थाना-ऽऽलिङ्गन-महासनादिसत्कारम्। सोमेश्वरेणोक्तम्– पण्डित ! निस्तारय मामस्मात् परकाव्यहरणकलङ्कपङ्कात् । यतः –

आगतस्य निजगेहमप्यरे–गौरवं विदधते महाधियः ।
मीनमात्मसदनं समेयुषो, गीष्पतिर्व्यधित तुङ्गतां कवेः ॥१॥[1]

तुष्टो हरिहरो भणति स्म–मा स्म चिन्तां विधाः । पुनर्गौरवमारोपयिताऽस्मि त्वाम् । गतः स्वस्थानं मन्त्री सोमेश्वरश्च । प्रत्यूपे राणकसमासरे सोमेश्वर आह्वायितः । प्रस्तावना चारब्धा । यथा– जयति परमेश्वरी भारती यत्प्रसादादेव मम शक्तिः । श्रीवस्तुपालेनोक्तम्– किं किम ? । हरिहरः—देव ! मया 'कावे(वे?)री'नदीतटे 'सारस्वत'मन्त्रः साधितः । होमकाले गीर्देवी प्रत्यक्षाऽऽसीत् । वरं वृणीष्वेत्याह स्म । मया जगदे—जगदेकमातः ! यदि तुष्टाऽसि तदा एकदा भणितानां १०८ सङ्ख्यानां ऋचां षट्पदानां काव्यानां वस्तुकानां वृत्तानां[2] दण्डकानां वाऽवधारणे समर्थो भूयासम् । देव्याचष्ट– तथाऽस्तु । ततः प्रभृति यो यदाह १०८ तत् तु ब्रुवे, यथेदं सोमेश्वरदेवोपज्ञं काव्याष्टोत्तरशतम् । राणकेनोक्तम्— प्रत्ययः कार्यताम् । भणितान्यष्टोत्तरशतानि तत्तच्छन्दसा प्रतिभाणितानि च हरिहरेण तानि । जातो निश्चयः पण्डितहरिहरवचने । क्षुत्तृष्णातपप्रभृतिचिन्तानपेक्षं स्थितो

१ रथोद्धता' । २ घ–'वृत्तानां' ।

श्लोक । रेम्पकेवरोण भणम्—सर्हि पण्डित ! अवमर्षं दृनिः सामेश्वर ! । हरिहरः प्रभाषत—देव ! राजेन्द्र ! पण्डितेन मन्मथा यशे तन्मनमि दवे । यत—

श्रियं वा विविध वाऽपि सविशेषं पदार्पिनाद् ।

प्रकथयन्ति ये नैव तेभ्य स्याऽम्युर्वरा वरा ॥ १ ॥

एवम् प्राह तर्दसरोवम्, परं मिथ सरस्वतीपुत्रयाः स्नेहो पुष्कः । इत्युक्त्वा वन्म्यमस्यमवारयत् । भितो विभ्रमद् सामेश्वर । पतेन्नि निमन्त्रिण श्री । हरिहरः नैपधकाव्यमवसरोचितमपि पठति । श्रीवस्तुपाल श्रीयते अहो मधुनर्तूर्णमपि काव्यम्यवृत्ति ! ।

एकदाऽऽभाषित पण्डितहरिहरा—कोऽयं ग्रन्थः ? । पण्डितो भणति—नैषधं महाकाव्यम् । कः कविः ? । श्रीहर्षः । श्रीवस्तुपालेन गदितम्—तद्धस्तो दर्शय तर्हि । पण्डितो वृते मान्यतार्थं ग्रन्थ, चतुरो यामानर्पयिष्यामि पुस्तिकाम् । अर्पित पुस्तिका । रात्रौ सद्यो लेखकनियोगितिर्मिलिखिता नवीना पुस्तिका । मं गारम्भा(म्मनां) धृता । पावस्थ्यलेन वृत्तरीकृत्य मुक्ती । प्रातः पण्डिताय पुस्तिका दत्ता । गृहीता नरिर्द समयम् । गृहीत्वा पण्डितेन पुस्तिका । मन्त्रिणा न्यगादि—अस्माकमपि कोपे किमारण्यो यमकमिति स्मरामः । विलोकयन्तु केशा । यावद् विलोकेते कृत्वा नवीना प्रतिः पावस्थ्येप्यते तावद् "निपीय यस्य क्षितिरक्षिण कथा इत्यादि नवधुरपठित । एवं पण्डितहरिहरेणोक्तम्—मन्त्रिन् ! तवैव सांप्रतम् । "प्रतीकेषु सर्वेषु मान्यस्य कमते मतिः" । पुस्ते लब्ध हरिहरः प्रतिपन्नः, स्थापितमपि जैन वैष्णव-शैवतास्यानि उपरि च स्वामिनेयाः, यत्पैः प्रभा प्रकाशते ।

अथान्तरे वीरधवलप्रवितीर्णपण्डितेन महाराजमुख्य

---

१ ग 'पतैर्गतेष' । २ अस्तुर् । ३ घ—च्यारी हरिहरः पण्डितार्थ) । ४ क—ख 'पुन' । ५ घ करेण (?) लोष' । ६ ग 'पतैर्गतेष' ।

सपादकोटिहेमप्रमितो दण्डः प्रहितः । श्रीवस्तुपालेन तु तद् हेम चतुर्दिग्यात्रिकेभ्यो याचकेभ्योऽदायि विवेकात् । तद् दृष्ट्वा हरिहरो वर्णयति—

आः साम्यं न सहेऽहमस्य किमपि क्रोडीकृतैकश्रियो
याञ्चोत्तानकरेण खर्वितनिजाकारोष्मणा शार्ङ्गिणा[1] ।
येनैता पुरुषोत्तमाधिकगुणोद्गारेण युद्धार्णवा-[2]
दाकृष्यैव तथा श्रियः शकलशः कृत्वाऽर्थिनामर्पिता ॥३॥[3]

तदा वीरधवलस्य 'सपादकोटीकाञ्चनवर्ष' इति भट्टादिषु विरुदख्यातिमायातम् । अथ हरिहरः सोमेश्वरं नन्तुं गतो 'देवपत्तन'म् । पण्डितसोमेश्वरदेवस्य तत्र तद् दौर्जन्यं स्मृत्वा विषण्णेन काव्यं भणितम्—

क्व यातु क्वायातु क्व वदतु समं केन पठतु ?
क्व काव्यान्यव्याजं रचयतु सदः कस्य विशतु ? ।
खलव्यालग्रस्ते जगति न गतिः क्वापि कृतिना—
मिति ज्ञात्वा तत्त्वं हर ! हर विमूढो हरिहरः ॥४॥[4]

आरुक्षाम नृपप्रसादकणिकामद्राक्ष्म लक्ष्मीलवान्
किञ्चिद् वाङ्मयमभ्यगीष्महि गुणैः कांश्चित् पराजेष्महि ।
इत्थं मोहमयीमकार्ष्म कियतीं नानर्थकन्थी[5] मनः
स्वाधीनीकृतशुद्धबोधमधुना वाञ्छत्यऽमर्त्यापगाम् ॥२॥[7]

इत्युक्त्वा धनार्धं दत्त्वा शेषार्धं गृहीत्वा 'धवलक्क'मध्ये भूत्वा राणक-मन्त्रिणौ आपृच्छ्य 'कासीं' प्राप्य स्वार्थमसाधयत् ।

॥ इति हरिहरप्रबन्धः ॥१२॥[8]



१ ग 'शार्ङ्गिणा', ख–'शार्ङ्गिणा'। २ ग–'युद्धार्णवा–'। ३ शार्दूल०। ४ शिखरिणी। ५ घ–'कन्था' । ६ स्वर्गगाम् । ७ शार्दूल० । ८ 'समाप्त' इत्यधिको ग–पाठः।

[११]

॥ अथ अमरप्रबन्धः ॥

श्री[1]अणहिल्लपत्तना[2]सन्ने 'वायट' नाम महास्थानमस्ति चातुर्विद्यनिवासस्थानमस्त्यनघम् । तत्र परपुरप्रवेशादिविद्यासम्पन्नश्रीजीवदेवसूरिसन्ताने श्रीजिनदत्तसूरयो बभूवुः । तेषां शिष्योऽमरो नाम प्रज्ञाचूडामणिः । स श्रीजिनदत्तसूरिमुखात् कविराजात् अरिसिंहात् 'सिद्धसारस्वतं' मन्त्रमध्यैष्ट । तन्मन्त्रमाराधयितुं विवेकविलासे कोष्ठागारिकस्य पद्मस्य निर्मापितेऽनेकचैत्यके त्रिदशे एव [illegible]-ऽऽम्लयवन्‌[illegible]-[अष]कमारि[illegible] मन्त्रमजपत् । विलम्ब काल न चके । एकविंशतितमे रात्रौ मध्यप्रहरे [illegible] करकमण्डलुमध्यवर्त्यमृतमपाययत् परं च प्रादात्— सिद्धकविर्भव [illegible] । इति वर दत्त्वा गता भगवती । जातः कविशिरोमणिः । रचिता काव्यकल्पलता नाम कविशिक्षा छन्दोरत्नावली मुक्तावली च । कलाकलापाख्यं च शास्त्रं निर्मितं बालभारतं च । बालभारते (स. ११) प्रभातवर्णने (श्लो. ६)—

> "दधिमथनविलोलल्लोलदृग्वेणिदम्भा-
> दयमदयमनङ्गो विश्वविश्वैकजेता ।
> भवपरिभवकोपत्यक्तबाणः कृपाण-
> श्रममिव दिवसादौ व्यक्तशक्तिर्व्यनक्ति" ॥१॥

इत्यत्र वेण्याः कृपाणेन उपमानात् 'वेणीकृपाणामर' इति बिरुदं कविर्लेभे । [illegible] 'दीपिका[illegible]'वत् 'कल्पलता'वत् । कवीन्द्र-

---

१ प–'[illegible] श्री' । २ प 'पत्तनासन्ने' [illegible] प–'[illegible]' । ३ प– '[illegible]' । ४ प–'[illegible] वर्तिन' ५ प–'[illegible]' ६ प 'पीतवीवा' प– '[illegible]' प–'[illegible]' ७ [illegible] ८ प–'[illegible]समरेण [illegible]' ।

प्रसिद्धेश्व 'महाराष्ट्र'दिराजेन्द्राणा पूजा उपतस्थिरे । तदा 'वि(वी)-सलदेवो[1] राजा 'गूर्जरा'धिपति'धवलक्कके' राज्य शास्ति, तेनाऽमरकवेर्गुणग्राम श्रुत । ठक्कुरं[2] वइजलं प्रधान प्रेष्य प्रातराहूतः कवीन्द्र । आसनादिप्रतिपत्ति कृता । सभा महती । अमरेण पठितम्—

वीक्ष्यैतद्भुजविक्रमक्रमचमत्कार न(नि)कार मयि
 [3]प्रेम्णो नूनमिय करिष्यति गुणग्रामैकगृध्नाशया ।
श्रीमद्वीसलदेव ! देवरमणीवृन्दे त्वदायोधने
 प्रेक्ष्य प्रक्षुभिते विमुञ्चति परीरम्भान्न रम्भां हरि ॥१॥[4]

त्वत्प्रारब्धप्रचण्डप्रधननिधनतारातिवीरातिरेक-
 क्रीडत्कीलालकुल्यावलिभिरलमत स्यन्दमाकन्दमुर्वी ॥
दम्भोलिस्तम्भमास्वद्भुज ! भुजग[5]जगद्भर्तुराभर्तुरेनां
 तेनाय मूर्ध्नि रत्नद्युतिततिमिपत शोमते शोणभाव ॥२॥[6]

रञ्जिता सभा, प्रीणित पृथ्वीपाल । ततो राज्ञा प्रोक्तम्— यूय कवीन्द्रा श्रूयध्वे । अमरोऽभिधत्ते— सत्यमेव यदि गवेषयति देव । ततो नृपेण सोमेश्वरदेवे दृष्टि सञ्चारिता । तत सोमेश्वरेण समस्याऽर्पिता । यथा—

'शीर्षाणां सैव वन्ध्या मम नवतिरभूल्लोचनानामशीति' ।

अमरेण सद्य पूरिता —

'कैषा भूपा शिरोऽक्ष्णां तव भुजगपते ! [7]रेखयामास भूत्या
 द्यूते [8]मन्मूर्ध्नि शम्भु सैदशनवशतानक्षपातान् विजित्य ।
गौरी त्वानक्ष दृष्टीर्जितनखनवभूस्तद्विशेषात् तदित्य
 शीर्षाणा सैव वन्ध्या मम नवतिरभूल्लोचनानामशीति.॥१॥[11]

---

१ ख-'विम्वलदेवो' । २ घ-'ठक्कुरवइ०' । ३ क-'प्रेम्णा'। ४ शार्दूल० ५ ग-घ-'भुजगभुजजग०' । ६ स्रग्धरा । ७ 'रेपय.०' । ८ घ 'सन्मूर्ध्नि' । ९ ९१० । १० १९२० । ११ स्रग्धरा ।

केन शिरोऽपरमिति शिरसा पुच्छमावरणमिति मध्यमपदलोपी समासः कार्यः। इन्द्रे तु प्राण्यङ्गत्वादेकत्वं प्राप्नोति। ततो 'वाम' स्वकीयकनिष्ठोमादिरूपेण समस्या दत्ता—

'चतुर्भोऽपि मृगस्तदुपरि गिरिस्तत्र वह्निः' ।

अपरेणोक्तम्—

मन्वस्मृत् माके हिमकरकराभे गिरिसुता
कमठस्पर्शे हरिणमनुकुम्भ्यपरिस्थिते ।
नर्मदेवत्वापन्ने परमसरित् तत्र तदहो
चतुर्भोऽपि मृगस्तदुपरि गिरिस्तत्र वह्निः ॥२॥[1]

तत 'कुम्भ'नगरवास्तव्येन कमठादिरूपेण समस्या वितीर्णा—

पराग्निकन्यामध्ये हस्तिपूर्णं भविष्यम् ।

अपरेण पूरे—

तद्विपिनविहारोद्भूतं मम यशो-
मकरगामध्ये हस्तिपूर्णं भविष्यम् ।
देव ! मत न जानासि किं कुम्भोऽप्येव चार्थः
प्रतुष्टिमिमि तत्रे नापि मध्य कलेन ॥३॥

अथ 'श्रीसज्जमरी'येण नानारूपेण समस्या विन्यस्ता—

गीतं न गायतितरां युवतिर्निशासु ।

अपरेणोक्तम्—

कृष्णा मनोर्मधुरतां सहसाऽप्रतीतैं
भूमौ मृगो विगतलाञ्छन एव चन्द्रः ।
मा गन्धवीनिमदनस्य मुखानिलेन
गीतं न गायतितरां युवतिर्निशासु ॥४॥

---

१ 'मन' इत्यस्य 'मतीति' इति यावत् पाठः प्रतिरो नास्ति। इति सम्पादक वै-मतिकमात् । २ क- 'मम देवे' । ३ शिवकीर्ती । ४ क- 'मम दम ग' ५- 'दम कर ग' । ५ मतिकीर्ती । ६ दलम्य ।

एवं अष्टोत्तरं शतं बहुकविदत्ताः पूरिताः समस्याः श्रीअमरेण। ततो राज्ञाऽभिहितम्— सत्यं कविसार्वभौमः श्रीअमरः। तत्र दिने सन्ध्यावधि सभा निषण्णा स्थिता। राजा लङ्घितं सभ्यलोकोऽपि। 'रसावेशे हि कालो द्रैर्गच्छन्नपि न लक्ष्यते'। द्वितीयं दिनं सर्वं काव्यमयैः प्रमाणोपन्यासैः प्रामाणिका [2]जिता। तृतीयदिने राज्ञा पृष्टम्— अस्माकं सम्प्रति का चिन्ताऽस्तीति कथ्यताम्। अमरेण भणितम्— देव! कथं दूरं गतः स्वर्गे ऐरावणस्य दक्षिणकर्णे लुकिता। भूपतिः स्वसंवादेऽमोदत, शिरोऽधुनोत्। नित्यं गमनागमने जिनधर्मासन्नः कृतो राजा चैत्येषु पूजां कारयति।

एकदा नृपेण पृष्टम्— भवतां कः कलागुरुः? । अमरेण गदितम्— अरिसिंहः कविराज इति। तर्हि प्रातरत्रानेयः। अमरचन्द्रेणानीतः प्रातः कविराज उपराजम्। तदा राजा खड्गेन श्रमयन्नास्ते। राज्ञा पृष्टम्— अयं कविराजः? । कविराजेन व्याजह्ने— ओमिति। राजाऽऽह—तर्हि वद कालोचितं किञ्चित्। [4]अरिसिंहः कवयति—

त्वत्कृपाणविनिर्माण—शेषद्रव्येण वेधसा।
कृतः कृतान्तः सर्पस्तु, करोद्वर्तनवर्तिभिः ॥१॥[5]

[6]अच्छाच्छाभ्यधिकार्पणं किमपि यः पाणे कृपाणेर्गुणं
सञ्चक्राम स यद् ददौ घुपदवीं प्रत्यर्थिषु क्ष्मार्थिषु।
त्वत्सङ्गान्न स बद्धमुष्टिरभवद् येनारिपृथ्वीभुजां
पृष्ठेषु स्वमपि प्रकाममुदितं प्रोद्दामरोमोद्गमम् ॥२॥[8]

कलयसि किमिह कृपाणं, वीसल! बलवन्ति शत्रुषु तृणानि।
यानि मुखगानि तेषां, न चैष लङ्घयितुमसमर्थः ॥३॥[10]

---

१ 'मोदितम्'। २ ग-'जाता'। ३ घ -'अमरसिंहकवि०'। ४ घ -'अमरसिंह'। ५ अनुष्टुप्। ६ ग—'अत्यर्थाभ्यधिका०'। ७ क-'मतिप्रकाम'। ८ शार्दूल०। ९ घ-'सर्वेष'। १० आर्या।

देव! त्वं 'मलया'चलोऽसि भवतः श्रीखण्डशाखी भुज-
स्तत्र क्रीडति कज्जलाङ्कितसितप्रान्तासिरिह पन्नगी ।
एष त्वत्कृपणकर्णकं रिपुतरुस्कन्धेषु सञ्चेष्टते
दीर्घं व्योमविसारिनिर्मलयशो निर्मोकमुन्मुञ्चति ॥२॥[1]

इत्थं प्रस्तुतकविताप्रसादात् कवीराजो राजेन्द्रेण निजस्वेनकः कृत । मासे मासान् प्रसादश्च ।

एकदा श्रीवीसलदेवेन मालवान्तं दूतं प्रति कृत्वाऽरिसिंहोऽ भिहिते– इदं दूतं स्फुरं वर्णय । यदि कवितमेकया वर्णयसि तदा मालवगुम्फम्, अन्यथा सर्वमालवमापणम् । इत्युक्तिसमकाल-मेवागतमविसम्भया स ऊचे—

धारोऽयमिव 'दिग्विजयी नभस्तिमिरं धर्मं कुर्वन्दुर्मुखा-
प्युत्तम सुधामिवं तु स्तुजनस्तेव पीना दुग्धे ।
पीयूषमथो गतो वैदग्ध्यमान् दत्त्वा यशस्तं त्रिये
देव! मालवराजलक्ष्मीकुचो निर्याति चारित्रिणाम् ॥१॥

वनिता भूपाल । मालवीगुम्फं ददस्व । तैलगन्तरऽमरेण कोणापरिकत्समभिया पञ्चानन्दाऽऽलम्ब सात रचितम् । एवं कविना स्तोकेनाभाग्यं प्रतिहरिनम् ॥

॥ इति अमरचन्द्रकविप्रबन्धः ॥ ११ ॥



१ क–'दक्ष मौलिरि' २ ख–'तां बल ३ वर्णिक । ४ धातेन । ५ ख–ग–'मीसितो नर्त्त' । ६ क–'नवनीत(?) दत्त्व' । ७ ख 'स्तवपूर्ण । वर्णित । ८ ख 'मयतली घ । ९ ख–'मालवनरेव यमरेव'

[१४]

॥ अथ मदनकीर्तिप्रबन्धः ॥

'उज्जयिन्यां' **विशालकीर्तिर्दिगम्बरः** । तच्छिष्यो **मदनकीर्तिः** । स पूर्वपश्चिमोत्तरासु तिसृषु दिक्षु वादिनः सर्वान् विजित्य 'महाप्रामाणिकचूडामणि'रिति बिरुदमुपार्ज्य स्वगुर्वलङ्कृता'मुज्जयिनी'मागात् । गुरूनवन्दिष्ट । पूर्वमपि जनपरम्पराश्रुततत्कीर्तिः[1] स **मदनकीर्तिः** भूयिष्ठमश्लाघिष्ट । सोऽपि प्रामोदिष्ट । दिनकतिपयानन्तरं च गुरुं न्यगादीत्– भगवन् ! दाक्षिण्यात्यान् वादिनो विजेतुमीहे । तत्र गच्छामि । अनुज्ञा दीयताम् । गुरुणोक्तम्–– वत्स ! दक्षिणां मा गाः । स हि भोगनिधिर्देशः । को नाम तत्र गतो दर्शन्यपि न तपसो भ्रश्येत्[2] । तद् गुरुवचनं विलङ्घ्य विद्यामदाध्मातो जालकुद्दालनिश्रेण्यादिभिः प्रभूतैश्च शिष्यैः परिकरितो 'महाराष्ट्र'दिवादिनो मृदनन् 'कर्णाट'देशमाप । तत्र 'विजयपुरे' **कुन्तिभोजं** नाम राजानं स्वयं त्रैविद्यविदं विद्वत्प्रियं सदसि निषण्णं स द्वास्थनिवेदितो ददर्श तमुपश्लोकयामास––

देव ! त्वद्भुजदण्डदर्पगरिमोद्गारप्रतापानल–
ज्वालापक्त्रिमकीर्तिपारदघटीविस्फोटिनो बिन्दवः ।
शेषाहिः कति तारकाः कति कति क्षीराम्बुधिः कत्यपि
प्रालेयाचल[3]-शङ्ख-शुक्ति-करका-कर्पूर-कुन्देन्दवः ॥१॥[4]

कीर्तिः के कति कुन्तिभोज ! भवतः स्वर्वाहिनीगाहिनी
दिक्पालान् परितः परीत्य दधती भास्वन्मयं गोऽक्रम् ।
लङ्घित्वाऽम्बुधिसप्तमण्डलभुवस्त्वय्येकपत्नीव्रत–
ख्यात्यै[6] विष्णुपदं स्पृशत्यविरतं शेषाहिशीर्षाण्यपि ॥२॥[7]

---

१ घ–'परम्पराच्छुत०' । २ तत्त्वज्ञानी । ३ हिमालयगिरि० । ४ शार्दूल० ।
५ क्षारोदक-इक्षुरसोदक-सुरोदक-घृतोदक-दधि मण्डोदक शुद्धोदक-क्षीरोदक नामानः सप्त समुद्राः । ६ क–'स्यात्यैर्विष्णु०', घ–'ख्यात्ये विष्णु०' । । ७ शार्दूल० ।

चमत्कृतो राजा । स्थापिता दिगम्बर- श्वेताम्बरभेदो । राजाऽऽदिष्टम्– प्रत्यमेव कुरु असम्पूर्णजनर्णनप्रतिपन्नम् । तेनोक्तम्– देव ! अहं श्लोकपञ्चशतीं एकस्मिन् दिने कर्तुं क्षमः, तावत् तु वेश्मिन्तु न क्षमोऽस्मि । कविवृन्देभ्यः समर्पयताम् । राज्ञोक्तम्–अस्मत् पुत्री मदनमञ्जरी नाम शिक्षिष्यति जवनिकाऽन्तरिता सती । दिगम्बरेण ग्रन्थं कर्तुमारेभे । राजपुत्री पञ्चशती लिखति । एवं कत्यपयहानि यथुः ।

एकदा राजसुता तस्य स्वरं कोकिलस्वरविस्वरं शृण्वती सती चिन्तयति– अस्य रूपमपि सुन्दरं भविष्यति । जवनिकान्तरितं तदा रूपं दृश्यते ? । करोमि तदनुपायम् । रसरसां रचनाचातुर्यं वरयामि । अपरि राजपुत्री कादम्बिनी सुन्दरं दिदृक्षन् । तन्मानितवे दिगम्बर ऊचे— अहो 'रूपणिमा ! । राजपुत्र्याभिदधे— अहो निपुणता ! । जवनिकापटमपसार्य दृष्टे द्वे वदना अन्योन्यां ममदिरामयौ मदनमयौ च जनितौ । परस्परं दिगम्बरदर्शनम् । आयता दिग्म्बरेणोक्तम्—

निर्वर्तक अनगन्धे नलिन्या यथा न दृष्टे दृष्टिचोदनिमत् ।
राजसुतयाऽपि भणितम्—
दर्शितविन्तोसरि निम्बनैव देवा प्रभुत्वा नलिनी न चम ॥१०॥

तत्रानु प्रीतिमुद्रणस्नेहाऽररमणि सुरभवासवाराभ्यासीति प्रयाणाविरन्ति महते मम श्रीमारवेत तयोः । पतने दिवस । अन्ये निगदने प्रत्यः । आप राजा लिलोकयति राजानम् । को हेतुरत्र स्पर्धं निश्चयम्[१] । दिगम्बरमेतु त्रिनयुरानि विस्मृतानि पदानि विस्थिपने । ततो राजाऽपि भणति— देव ! मम प्रतिज्ञा—सदमनुप्रयम [illegible] देवेषु पार्थांश देवयाधि । तच तु पुत्र्या इदं स्थाने दृष्टेन वरम् । इति काश्चीश्वरात् प्रभावास्तत्र आप्ते । राजेन्द्री विग्

१. [illegible] २. [illegible] ३. [illegible] ४. [illegible] ५. 'पट्टे' । ६. [illegible]

शति– शठोत्तरमेवेदं दृश्यते। एकदा '[1]ईक्ष्यामि किमिमौ समाचरतः'। निशायां विभातायां एकदा राजा छन्नरूप एकाकी तयोर्ग्रन्थनिष्पत्तिप्रदेशकुड्यान्तरेऽस्थात्। तदैव दिग्पटो राजपुत्रीं प्रति प्रणयकलहानुनयगर्भमाह—

सुभ्रु ! त्वं कुपितेत्यपास्तमशनं त्यक्ता कथा योषितां
दूरादेव निराकृताः सुरभयः स्रग्गन्धधूपादयः ।
रागं रागिणि ! मुञ्च मय्यवनते दृष्टे प्रसीदाधुना
सत्यं त्वद्विरहे भवन्ति दयिते ! सर्वा ममान्धा दिशः ॥१॥[2]

एतत्काव्यश्रवणाद् द्वयोर्दौःशील्यं निर्णीय मन्दपदं निर्ययौ। स्थानं गतो वसुधाधिपः। क्रुद्धेन तेन तत्कालमाहूतो दिक्पटः, आगतो भाषितः, यथा– पण्डित! किमिदं नवीनं पद्यम्– 'सुभ्रु[3]! त्वं कुपितेत्यपास्तमशनम्' इत्यादि?। दिग्वसनेन विमृष्टम्– राज्ञा हेरितोऽहम्। अपराधी लब्धः। तथाप्युत्तरं ददामि यथातथा। इति चिन्तयित्वाऽवनिपतिमभ्यधात्— देव! दिनद्वयात् प्रभृति दृग् मे पीडाऽऽर्ता वर्तते। तदुपश्लोकायानुनयपरं पद्यमिदमपाठिषम्। इति प्रस्तावनां कृत्वा निक्षोभस्तथैव भङ्ग्या सद्यो व्याचचक्षे। तया प्रज्ञया तुष्टोऽन्तः क्षितिपः, अकृत्यकरणदर्शनात् तु रुष्टः। सभ्रूभङ्गं भृत्यानूचे– वध्यतां रे अमुं कुकर्मकारिणं घातयत च। बद्धस्तैः। तदाकर्ण्य राजपुत्री द्वात्रिंशता सखीभिः शस्त्रिकापाणिभिः[4] समं आगात्। राजदृष्टिमेत्य स्वयमकथयत्– यद्यमुं मे मनोरुच्यं मुञ्चसे तदा चारु, अथ न मुञ्चसे तदा चतुस्त्रिंशद्धत्या भवितारः – एका दिगम्बरहत्या त्रयस्त्रिंशद्युवतिहत्या इति। ततो राजा मन्त्रिभिर्विज्ञप्तः – देव! त्वयैवेयमस्यासन्नीकृता। यूनां स्त्रीसन्निधानं च मन्मथद्रुमदोहदः। कस्य दोषो दीयते?।

चित्रस्था अपि चेतांसि, हरन्ति हरिणीदृशः।
किं पुनस्ताः स्मरस्मेर–विभ्रमभ्रमितेक्षणाः? ॥१॥[5]

१ नररूपेण पश्यामि (?)। २ शार्दूल०। ३ ख घ 'सुभ्रू'। ४ घ–'पाणिरागात्'। ५ अनुष्टुप्।

पुष्पर्कं प्रसाद विभक्त । एष योऽस्यैव मवतु । इति श्रुत्वा तं श्रुत्वा तां तस्यैव पाणिमग्रहीत् । स च राज्यार्धमर्पयं कृतः । [1]विविधभयनानि च मधुरसान्यकार । सर्वं त्यक्त्वा मेने मात्र। तं तादृशं वृत्तान्तं विज्ञाय कीर्तिर्गुरुः[2]कल्पविल्या[3]समीपीत् अभ्यासीनस्य— अहो यौवनधनप्रभुत्वानां महिमा येनास्मेऽभिषोऽपि मती निरतः सखी योगहो मूला एवमिव उमर्युद्धिरसमूके कुपथ प्रपन्न । हा हा धिक् ।

परिच्छेदातीतः सकलवचनानामविषयः
पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान् ।
विवेकप्रध्वंसादुपचितमहामोहगहनो
विकारः कोऽप्यन्तर्जडयति च तापं च तनुते ॥१॥

एव विमृश्य चतुरोऽचतुरः शिष्यस्तद्बोधनाय प्राहैषीत् । तेनत गत्वोक्तोऽसौ—

निरस्य कुम्भं । योगिस्मरात् मुखात् भवभयतपस्य
कुरुष करुणाप्रभामित्यमित्र्नपसत्तमम् ।
न खलु नरके हाराक्रान्तं घनस्तनमण्डलं
भवति शरणं श्रोणीविम्बं [4]रणन्मणिमेखलं वा ॥१॥

इत्यादि गुरुभिर्बोध्यमानोऽसि । बुध्यस्व । मा मुह्य । सोऽपि विद्यपत्रस्य तेषां हस्ते गुरुभ्यः पत्राणि पत्रे विलिख्य प्रहिणोति । गतास्ते तत्र । वाचितानि पद्यानि गुरुणा—

'तर्कोऽप्रतिष्ठः श्रुतयो विभिन्ना नासौ मुनिर्यस्य मतं प्रमाणम् ।
धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्थाः' ॥१॥

विचारयन्निरपेक्षात्तु, किमर्थैर्व्वीसनान्तरैः ।
प्राप्यते येन निर्वाणं सरागेणापि चेतसा ॥२॥

---

१ ख– मानसीय २ ख– विपूत्तय ३ ख श्रीविम्बा (?) कुम्भ ४ ख 'ममा' । ५ विहारिणी ६ ख 'रणन्मणि हरिणी । मन्दाकीर्ति । ९ मधुरम् ।

सन्दष्टाधरपल्लवा सचकितं हस्ताग्रमाधुन्वती
मा मा मुञ्च शठेति कोपवचनैरानर्तितभ्रूलता ।
सीत्काराञ्चितलोचना सरभसं यैश्चुम्बिता मानिनी
प्राप्तं तैरमृतं श्रमाय मथितो मूढैः सुरैः सागरः ॥३॥[1]

इत्यादि दृष्ट्वा तस्थौ तूष्णीं गुरुः । मदनकीर्तिस्तु व्यलासीद् विविधम् ॥

॥ इति मदनकीर्तिप्रबन्धः ॥१४॥



१ शार्दूल०.

[१५]

॥ अथ सातवाहनप्रबन्धः ॥

इह भारते वर्षे दक्षिणखण्डे महाराष्ट्र'देशालङ्कारं श्रीमत्'प्रतिष्ठानं' नाम पत्तनं विद्यते । तत्र निजभुजाऽभिभूतपुरन्दरपुरश्रीः प्रस्तावान्तरेण द्विजकन्यायाममानवेन्द्रः । तत्र वैदेश्यौ द्वौ वैदेशिकद्विजौ सुरूपया विधवया स्वसा सार्धं कस्यचित् कुम्भकारस्य शालायां तस्थिवांसौ । कणवृत्तिं विधाय कणान् तद्गृहकर्मोपस्कारपरत्वेन सम्यक् कुरुतः स्म ।

अन्येद्युः सा तयोर्भगिनी स्वसा जलाहरणाय गोदावरीं गता । तस्याः रूपमप्रतिरूपं निरूप्य स्मरपरवशोऽन्तर्ह्रदवासी शेषो नाम नागराजो ह्रदाद्विनिर्गत्य विहितमनुष्यवपुस्तया सह बलादपि सम्भोगकेलिमकल्पयत् । भवितव्यताविशेषेण तस्याः सप्तधातुरहितस्यापि तस्य दिव्यशक्त्या शुक्रपुद्गलसञ्चारात् गर्भाधानमभवत् । स्वनामधेयं प्रकाश्य व्यसनसङ्कटे मां स्मरेरित्यभिधाय च नागराजः 'पाताल'मगमत् । सा च गृहं प्रत्यागच्छत् । व्रीडयाऽऽशङ्कितया च तन्मातरं वृत्तान्तं न कस्यचिदकथयत् । कालक्रमेण सहोदराभ्यां गर्भलिङ्गानि वीक्ष्य सा जातगर्भा इत्यज्ञायत । ज्यायसस्तु मनसि शङ्का जाता यदियं बत कनीयसोऽस्तु चेष्टितेति शङ्कनीयास्तदाभासात् । यवीयसोऽपि सममपि विकल्पः नूनमेषा ज्यायसा सह विलसितेति । एवं मिथः कलुषितात्मनौ विहाय तामेनामपि पृथक् पृथक् देशान्तरमभ्याश्रितम् । साऽपि मन्दभाग्यगर्भा परमन्दिरेषु कर्माणि निर्मिमाणा मन्दाक्षिमकरोत् । क्रमेण पूर्णेऽवसरे सर्वलक्षणलक्षिताङ्गं प्रासूत पुत्रम् । स च कस्माद् वपुषा गुणैश्च वर्धमानः समवयोभिः सह

---

१ ब-'प्रस्तावान्तरे' । २ ब-'वर्षे' । ३ ब- 'ज्ञातीय तत्र वृत्तान्तं' । कनीयस

रममाणो बालक्रीडया स्वयं भूपतीभूय तेभ्यो वाहनानि करि-तुरग-रथादीनि कृत्रिमाणि दत्तवान् । इति सनोतेर्दानार्थत्वाल्लोके सातवाहन इति व्यपदेशं लम्भितः । स्वजनन्या पाल्यमानः सुखमवस्थितः ।

इत'श्चोज्जयिन्यां' श्रीविक्रमादित्यस्या'ऽवन्ति'नरेशितुः सदसि कश्चिन्नैमित्तिकः सातवाहनं 'प्रतिष्ठान'पुरे भाविनं नरेन्द्रमादिशत् ।

अथैतस्यामेव पुर्यामेकः स्थविरविप्रः स्वायुरवसानमवसाय चतुरः स्वतनयानाहूय प्रोक्तवान्, यथा—वत्सा ! मयि परेयुषि मदीयशय्योच्छीर्षकदक्षिणपादारभ्य चतुर्णामपि पादानामधो वर्तमानं निधिकलशचतुष्टयं युष्माभिर्यथाज्येष्ठं विभज्य ग्राह्यं येन भवतां निर्वाहः सम्पनीपद्यते । पुत्रैस्तु तथेत्यादेशः स्वीचक्रे पितुः । तस्मिन्नुपरते तस्यौर्ध्वदैहिकं कृत्वा त्रयोदशेऽहनि भुवं खनित्वा यथायथं चतुरोऽपि निधिकलशास्ते जगृहिरे । यावदुद्घाट्य विलोकयन्ति तावत् प्रथमस्य कुम्भे कनकम्, द्वैतेयीकस्य कृष्ण-मृत्स्ना, तृतीयस्य बुशम्, तुरीयस्य त्वस्थीनि ददृशिरे । तदनु ज्यायसा साकमितरे त्रयो विवदन्ते स्म—तदस्मभ्यमपि विभज्य कनकं वितरेति । तस्मिंश्चावितरति सति तेऽ'वन्ति'पतेर्द्धर्माधिकारिणमुपा-स्थिषत । तत्रापि न तेषां वादनिर्णयः समपादि । ततश्चत्वारोऽपि 'महाराष्ट्र'जनपदमुपानसिषुः । सातवाहनकुमारस्तु कुलाल-मृदा हस्तिरथसुभटानन्वहं नवनवान् विदधानः कुलालशालायां बालक्रीडादुर्ललितकलितस्थितिरनयत् समयम् । ते च द्विज-तनुजाः 'प्रतिष्ठान'पत्तनमुपेत्य परतो भ्रमन्तस्तस्यामेव चक्रजीविनः शालायां तस्थिवांसः । सातवाहनस्तु तानवेक्ष्येङ्गिताकारकुशलः प्रोवाच—भो विप्राः ! किं भवन्तो वीक्षापन्ना इव वीक्ष्यन्ते ? ।

१ ग—'सानं ज्ञात्वा' । २ ग—'मयि मृते मदीय०' । ३ घ—'खात्वा' । ४ ग-'बुषाम्' । ५ घ—'नः कलित०' । ६ ख-'भेत्य' । ७ कुलालस्य । ८ ख—'वीतापन्ना' ।

तैरुक्तं नगरे—नगरेभ्यसुमन्त ! कथमिव वयं चिन्ताक्रान्तचेतसस्तथा जाताः ? । कुमारेण भण्यते—इङ्गितैः किमिव नाम गम्यते ? । तैरुक्तम्—युक्तमेतत्, परं भवतः पुरो निवेदितेन चिन्ताहेतुना किं स्यात् ? । बालः खलु भवान् । बाल आलपत्—यदि परं मम मनोऽपि साम्यं वः स्पृशति, तन्निवेद्यतां स चिन्ताहेतुः । ततस्ते तद्वचनवैचित्र्यचमत्कृताः सकलमपि स्वस्वरूपं निधिनिरूपणादि मातुर्मरणपर्यन्तमपि विवादनिर्णयान्तं तस्मै निवेदितवन्तः । कुमारस्तु स्मितविच्छुरिताधरो व्याहार्षीत्—भो विप्राः ! अहं यौष्माकं विवादं निर्णयामि । श्रूयतामवहितैः—यस्य पत्युः कलशस्याधःप्रदेशे तु तैलेन निभृतोऽस्तु । यस्य कलशे कृष्णमृत्तिका निरगात् स क्षेत्रकेदारादीन् गृह्णातु । यस्य तु तुषाः स कोष्ठागारगतधान्यानि सर्वाण्यपि स्वीकुरुताम् । यस्य चास्थीनि निरगुः सोऽश्व-महिषी-दासी-दासादिकमुपादत्ताम् । इति पुत्रकलशस्वरूपाः । इति वीरचरस्य श्रुत्वा द्विजन्मानः स्थितविवादा तद्वचनं प्रतिश्रुत्य तमनुज्ञाप्य प्रयातास्तु स्वां नगरीम् । प्रथिता सा तद्विवादनिर्णयकथा पुर्याम् । राजाऽप्याकर्ण्य तं पर्यनुयुङ्क्त—किं नु भो भवतां वादनिर्णयो जातः ? । तैरुक्तम्—ओम स्वामिन् ! । केन निर्णीत इति नृपेणाभिहिते ते सातवाहनस्वरूपं सर्वमपि निवेदयामासुः । तदाकर्ण्य तस्य शिरोऽपि धुनितैर्मन विस्मयं प्राप्तं दैवज्ञ तस्य प्रतिष्ठाने राज्यं च भविष्यतीत्यनुस्मरन् तं स्वप्रतिपन्थिनमाकलय्य कुपितमनास्तत्-मरणोपायमचिन्तयच्चिरं नरेश्वरः । अभिपातज्वरादिप्रयोगैर्व्यथिते चास्मिन्नशक्ताशुरितिकर्ता आत्मनामिमिति निश्चित्य समस्तचतुरङ्गचमूसमग्रो अवन्तीपतिः प्रयाय प्रतिष्ठानपत्तनं पर्यवेष्टयत् ।

१ ख 'सर्वस्वरूपमपि' । २ ख 'मां' । ३ ख—'निधिनिर्वन्धादि' । 'क्रमेणे' इति नास्ति । ४ ख 'श्रीशीनृपवर्णं' । ५ तमिव । विश । ख—अभिचारप्रयोगादि । ख—'अभिचारजातज्वरादि'

धनमुख्यं श्रावकं चाम्पलनामानं मुक्त्वा गताऽऽत्मपुरम्। एवं चैत्य-'मधुरि' करणार्थे यदि पूजासामिथ्यं कुरुध्वे। चाम्पलेनापि तस्य कुङ्कुमाद्यन्तराणामपि देवपूजार्थं नित्यममन्दिरा कृता। ततो मन्त्री 'आरासणं' गत्वा चैत्यनिष्पत्तियोग्यं दलपाटकं निरकाशयत्। तद्गुणमीरकर्क(?)मार्बुदोपरितन्यामानीनयत्। अर्धमेतार्थं क्रोशान्तरे हाम्नि स्थापितानि। तत्र सर्वं लभ्यते, यथा नरान्यं सूत्रादि हस्तं मा मुञ्चेति। 'दुम्बरिमणि'पथेन प्राकार निष्पत्तियोग्य दल त्रिगुणमूल्यं गिरेः प्रवेशयामास। पुनस्तां यथा विषमं भाजनं यथा परकार्यवेलो नो भवेत्। एवं सिद्धे पूर्वकर्मणि शोभनदेवं सूत्रधारमाहूय कर्मस्थाने न्ययुङ्क्त। उदयसारम् सेल्ह उपरिस्थापितमकरोत्। अर्धमध्ये सौरिशां च सम्यादिशत्। एवं सूत्रं कृत्वा तेजःपालो 'चन्द्रावती'मगमत्। निष्पन्ने प्रासादे। श्रीनेमिबिम्बं कषायपट्टमय समीकृतं स्थिते। सूत्रधाराणां उदराथी पट्पञ्चाशति भाटम्। ते तु दु:शीला पुर पुरोऽर्थं गृह्णन्ति। कार्यसंकटे पुनः पुनर्याचन्ते। तत उदयलो मन्त्रितेजःपालाय विज्ञप्ति—देव! द्रम्मा विमनस्यन्ति। सूत्रधारा कर्मस्थानात् प्रथमं प्रथमं गृह्णन्ति। ततस्तेजःपालेन कथापितम्—द्रम्मा विनष्टा इति किं ब्रूते!। विनष्टाः किं कुपिताः!। न तावत् कुपिताः किन्तु मनुष्यगणानुरक्ताः। उपकारायैव विनष्टाः कथं कथ्यन्ते!। माता मे कथितिवाक्यतया परस्पर विरुद्ध ब्रूते। तस्मात् तदाभिहितम्— सूत्रधाराणामभिमतमेव न कार्यं देयमेवेति। ततो हृष्टो उदयलः। तावन्निष्पन्नं यावद् गर्भगृह मध्ये श्रीनेमिनाथबिम्बं स्थापितम्। एतच्च हृष्टं तेजःपालाय विज्ञप्तम्। तुष्टौ तौ मन्त्रिणौ। श्रीवस्तुपालादेशात् तेजःपालोऽनुपमया सहानल्पपरिच्छदो'ऽर्बुद'गिरि प्राप्त आक्षर्य बिम्बप्रासाद दृष्ट्वा तुतोष (च)। नाना सद्गुणमानानां सपत्नीके

मन्त्री **नेमिं** पूजयति स्म । अथ कायोत्सर्गे ध्यानेनोर्ध्वस्तस्थौ चिरम् । क्षणार्धेनाऽ**नुपमा** पतिं तथास्थं मुक्त्वा प्रासादनिष्पत्तिकुतूहलेन बहिरागात् । तत्र सूत्रधारः **शोभनदेवो** मण्डपचतुस्तम्भीं ऊर्ध्वयितुं उपक्रमते । तदा मन्त्रिण्या उक्तम्— सूत्रधार ! मम पश्यन्त्याश्चिरं बभूव । अद्यापि स्तम्भा नोत्तम्भ्यन्ते । **शोभनदेवे**नोक्तम्— स्वामिनि ! गिरिपरिसरोऽयम्, शीतस्फीतम्, प्रातर्घटनं विषमम् । मध्याह्नोद्देशे तु गृहाय गम्यते । स्नायते, पच्यते, भुज्यते । एवं विलम्बः स्यात् । अथ विलम्बात् किं भयम् ?, श्रीमन्त्रिपादाश्चिरं राज्यमुपभुञ्जाना सन्तीह तावत् । ततोऽ**नुपम**या जगदे— सूत्रधार ! चाटुमात्रमेतत् । कोऽपि क्षणः कीदृक् भवेत् को वेत्ति ? । सूत्रधारो[1] मौनं कृत्वा स्थितः । पत्नीवचनमाकर्ण्य सचिवेन्द्रो बहिर्निःसृत्य सूत्रधारमवोचत्— **अनुपमा** किं वावदीति ? । सूत्रधारो व्याहार्षीत्— यद् देवेन अवधारितम् । मन्त्री दयितामाह— किं त्वयोक्तम् ? । **अनुपमा**ऽऽह— देव ! वदन्त्यस्मिन्–कालस्य को विश्वासः ? । काऽपि कालवेला कीदृशी भवति ? । न सर्वदाऽपि पुरुषाणां तेजस्तथा । यथा—

श्रियोर्वा स्वस्य वा नाशो, येनावश्यं विनश्यति ।
श्रीसम्बन्धे बुधाः स्थैर्य–बुद्धिं बध्नन्ति तत्र किम् ? ॥१॥[2]
वृद्धानाराधयन्तोऽपि, तर्पयन्तोऽपि पूर्वजान् ।
पश्यन्तोऽपि गतश्रीकान्, अहो मुह्यन्ति जन्तवः ॥ २ ॥[3]
भूपभ्रूपल्लवप्रान्ते, निरालम्बाऽविलम्बिनीम् ।
स्थेयसीं बत मन्यन्ते, सेवकाः स्वामपि श्रियम् ॥३ ॥[5]
इति विपदितो मृत्यु–रितो व्याधिरितो जरा ।
जन्तवो हन्त पीड्यन्ते, चतुर्भिरपि सन्ततम् ॥४॥[6]

---

१ ख–'मौनेनातिष्ठत्' । २-३ अनुष्टुप् । ४ ग–'स्वल्पावस्थायिनीं लक्ष्मीं, मन्यन्ते मन्त्रिणो बुधाः' । ५–६ अनुष्टुप् ।

[illegible]

[illegible]

[illegible]

[illegible] इत्यादि [illegible]

[illegible] वस्तुपाल-तेजःपाल-[illegible] [illegible]

[illegible] वस्तुपालेन [illegible]

[illegible] यथा—

[illegible]

विन्दव श्रीयशोवीर !, मध्यशून्या निरर्थका ।
सङ्ख्यावन्तो विधीयन्ते, त्वयैकेन पुरस्कृता ॥१॥[1]

यशोवीर ! लिखत्याख्या, [2]यावच्चन्द्रविधिस्तव ।
न माति भुवने ताव–दाद्यमप्यक्षरद्वयम् ॥२॥[3]

अत एव न सदा भवद्दर्शनरणरणकाक्रान्तमेव स्वान्तमासीत । इदानीं चारुसम्पन्नं भवदीयसाङ्गत्यम्, तदपि विशेषत [4]श्रीमन्नेमिदृष्टौ । ततो यशोवीरो व्याहरति—

श्रीमत्कर्णपरम्परागतभवत्कल्याणकीर्तिश्रुते
प्रीताना भवदीयदर्शनविधावस्माकमुत्कं मन ।
श्रुत्वा प्रत्ययिनी सदा ऋजुतया स्वालोकविस्रम्भणी
दाक्षिण्यैकनिधानकेवलमियं दृष्टि समुत्कण्ठते ॥१॥[6]

इत्याद्या सङ्कथा पप्रथिरे । प्रासादबिम्बप्रतिष्ठोत्सवा सवृत्ता ।
श्रीवस्तुपालेन एकदा चैत्यस्य दूषणभूषणानि पृष्टो यशोवीर प्रोचे–देव ! शोभनदेव सूत्रधार शोभन, ततो युक्त एतदम्बा कीर्तिस्तम्भोपरिस्थिता एकामङ्गुलीमूर्ध्वीकृत्य वर्तमाना घटिता । स तु कर्मकर एव द्रव्यलोलुप । अत्र तव मातुर्मूर्तिर्विलोक्यते येन दाता दुर्लभ ।

शतेषु जायते शूर, सहस्रेषु च पण्डित
वक्ता शतसहस्रेषु, दाता भवति वा न वा ॥१॥

इत्यादि किमुच्यते[8] । प्रासाद परमतम । पर दोषा अपि सन्ति । प्रासादापेक्षया सोपानानि ह्रस्वानि १ स्तम्भे बिम्बान्याशातनाभाजन स्यु २ द्वारप्रवेशे व्याघ्ररूपाणि पूजाऽल्पत्वाय स्यु ३ जिनपृष्ठे पूर्वजारोपणात् पाश्चात्यानामृद्धिर्नाशो भविता

---

१ अनुष्टुप् । २ घ 'यावच्चिन्द्रे विधि०' । ३ अनुष्टुप् । ४ घ–'श्रीनेमि०' । ५ क–'विधौ नास्माकमुत्क मन' । ६ शार्दूल० । ७ ख– 'ततोऽपि न युक्त' । ८ ग–पुस्तके 'स तु' एतदारभ्य 'किमुच्यते' इति पाठाधिक्यम् । ९ अनुष्टुप् । १० ख–'प्रवेशे' । ११ ख–'नाशिनी' ।

४ [illegible] [illegible] [illegible] [illegible]
५ [illegible] न [illegible] ६ [illegible] [illegible]
[illegible] न [illegible] न [illegible] प [illegible] [illegible]
[illegible] ७ । [illegible] [illegible] [illegible] [illegible] न पुराण [illegible] ।
[illegible] [illegible] [illegible] । [illegible]
[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible] पुरो [illegible] ।

[illegible] [illegible] पुरो [illegible] । [illegible] वीरमा, [illegible] वीमिन्त । [illegible] वीरमा ८ [illegible] [illegible] [illegible] [illegible] यो [illegible] [illegible] [illegible] [illegible] उदोन [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] मध्ये [illegible] । [illegible] [illegible] [illegible] — [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] । [illegible] तु [illegible] [illegible] च [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] । ९ [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] । [illegible] [illegible] वीरम [illegible] [illegible] — [illegible] ते [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] न [illegible] । । [illegible] मम, [illegible] [illegible] । [illegible] मम [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] । [illegible] च [illegible] [illegible] [illegible] । स तु [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] च ।

---

१ ग [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ।
२ [illegible] [illegible] ३ [illegible] [illegible] [illegible] ।

अत्रान्तरे श्रीवीरधवलोऽचिकित्स्येन व्याधिना जग्रसे। तदा वीरमः स्वसहायैर्बलवान् भूत्वा राज्यार्थं राणकमिलनमिषेण 'धवलक्क'मागात्। तदैव श्रीवस्तुपालेन तं दुराशयं ज्ञात्वा प्रत्युत्पन्नमतित्वादश्व-गज-हेमादिषु परमात्ममानुषे परमो यत्नः कृतः। वीरमः प्रभवितुं न शशाक। 'धवलक्क' एव स्वसौधे विपुलेऽवतस्थौ। दिनैस्त्रिभिर्वीरधवलो दिवं गतः। लोकः शोकसमुद्रे पतितः। बहुभिश्चितारोहणं[1] कृतम्। मन्त्री तु सपरिजनः काष्ठानि भक्षयन्नपरापरैर्मन्त्रिभिर्निषिद्धः। उक्तं च—देव! त्वयि सति राणपादाः स्वयं जीवन्तीव लक्ष्यन्ते। त्वयि तु लोकान्तरिते परिपूर्णाः पिशुनानां मनोरथाः। गता 'गूर्जर'धरा इति ज्ञेयम्। ततो न मृतो मन्त्री। उत्थापनदिने मन्त्री श्रीवस्तुपालः सभासमक्षं पठति—

आयान्ति यान्ति च परे ऋतवः क्रमेण
संजातमेतदृतुयुग्ममगत्वरं तु।
वीरेण वीरधवलेन विना जनानां
वर्षा विलोचनयुगे हृदये निदाघः ॥ १ ॥[2]

अतीव निःश्वस्य गताः सर्वेऽपि स्वस्थानम्। ततश्च मृते वीरधवले तद्राज्यलिप्सुर्वीरमः सन्नद्धो गृहान्निर्गमिष्यति यावता तावता श्रीवस्तुपालेन वीसलः कुमारो राज्ये विनियोजितः। वीसलदेव इति नाम प्रख्यापितम्। सर्वराज्याङ्गेष्वाप्तनरै रक्षा कारिता। स्वयं वीसलं गृहीत्वा साराऽश्वखुरपुटक्षुण्णक्ष्मापीठोच्छलद्रजःपुञ्जस्थगितव्योमा राजन्यकक्रूरकरवालशल्लभल्लकिरणद्विगुणद्योतिततरणिकिरणो वीरमसम्मुखं ययौ। दारुणः समरो जज्ञे। वीरमः स्वस्य तेजसोऽनवकाशं मन्यमानो नष्ट्वा श्वशुरेण राजकुलेन उदयसिंहेनाधिष्ठितं 'जायालि'[3]पुरं प्रत्यचालीत्। मन्त्री तस्याशयं दक्षतया ज्ञात्वा षोडशयोजनिकान् नरानुदयसिंहान्तिके प्रेषीत् आख्यापयत्, यथा-

१ ग-'चितारोपणं कृतम्'। २ वसन्त०। ३ ख-'जालहुरपुर'।

—अर्धं राजहितकरमर्थं आत्मानुमन्यमान यदि शान्तिक म्याम्बिन्दी तदा ते न राज्यं न जीवितमस्य च । इत्यादिदैवम् । तथा यदा वीरता आत्माभिमुखपार्श्वे प्रावस्था विज्ञाप्यमहाभिग्रहगुणाय च न्यायमान उद्यासिंहमिपुष्येऽभ्युपी अरिः सम्मिलितप्रत्याम्बी- समास्वराय इव मृतान्ध । तस्य शिरो वीरसुदर्शन प्रति उद्यासिंहन । तेन आर्ते निष्प्रभ्रमं वीरभद्रवाणस्य । पापस्मार्ते वीरपरस्तन सावित तावन्मात्राय विमति भूमामर्द । केचन तत्प्रभावेण वीरसेन भीमसुपासा अनुनय इव ।

पुरुष स्म्नागाश—मारुहति यथा यथा ।
गुणानि स्तुत्वेन स पश्यति तथा तथा ॥११॥[1]

राजा नागाह्वनामा विप्र प्रवालीदुपः । मणिमये पुरकृ- शेखरप्रमाण दशम् । ऐकश समतासमता प्रतीहारो राजाऽपि । [illegible] प्रहरता लोप । पूर्णमण्डपे पुर्णाणा मणिमौवस्तुपासन वीरि लोऽभूत् । स कस्मात्काश उपरार्ध पृते—देव । वनयो पार्श्वेऽस्य यथमस्य तद् सान्त्वताम् । राजाऽपि तानागृपासादेव—अर्थे शीघ्र नाम् । तस्माधुक्तम्—अर्थः 'नानुप्रयाति'षु व्यवसितानामपि नः पार्श्वे । राज्ञोऽयम् तर्हि स्थित्य दीयताम् । मणिसमयमभिनिविष्टम्—न रिम्य मन्त्रतो राजते तत्पादिश्यताम् । राजा यस्तदर्थं पुरस्कृतः । उपयप्रसादो तदा जीवितमृत् । [illegible] मिषेवपानि तत्र ब्रह्मम् न तु तद्वचनं राजा शृणोति अभिनवार्पणात् । तदा सोमेश्वरेण्यर्थं कस्यमेकं वीरसेनं प्रति—

मतस्वपीतसत्पातकापरिलब्धयात्मीयोस्तव्यता
प्राप्य प्रीतिभिर्धं समीर ! महती इन्त त्वया किं इतम् ॥

1 क—'दर्शोदेव' । 2 ग—'तत्त्व मात' । 3 अनुपम् । 4 'पूरवलीन उत्तमिदी [illegible] 5 ग—'यशिन् मानी इव समस्ताय । 6 क 'प्रस्तोव तस्यादी'

सूर्याचन्द्रमसौ निरस्ततमसौ दूर तिरस्कृत्य यत्
पादस्पर्शसह विहायसि रज' स्थाने तयोः स्थापितम् ॥१॥[1]

निर्वर्तित दिव्य राज्ञा ।

अथ कदाचिद् 'धवलक्कके' मन्त्रिणि वसति सति पौषधशाला एका आस्ते । तस्या उपरितन पुञ्जक क्षुल्लकोऽधः क्षिपन्नासीत् । तस्याज्ञानात् स पुञ्जको वीसलदेवमातुलस्य सिंहनाम्नो यामाधिरूढस्याधो रथ्यायां गच्छत' शिरसि पतितः । क्रुद्ध. स' । मध्ये आगत्य क्षुल्लक दीर्घया तर्जनकेन पृष्ठे दृढमाहत्य रे मा 'जेठुआक' सिंहनामान राजमातुल न जानासीति वदन् स्वगृह गत । त वृत्तान्त मध्याह्ने मन्त्रिवस्तुपालं भोजनारम्भे उत्क्षिप्तप्रथमकवल आगत्य रुदन्नुद्घाटितपृष्ठोऽभिजिज्ञपत् क्षुल्लक । मन्त्रिणाऽभुक्तेनैव उत्थाय क्षुल्लक सन्धार्य प्रस्थापित , शालाया प्रेषितश्च । तदनु स्वय स्वकीय' परिग्रहो भाषित —भो क्षत्रिया ! स कोऽप्यस्ति युष्माकु मध्ये यो मम मनोदाहमुपशमयति[2] । तन्मध्ये एकेन राजपुत्रेण भूणपालाख्येनोक्तम्—देव ! ममादेश देहि, प्राणदानेऽपि तव प्रसादाना नानृणीभवामः । स एकान्ते नीत्वा मन्त्रिणा छन्न कर्णे प्रविश्य समादिष्टम्—याहि, 'जेठुआ'वंशस्य राजमातुलस्य सिंहस्य दक्षिण पाणि छित्त्वा मे ढौकय । स राजपुत्रस्तथेत्युक्त्वा एकाकी मध्याह्नोद्देशे सिंहावासद्वारे तस्थौ । तावता राजकुलात् सिंह आगात् । राजपुत्रेणाग्रे भूत्वा प्रणिपत्य सिंहाय उक्तम्—मन्त्रिणा श्रीवस्तुपालदेवेनाह व समीप केनापि गूढेन[3] कार्येण प्रेषितोऽस्मि । तेन इतो भूत्वा प्रसद्याऽवधार्यताम् । इत्युक्त स किञ्चिद् गत्वा पराङ्मुखो[4] भूत्वा यावद् वार्ता श्रोतु यतते तावन्मन्त्रिभृत्येन सिंहस्य कर स्वकरे कृत सहसा[5] छुर्याच्छिन्नश्च । छिन्न त कर गृहीत्वा रे वस्तुपालस्य भृत्योऽस्मि, पुन श्वेताम्बर परिभवेरिति वदश्चरणबलेन पलाय्य

१ शार्दूल० । २ घ-'सिंहं राज०' । ३ ग-'गूढकार्येण' । ४ घ-'परागभूत्वा' । ५ ग-'महसा कङ्कलोहछुर्या' ।

मृगपाशो कस्यापि कानने वनमध्ये वागरीदात्। मन्त्रिणा सहाने अस्ते। स नर राजीवस्य वत। तम्मनुष्यानि पापकर्मणो मुञ्चति। कस्मिन्नपरस्मिन् मारितः—यस्य जीवितस्य॥ तमुर्वे नृप-जीवतु चिरम्। अस्माभिर्निमन्त्रणा सह वैरमुत्पन्नम्। मार्गे वनान्तरे, जीविते सन्देह। ते सर्वेऽपुरुषाम्—देवस्य सह मार्गे यन्त्रेण च। विना स्था वयं। वनान्ते निर्णया ज्ञानस्य। तथा मोमुराणि रत्न गृह गते रा वृथा कृत्वा सर्वं राजमित्रोपरि समीभूय तस्यै विज्ञो कार्या पर्युत्पन्न। तत्र मिहत्स्यापि परिच्छेदो भिक्षिता कस्यचि-द्विभूयन्। तैः सेविरमापि—यथा ईपसुपाठं सहकम्पमाव दमिष्यन इति प्रतिज्ञा जाते। मन्त्रिणे 'बहुमान'मिन्यम्। यत्र राजमन्दिराय आयाते कण्ठजारायन्ते तत् सप्तरेखेन व्यापये ब्रतम्—एतेनिर्णयं व्यतिकरे यदि राजा विज्ञाने तदा नरः मारमन्त्रसहस्रानारीभ सम्य कोपोऽभूत्। तस्यै विज्ञेन राजे। राज्ञा यातां ज्ञात्वा निमुञ्च मणिगम्—वनराय वस्तुपाठो न पीठपति विविधाय। पुष्पाभिरम्यारे वर्षे यति। तैरुक्तम्—मन्त्रिणो गुरु पीठिन। राजा प्राह—यतो ये कृते तस्माद् विज्ञा मन्त्रेर। तथा सर्वं करिष्यामा यहुचितम्। ततः स्वामंवरस्य पुर-गुरो। किमत्र युक्तं स्यात्?। गुरुणाऽऽह—मां वनार्थे मन्त्रिण। आपमीरस्य करिष्य। प्रहित स। प्रजा मन्त्रिसीभहारम्। प्रजो मन्यगुरुणा मन्त्रिणार्थे पुरोहित आह—कल्पितम्। विदेशस्मै कार्ये निपत कृत भवति। मदुपरा भिक्षिता हन्ति। राजाऽपि तैस्वाभिनय। मत् न सम्पत्ना येन सन्धि न रचयामि। तथ मन्त्रीश मम मरणात् किं भयम्?।

'मिते च सम्पन्ने लक्ष्मी— मृते चापि सुराङ्गना।
क्षणविध्वंसिनी काया का चिन्ता मरणे रणे' ॥१॥

---

१ घ-'गैहको'। घ-'बनयाचे'। ३ ग-'केडभणा'। घ-'दपकमेका'।
५ ग-'वैन लोक'। ६ इद वच नास्ति क-ग प्रत्यो। अनुरु।

परं गुरुपरिभवो दुःसहः । अत्र किं व्यापृतं जग्धं पीतं दत्तं गृहीतं विलसितं यदा तदा यथा तथा मर्तव्यमेव । इदमेव मरणमित्थं भवतु ।

जीवितैकफलमुद्यमार्जितं, लुण्ठितं पुरत एव यद् यशः ।
ते शरीरकपटालपालनं, कुर्वते बत कथं मनस्विनः ? ॥१॥[1]

इत्यादिगीर्भिर्मृतिकृतनिश्चयं मन्त्रिणं ज्ञात्वा गुरुर्गत्वा राजानमूचे—राजेन्द्र ! म्रियत एवात्र [2]झगटके मन्त्री । स अग्रेऽपि युद्धशूरः तेषु तेषु स्थानेषु जयश्रीवरो जातः । तत्र वक्तुं न पार्यते । अपि च 'तृणं शूरस्य जीवितम्' इति वचनात् ईदृशो योधः कश्चिद् निजो कार्येऽग्रे धृत्वा धास्यते, नैव वृथा । बहुधा भवतामुपकारी । अन्यच्च स किं प्रभुर्यो जीर्णभृत्यानां द्वित्रानपराधान् न सहते ? । अस्मदादीनामपि मनसि देवस्य कीदृशी आशा भाविनी ? । इत्यादि दृढमृदुसारं निगद्य हस्ते कृतो राजा । यदुक्तम्—

[3]वक्की नरिंदचित्तं, वक्खाणं पाणियं च महिलाओ ।
तत्थ य वच्चंति सया, जत्थ य धुत्तेहिं निज्जंति ॥१॥[4]

राजा प्रोवाच-मन्त्री धीरो दत्त्वा सम्मान्य समानीयताम् । गतो गुरुस्तत्र । राजोक्तमुक्त्वा नीतो मन्त्री । परं सन्नद्धबद्ध एव मिलितः । राज्ञा विविधतदुपकृतिस्मृत्या आर्द्रनयनमनसा पितृवदुपशमितो मन्त्री । मातुलः [5]पादयोर्लगापितः । स मन्त्रिच्छेदितसिंहहस्तो लोके दर्शितः । नगरे नागरकसमक्षं शब्दः प्रापितः—यो मन्त्रिदेवगुरुहन्ता तस्य प्राणान् [6]हनिष्यामः । इत्युक्त्वा जिनमतस्य मन्त्रिणश्च गौरवमवीवृधद् वीसलदेवः ।

---

१ स्वागता । २ ख–प्रगटके (?) ।
३ ग–पुस्तके नेदं पद्यं दृश्यते । अस्य छाया चैवम्—
वक्रा नरेन्द्रचित्तं व्याख्यानं पानीयं च महिला ।
तत्र च व्रजन्ति सदा यत्र च धूर्तैर्नीयन्ते ॥
४ आर्या । ५ घ–'पदयोर्लगिता' । ६ घ–'हरिष्यामः' ।

देव विक्रमादित्यात् १२९८ वर्षे प्रयाणम्। श्रीवस्तुपालो ज्वरप्रकोपेण पीडितः तदा तेजःपालं सपुत्रपौत्रं लघुं च जयन्तसिंहमभाषत—वत्सा! श्रीनरचन्द्रसूरिभिर्मलधारिभिः संवत् १२८७ वर्षे भाद्रपदवदि १० दिने तेषां देवगमनसमये वयमुक्ता—अस्मिन्! भवतां १२९८ वर्षे स्वर्गारोहो भविष्यति। तेषां वचांसि च न चलन्ति, गीर्वाणसिद्धिसम्पन्नत्वात्। ततो वयं श्री'शत्रुञ्जयं' गमिष्याम एव।

गुरुर्जिनः पुण्डरीक-प्रणिधानं रसायनम्।
सर्वभूतदयापात्र सन्तु मे भवजन्मिने ॥१॥
कृत्याः श्रियः सुखं स्तोक, सुखं दत्तं यथाक्रमम्।
पूजितं दर्शनं जैनं न मृत्योर्भयमस्ति मे ॥२॥

कुटुम्बेन निगमनम्। 'शत्रुञ्जय'गमनसामग्री निष्पन्ना। वीसलदेवो मन्त्रिणा साभ्युत्थानः सम्पृष्ट पुष्पाञ्जलिश्च प्रदापि सम्भ्रेरणामावनः। ततो नागडप्रधानपुत्रं मन्त्री स्थापयत्। तेनाप्यन्तरिति सस्नेहं पृष्ट कार्यविशेषं मन्त्री बभाषे—वयं भवान्तरप्रस्थाय 'विमल'गिरिं प्रति प्रतिष्ठामहे। भवद्भिर्जैनधर्मोऽस्मिन् राज्ये सम्यग् रक्षणीयः विशेषेण। यत —

गीर्वाणानामिवं राज्ये जनराजाय प्रयत्नपि।
स्थापितं जैनधर्मश्री—स्तद्द्वेषी नैव नश्यति ॥१॥

इति प्रसन्नम्। मन्त्रिनागडेनोक्तम्—जैवातृकम् भवन्तम् गौरवयिष्यामि। चिन्ता न कार्या। स्वस्त्यस्तु वः। इति वाचसा समनुज्ञात। अथ चचाल वस्तुपालः। 'अङ्केवालिया'ग्रामं प्राप्य तत्र शरीरे व्याधिबलं वृद्ध तस्थौ। तत्र सहस्नाता सूरयो

ब 'एत [illegible] '। [illegible] ११९ वर्षे। ३ ब 'भवोभ्रमक' [illegible]। ४ ब 'सन्ध्यानिर्म'। 'श्रीजैनधर्मे'। [illegible]—'सर्वश्च'। ६ [illegible]।

निर्यामणां कुर्वन्ति । मन्त्रीश्वरोऽपि समाधिना सर्वं शृणोति, श्रद्दधाति च । अनशन प्रतिपद्य यामे गते[1] स्वय भणति—

न कृत सुकृत किञ्चित्, सता संस्मरणोचितम् ।
मनोरथैकसाराणा—[2]मेकमेव गत वय ॥१॥[3]
यन्मयोपार्जित पुण्य, जिनशासनसेवया ।
जिनशासनसेवैव, तेन मेऽस्तु भवे भवे ॥२॥[4]
या रागिणि विरागिण्य , स्त्रियस्ता कामयेत् क ? ।
तामह कामये मुक्ति , या विरागिणि रागिणी ॥३॥[5]
शास्त्राभ्यासो जिनपतिनुति सङ्गति सर्वदाऽऽर्यै
सद्वृत्तानां गुणगणकथा दोषवादे च मौनम् ।
सर्वस्यापि प्रियहितवचो भावना चात्मतत्त्वे
सम्पद्यन्ता मम भवभवे यावदासोपवर्गे ॥४॥[7]

इति भणन्नेवास्तमितो जैनशासनगगनमण्डनमृगाङ्क श्री-**वस्तुपालः** । तदा निर्ग्रन्थैरपि तारपूत्कारमरोदि । का कथा सोदरादीनाम् ? । मन्त्रिणि[8] दिव गते श्री**वर्धमान**सूरयो वैराग्यादाम्बिलवर्धमानतप कर्तुं प्रारेभु । मृत्वा **शङ्खेश्वरा**धिष्ठायकतया जाता । तैर्मन्त्रिणो गतिर्विलोकिता, पर न ज्ञाता । ततो 'महाविदेहे' गत्वा श्री**सीमन्धरो** नत्वा पृष्ट । स्वाम्याह—अत्रैव 'विदेहे' 'पुष्कलावत्यां' 'पुण्डरीकिण्या' पुरि **कुरुचन्द्र**राजा सञ्जात । स तृतीये भवे सेत्स्यति । **अनुपमदे**जीवस्तु अत्रैव श्रेष्ठिसुताऽष्टवार्षिकी मया दीक्षिता पूर्वकोट्यायु । प्रान्ते केवल मोक्षश्च । सा एषा साध्वी व्यन्तरस्य दर्शिता । तदनु तेन व्यन्तरेणात्रागत्य तयोर्गति प्रकटिता । तत्र **तेजपालो** विलपति—

आह्लाद कुमुदाकरस्य जलधेर्वृद्धि सुधास्यन्दिभि
प्रद्योतैर्नितरां चकोरवनितानेत्राम्बुजप्रीणनम् ।

---

१ ग–'मते' । २ घ–'मेवमेव' । ३–५ अनुष्टुप् । ६ घ–'वदन्ति' । ७ मन्दाक्रान्ता ।
८ 'मन्त्रिणि' इत्यारभ्य 'प्रकटिता' प्रान्तः पाठ क–प्रतौ नास्ति ।

एतत् सर्वमनादरादवदयाऽप्यागम्य राजुहेत्या
कोऽत्र पमनस्य कुबुद्धितिकरं मैत्रामपक्षमप्या प्यौ ॥१॥[1]

जयन्तसिंहो भणति–

कपोलमात्ररक्ता गगनाम्बराज
मुक्तामया: पतन्ति न दन्तुरयन्ति तारा: ।
एवं तम रजनीपतिना विमाऽय
सर्वा: दिशा मलिनमाननमुद्वहन्ति ॥२॥

कवय: प्राहु:–

मन्ये मन्दधियो विधे ! त्वमवधिर्विराय मेधाविनां
यद् वैरोचन-सातवाहन-बलि-कर्णा-ऽभय-भोजादय: ।
यस्मान्न चिरजीविना न विहितास्ते विश्वजीवातवो
मार्कण्डश्च ध्रुव लोमशाश्च मुनय: दीर्घा प्रभूतायुष ॥३॥

लोकास्तु वदन्ति–

किं कुर्मः कमुपालभेमहि ! विभु व्यापाय कं वा स्तुम !
कस्याग्रे स्वमुखं स्वयं कमपि सम्पर्कयामोऽधुना ! ।
धुन्धः कल्पतरुरत्नमणिचिन्तामणिर्व्यावरत्
क्षीणा कामगवी च कामकलशो मग्नो हहा दैवत ॥४॥[1]

ततस्तेजःपाल-जयन्तसिंहाभ्यां मन्त्रीश्वरस्य 'शत्रुञ्जये करोत संस्कार' इति । तत्संस्कारभूम्यासन्न 'स्वर्गारोहण'नाम्ना प्रासादो नमि विनमिपुत्रकृतमसमाप्य कारित: । मन्त्रिण्यौ ललितादेवी-सौखु अनशनेन मृते । श्रीतेजःपालस्तु सं० [...] पर्यन्तमासवितो मध्यमश्मशान मोगमग् वेशालोऽपि तथैव स्थान तेन्यास १२ ८ पर्वे वासमगमत् । ईर्ष्यो सति श्रीजयन्तसिंहोऽपि परलोकमभजत् । श्रीअनुपमाऽपि तपसा स्वर्गमसाधयदिति मान्यम् ।

राजेन्द्र । 'वस्य । २ व 'भेतारमयोगा । ४ मुख । ५–६ जमून प 'कमलादेवी सोखी । क 'सौखी क 'सोखी' । १ ख ज– म्नर' । क–'स्न श्री

एतयोश्च श्रीवस्तुपाल-तेजःपालयोर्धर्मस्थानसङ्ख्यां कर्तुं क ईश्वर [1]। परं गुरुमुखश्रुतं किञ्चिल्लिख्यते—लक्षमेकं सपादं जिनबिम्बानां विधापितम्। अष्टादश कोट्यः षण्णवतिर्लक्षाः श्री'शत्रुञ्जय'-तीर्थे द्रविणं व्ययितम्। द्वादश कोट्योऽशीतिलक्षाः श्री'उज्जयन्ते'। द्वादशकोट्यस्त्रिपञ्चाशल्लक्षाः 'अर्बुद'गिरिशिखरे 'लूणिग'वसत्याम्। नव शतानि चतुरशीतिश्च पौषधशालाः कारिताः। पञ्च शतानि दन्तमयसिंहासनानां कारापणम्, सूरीणां प्रत्येकमुपवेशनार्थमर्पणम्। पञ्च शतानि पञ्चोत्तराणि समवसरणानां जादरमयानां कारणं श्रीकल्पवाचनाक्षणे मण्डनार्थम्। ब्रह्मशालाः सप्त शतानि। सप्त शतानि सत्रागाराणाम्। सप्तशती तपस्वि-कापालिकमठानाम्। सर्वेषां भोजननिर्वापादि दानं कृतम्। [3]त्रिंशच्छतानि द्व्युत्तराणि महेश्वरायतनानाम्। त्रयोदश शतानि चतुरुत्तराणि शिखरबद्धजैनप्रासादानाम्। त्रयोविंशति जीर्णचैत्योद्धाराणां, अष्टादशकोटिव्ययेन सरस्वतीभाण्डागाराणां त्रयाणां स्थानत्रये करणं 'धवलक'-'स्तम्भतीर्थ'-'पत्तना'दौ। पञ्चशती ब्राह्मणानां नित्यं वेदपाठं कारयति स्म। तेषां गृहमानुषाणां निर्वाहकरणम्। वर्षमध्ये सङ्घपूजात्रिनयम्[5]। पञ्चदशशती श्रमणानां नित्यं गृहे [6]विहरति स्म। [7]तटिक-कार्पटिकानां सहस्रं समधिकं प्रत्यहमभुक्त। त्रयोदश यात्राः सङ्घपतीभूय कारिता लोकानाम्। तत्र प्रथमयात्रायां चत्वारि सहस्राणि पञ्च शतानि शकटानां सशय्यापालकानाम्, सप्तशती सुखासनानाम्, अष्टादशशती वाहिनीनाम्, एकोनविंशतिशतानि श्रीकरीणाम्, एकविंशति शतानि श्वेताम्बराणाम्, एकादशशती दिगम्बराणाम्, चत्वारि शतानि सार्धानि जैनगायनानाम्, त्रयस्त्रिंशच्छती वन्दिजनानाम्, चतुःसहस्रतुरगाः, द्विसहस्रोष्ट्राः चतु-

१ घ-'व्ययकृतम्'। २ ख-'मयानां'। ३ ग-'पञ्चविंशतिशतानि हरिहरप्रासादि-महे०'। ४ ख-'कुर्वन्ति स्म', घ-'करोति स्म'। ५ 'सर्वदर्शनिनां' इत्यधिको ग-पाठः। ६ ख-'विरमति स्म'। ७ ग-'भट्टकटिक-कार्प०'।

चत्वारिंशद्विकल्पवती देवार्चा समकक्षमनुष्या इदं प्रथमपात्र-प्रमाणम् । अनेनैव तद्विकल्प ज्ञेया । यथा चतुरशीतिविकल्पस्य समुदा । चतुःशाली चतुःपञ्चाशिका वापीनाम् । पाषाणमयानि द्वात्रिंशद् दुर्गाणि । चतुःपञ्चाशन्मयः । एवं कोटिसंख्यानि हर्म्य मठो किमपि । तथा दन्तमयसिंहासनानि चतुर्विंशतिः । त्रिशतानि पाषाणदेवालयानाम् । एकविंशत्याचार्यपदस्थापनानि कारितानि । सरस्वती-कण्ठाभरणादीनि चतुर्विंशतिबिरुदानि ख्यापितानि कविजनैः । श्रीवस्तुपालस्य दक्षिणस्यां दिशि श्री'पर्वत' यावत् पश्चिमायां 'प्रभास' यावत् उत्तरस्यां 'केदार'पर्वतं यावत् पूर्वस्यां 'वाराणसीं' यावत् तस्य कीर्तनानि सूक्तये । सर्वमिलने त्रीणि कोटिशतानि चतुर्दश लक्षा अष्टादश सहस्राणि अष्ट शतानि द्रव्यव्ययः पुण्य-स्थाने । गिरिनारशत्रुञ्जययोः सहस्रामे सैन्यपदं गृहीतम् । अष्टादश वर्षाणि तयोर्व्यापृतिः ।

¹विरुदानि २४ वस्तुपालस्य तद्यथा— महामात्याल-कृत १ सरस्वतीकण्ठाभरण २ सचिवचूडामणि ३ कूर्चाल-सरस्वती ४ सरस्वतीधर्मपुत्र ५ लघुभोजराज ६ खण्डेरायु ७ दत्तमयचक्रवर्ति ८ बुद्धि अभयकुमार ९ रूपि कन्दर्प १० चतु-रिमा चाणाक्य ११ शालि नारद १२ शक्ति नृपाल १३ सैर-न्ध्रासपनकल्प १४ संसुखमध्यममारगदर्शक १५ मध्यस्थैव १६ गम्भीर १७ धीर १८ उदार १९ निर्विकार २० ²सद्ममयमनःसनाथ २१ धर्मजन्मनमनीषु २२ शान्तु २३ अतिपुत्र २४ ॥

॥ इति ³श्रीवस्तुपालप्रबन्धः ॥ २४ ॥

श्री'प्रभावक'पुरे 'कोटिक'नाम्नि गणे वाग्धीरिते ।
श्री'मध्यम'शाखायां 'हर्षपुरीया'ऽभिधे गच्छे ॥१॥

प-'कचर्म'। 'विरुदानि वस्तुपालस्य' इति ... प-प्रतौ नास्ति ।
३ प-'प्रबन्धोऽयं वस्तुपालस्य' ।

'मलधारि'बिरुदविदितश्रीअभयोपपदसूरिसन्ताने[1]
श्रीतिलकसूरिशिष्यः सूरिः श्री[2]राजशेखरो जयति ॥ २ ॥
तेनाय मृदुगद्यैर्मुग्धो मुग्धाववोधकामेन ।
रचित प्रबन्धकोशो जयताज्जिनपतिमत यावत् ॥ ३ ॥[3]

तथा—

'कट्टारवीरदुस्साध'वशमुकुटो नृपौघगीतगुण ।
[4]वंब्बूलीपुरकारितजिनपतिसदनोच्छलत्कीर्तिः ॥ ४ ॥
मप्पकसाधोस्तनयो गणदेवोऽजनि 'सपादलक्ष'भुवि ।
तत्सूनुर्नूनकनामा तत्पुत्र साढको दृढधी ॥ ५ ॥
तत्सूनुः सामन्तस्तत्कुलतिलकोऽभवज्जगत्सिंहः ।
दुर्भिक्षदुःखदलन श्रीमहमदसाहिगौरवित ॥ ६ ॥
तज्जो जयति सिरिभव षड्दर्शनपोषणो महणसिंहः ।
'ढिल्ल्यां' स्वदत्तवसतौ ग्रन्थमिम कारयामास ॥ ७ ॥
शरगगनमनु(१४०५)मिताब्दे ज्येष्ठामूलीयधवलसप्तम्याम् ।
निष्पन्नमिद शास्त्र श्रोतृश्रेयो सुख तन्यात् ॥ ८ ॥[5]

इति चतुर्विंशतिप्रबन्धाः सम्पूर्णाः ॥



---

१ घ–'श्रीमलधारिगच्छे श्रीअभयसूरिसन्ताने' । २ घ– 'राजशेखरसूरीन्द्र-वादीन्द्रकृतिरियम्' । ३ अत पर सप्तमपर्यन्तानि पद्यानामभावो घ-प्रतौ । ४ ख– 'वप्पलीपुर०' । ५ घ–'श्री ॥ सवत् १५२० वर्षे वैशाखवदि त्रयोदश्यां भृगुवारे ॥ श्री'तपा'गच्छे श्री ४ सोमसुन्दरसूरिश्रीमुनिसुन्दरसूरिश्रीजयचन्द्रसूरिशिष्य चतुर्विंशतिप्रबन्धानां प्रतिमेतामलीलिखत् ॥ लेखकवाचकयो शुभ कल्याण भूयात् भवतु इत्यादि पण्डितमेरुरत्नगणिना लिखापिता ॥ छ ॥ श्री ,,

क—परिशिष्टम् ।

॥ [1]सपादलक्षीयचाहमानवंशः ॥

[1]श्रीरस्तु । सपादलक्षीयचाहमानवंशो लिख्यते—

सं० ६०८ राज्ये वासुदेवः १ सामन्तराजः २ नरदेवः ३ अजयराजः अजयमेरुदुर्गकारापकः ४ विग्रहराजः ५ विजयराजः ६ चन्द्रराजः ७ गोविन्दराजः ८ सुरत्राणस्य बेगवरिसनाम्नो भेत्ता ९ दुर्लभराजः १० वत्सराजः ११ सिंहराजः सुरत्राणस्य हेजमदीननाम्नो भेत्ता घेठाणाकभेत्ता १२ दुर्योधनो निसरदीनसुरत्राणभेत्ता १३ विग्रहराजः १४ वप्पिराजः सरस्वत्याः देवतामासाद्य हेमादिदानिसम्पन्नः १५ दुर्लभराजः १६ गंडू महमदसुरत्राणभेत्ता १७ वाक्पतिदेवः १८ विजयराजः १९ चामुण्डराजः सुरत्राणभञ्जकः २० दूसलदेवः तेन गुर्जरत्राऽधिपतिर्बद्ध्वाऽऽनीय 'अजयमेरु'मध्ये तक्रविक्रयं कारापित २१ वीसलदेवः स च कौतुकात् महाजनस्य भार्यां गृहीतवान् तच्छापात् कुष्ठरोगेण मृतः २२ पृथ्वीराजः सुरत्राणसुअमर्दी २३ आल्हणदेवः सहाबदीनसुरत्राणजित २४ अनलदेवः २५ जगदेवः २६ वीसलदेवः २७ 'सुरत्राण'जित् अमरगाङ्गेयः २८ पाल्हणदेवः २९ सोमेश्वरदेवः ३० पृथ्वीराजः ३१ सं० १२३६ राज्य धीरः १२४८ राज्यं ३२ हरिराजदेवः ३२ राजदेवः ३३ बाल्हणदेवः ३४ 'चाचरी'...

---

१ भ पुस्तकोपलभ्यमानो वंशो ... एव ... चतुर्विंशतिप्रबन्धे ... अत परिशिष्टरूपेण ... लिखितो मया । २ ... ३ ... ४ ... सामन्तपर्यन्तमेव ... पुस्तकान्तरेऽपि ... तत्पूर्वमपि ... ।

विरुद तस्य वीरनारायण तुरुष्कसमसदीनयुद्धे मृतः ३५ बाहडदेवो 'माल्व'जेता ३५ जैत्रसिंहदेव ३६ श्रीहम्मीरदेव ३७ स० १३४२ राज्य १३५८ युद्धे मृत, हस्ती ४ हस्तिनी ४ अश्वसहस्र ३० दुर्ग १० एवं प्रभु सत्त्ववान् । शुभ भवतु ॥ सवत्[1] १५२७ कार्तिकमासे शुक्लपक्षे पञ्चम्यां तिथौ सोमे लिखितं॥

ख–परिशिष्टम् ।

श्रीआर्यनन्दिलसूरिसन्दब्धो

॥ वैरोट्यास्तवः ॥

नमिऊण पासनाहं असुरिंदसुरिंदवादिअदेव ।
वइरुट्टाए थुत्तं अहय समरामि भत्तीए ॥ १ ॥
जा धरणोरगदइआ देवी पउमावई य वइरुट्टा ।
सप्पसहस्सेहि जुआ देवा किर किंकरा जाया ॥ २ ॥
नागिणि नागारूढा नागकरा नागभूसियसरीरा ।
नागेहिं सिरमाला नागमुद्दा सा जए जयउ ॥ ३ ॥
धरणिंदपढमपत्ती वइरुट्टा नाम नागिणी विज्झा ।
सप्पकरग्गहत्था सप्पाभरणा य जा निच्च ॥ ४ ॥
वासुगि१ अणंत२ तक्खग३ कंकोलयं४ नाम पउम ५महपउमा६ ।
संखकुली७ ससिनामा ८अट्ठ कुलाइं च धारेइ ॥५॥
विंछिअ-कन्न-सिआली-कक्काही-गोरसप्पसप्पे अ ।

---

१ ख– '१५१३ वर्षे आषाढ वदि ८ शुक्रे श्री'उन्नतदुर्गे' ओ०शङ्करलिखितम् ॥ श्री'तपा'पक्षप०चारित्रहंसगणीनां पुस्तिका । मङ्गलमस्तु । श्रीरस्तु । शिवमस्तु । नेमिनाथमस्तु ॥ श्रीः । छ । छ । जैनमस्तु ॥ छ ॥ श्री ॥ छ ।' २ प्रेक्ष्यतां द्वादश पृष्ठम् ।

गोरे मंगुर चित्ती पिडिकूण रिंदु न वसे न ॥ ६ ॥
मलग्गेपसग्गाई उसवसा बाहिसा य परउा य ।
ममत्तिरपिदिपरोलिपविरोक्पिार्ण च नासेइ ॥ ७ ॥
इंकरतं च विस नविसइविसइपडणे परइ ।
पारस्सनाम ना हाँ पउमावइपरवरएण ॥ ८ ॥
सप्प ! विसप्प ! सरीसप ! परापि गच्छसि जाहि रे दुरिमं !
जंपिम्मि पंचिपि मंचाणि मोहमि इ पुरुषरोणं ॥ ९ ॥
जो पढइ जो य निसुणइ बहरक्खामंतसंघयं पुरिसो ।
तस्सासेसविसाई नाय न पुसंति मणिपुत्तस्स ॥ १ ॥
मण्डुक्कारमिम्मिओ मउरं पढरे च जो वसि देइ ।
साहुल मज्झापनं बहरक्खा तं परिस्सेइ ॥ ११ ॥
इय वइरोरमहाया नवेवि नि मिमगुणेहि निक्केहि ।
देवी करेउ रक्खं बहरक्खा मणिकलेवस्स ॥ १२ ॥
नागिणि नागम्मेय बइरक्ख सत्ती
जो लहइ नाम केइ लहु भगुहनिणाहे ।
मज्झार्मविरिठेण संठिइ पवी परिक्खिणइविसवेणं ॥ १३ ॥
बरकलसेणं नमीकलेणं जाहि जाहि नासमिसमंकल ! ।
मणिम्मिपुत्तय एइ नाकिमउ एइ नाय म न संचिकव ॥ १४ ॥
नीरउ नामिपि नामकेड बाहण मकमरवाउ ।
जिणि नप्पाह सप्पाह जिव बेचारि कुसल पाव ॥ १५ ॥
दिसि मंचउ नाह दिसि मंचउ मणउ नाइ कल्लु ।
नम्हि नमीउ दिवारा मोक्ख नमीहि कल्लु ॥ १६ ॥
देवरेवस्स जं छत्त तस्स छत्तस्स जो छमो ।
तेण छएमि अप्पाणं मा मे हिंसतु पन्नगा ॥ १७ ॥
ठं ठः ठा ठ स्वाहा । एव
दमरेवस्स य छत्त तस्स छत्तस्स जो छमो ।
तेण छएमि अप्पाणं मा मे हिंसतु भूयणा ॥ १८ ॥

देवदेवस्स ज छत्त तस्स छत्तस्स जो झओ ।
तेण छाएमि अप्पाण मा मे हिंसतु रक्खगा ॥ १९ ॥
देवदेवस्स ज छत्त तस्स छत्तस्स जो झओ ।
तेण छाएमि अप्पाण मा मे हिंसतु जोइणी ॥ २० ॥
देवदेवस्स ज छत्त तस्स छत्तस्स जो झओ ।
तेण छाएमि अप्पाण मा मे हिंसतु साइणी ॥ २१ ॥
देव०,, ,, ,, मा मे हिंसतु डाइणी ॥ २२ ॥
,, ,, ,, ,, मा मे हिंसतु चोरगा ॥ २३ ॥
,, ,, ,, ,, मा मे हिंसतु वालगा ॥ २४ ॥
,, ,, ,, ,, मा मे हिंसतु हिंसगा ॥ २५ ॥
,, ,, ,, ,, मा मे हिंसतु मूसगा ॥ २६ ॥
,, ,, ,, ,, मा मे हिंसतु मुग्गला ॥ २७ ॥
,, ,, ,, ,, मा मे हिंसतु गुज्झगा ॥ २८ ॥
पाससामि जो नमइ तिसझ हलिसहि जम्म वि जाइ अवझ ।
कमठमहासुरकयउवसग्ग झाडिअकोव वझ इस ॥ २९ ॥
मुहि चदप्पह हियइ जिणु मत्थइ पारिसनत्थ ।
इणि मुब्भिहिं मुब्भिउ को फेडणइ समत्थ ? ॥ ३० ॥
उरि मुद्दि सिरिमुद्द पायमुद्द ।
इणि मुद्दि मुद्दिउ हिंडइ चारि समुद्द ॥ ३१ ॥
सखिहि तूरिहि आहविअ सामिअ ! दिन्निअमुद्द ।
एअ दुलघी कोइ न लघइ पारसनत्थि अमुद्द ॥ ३२ ॥



घ—परिशिष्टम् ।

॥ 'उवसग्गहरं स्तोत्रम् ॥'[1]

उवसग्गहरपासं पासं वंदामि कम्मघणमुक्कं ।
विसहरविसनिन्नासं मंगलकल्लाणआवासं ॥ १ ॥
[उपसर्गहरपार्श्वं पार्श्वं वन्दे कर्मघनमुक्तम् ।
विषधरविषनिर्णाशं मङ्गलकल्याणावासम् ॥ १ ॥]
विसहरफुलिंगमंतं कंठे धारेइ जो सया मणुओ ।
तस्स गहरोगमारी—दुट्ठजरा जंति उवसामं ॥ २ ॥
[विषधरस्फुलिङ्गमन्त्रं कण्ठे धारयति यः सदा मनुजः ।
तस्य ग्रहरोगमारिदुष्टज्वरा यान्त्युपशमम् ॥ २ ॥]
चिट्ठउ दूरे मंतो, तुज्झ पणामो वि बहुफलो होइ ।
नरतिरिएसु वि जीवा पावंति न दुक्खदोगच्चं ॥ ३ ॥
[तिष्ठतु दूरे मन्त्रस्तव प्रणामोऽपि बहुफलो भवति ।
नरतिर्यक्ष्वपि जीवाः प्राप्नुवन्ति न दुःखदौर्गत्यम् ॥ ३ ॥]
तुह सम्मत्ते लद्धे चिंतामणिकप्पपायवब्भहिए ।
पावंति अविग्घेणं जीवा अयरामरं ठाणं ॥ ४ ॥
[तव सम्यक्त्वे लब्धे चिन्तामणिकल्पपादपाभ्यधिके ।
प्राप्नुवन्त्यविघ्नेन जीवा अजरामरं स्थानम् ॥ ४ ॥]
इअ संथुओ महायस !, भत्तिब्भरनिब्भरेण हियएण ।
ता देव ! दिज्ज बोहिं, भवे भवे पासजिणचंद ! ॥ ५ ॥
[इति संस्तुतो महायशो भक्तिभरनिर्भरेण हृदयेन ।
तद् देव ! देहि बोधिं भवे भवे पार्श्वजिनचन्द्र ! ॥ ५ ॥]

---

[1] स्मर्यतां शक्य पृष्ठ । [illegible] श्रीपार्श्व-[illegible]-पद्मावती-[illegible] भवति । [illegible] श्रीजिन[illegible] 'उवसग्गहरं' इति [illegible]।

घ–परिशिष्टम् ।

॥ [1]श्रीपादलिप्तसूरिकृता वीरस्तुतिः ॥[2]

गाहाजुअलेण जिण मयमोहविवज्जिअ जिअकसाय ।
थोसामि तिसझाए त निस्सग महावीरम् ॥ १ ॥
[गाथायुगलेन जिन मदमोहविवर्जित जितकषायम् ।
स्तोष्ये त्रिसन्ध्य त नि सङ्ग महावीरम् ॥ १ ॥]
सुकुमालधीरसोमा रत्तकसिणपण्डुरा सिरिनिकेया ।
सीयकुसगहभीरू जलथलनहमडणा तिन्नि ॥ २ ॥
न चयति वीरलील हाउ जे सुरहिमत्तपडिपुन्ना ।
पकयगयदचदा लोअणचक्कमियमुहाण ॥ ३ ॥
[सुकुमारधीरसौम्या रक्तकृष्णपाण्डुरा श्रीनिकेता ।
शीताङ्कुशग्रहभीरवो जलस्थलनभोमण्डनास्त्रय ॥ २ ॥
न च्यवन्ते वीरलीलां हातु ये सुरभिमत्तप्रतिपूर्णा ।
पङ्कजगजेन्द्रचन्द्रा लोचनचङ्क्रमितमुखानाम् ॥ ३ ॥]
एव वीरजिणिंदो अच्छरगणसघसथुओ भयव ।
पालित्तयमयमहिओ दिसउ खय सव्वदुरिआण ॥ ४ ॥
[एव वीरजिनेन्द्रोऽप्सरोगणसङ्घसस्तुतो भगवान् ।
पादलिप्तयमकमहितो दिशतु क्षय सर्वदुरितानाम् ॥ ४ ॥]

एतत् पद्यचतुष्टय निम्नलिखितपद्ययमलपूर्वक तृतीयस्मरणरूपेण स्मर्यतेऽञ्चलगच्छानुयायिभिः—

जयइ नवनलिणकुवलयविअसियसयवत्तपत्तलदलच्छो ।
वीरो गयदमयगलसुललिअगइविक्कमो भयव ॥ १ ॥
[जयति नवनलिनकुवलयविकसितशतपत्रपेलवदलाक्ष ।
वीरो गजेन्द्रमदकलसुललितगतिविक्रमो भगवान् ॥ १ ॥]

१ प्रेक्ष्यतां सप्तविंश पृष्ठम् । २ अस्या सुवर्णसिद्धिप्रतिपादनव्याख्यापुरस्सरा टीका समस्ति, परन्तु सा नाद्यापि प्राकाश्यं नीता केनापि ।

अज वि वट्टइ सुविर्त्ये अवाडियं जस्स 'भरह' वासंमि।
सो वद्धमाणसामी तिहुयणदिवायरो जयउ ॥ २ ॥
[अद्यापि वर्तते सुतीर्थमवाच्छित यस्य 'भरत'वर्षे।
स वर्द्धमानस्वामी त्रैलोक्यदिवाकरो जयतु ॥ २ ॥]



ङ—परिशिष्टम् ।

॥ 'शान्तो वेषः' स्तवनम् ॥



शान्तो वेषः शमसुखफलाः श्रोतृरम्या गिरस्ते
कान्तं रूपं व्यसनिषु दया सङ्गमुक्तं च वृत्तम् ।
इत्यद्भुते त्रिभुवनपरेऽस्मिन्नसाधारणेऽपि
प्रेमस्थाने किमिति कृपणा द्वेषमुत्पादयन्ति ! ॥ १ ॥[1]
अतिशयवती मूर्तिर्येषां मनो मलवर्जितम्
शमसुखफलः मार्गो धर्मः स्फुटः शुभसंश्रयः ।
मनसि कृपया स्पृष्टा तेषां परं नयवत्सलं
किमिति कुमते ! त्यक्त्वा पदं त्वयात् प्रसादकरं तथाम् ! ॥२॥[2]
निरस्तदोषेऽपि तवेन वस्तुके
कृपाश्रमिति भयति सौम्यदर्शने ।
प्रतीपमुखे त्वय्यपि ये पराङ्मुखाः
पराङ्मुखास्ते ननु सर्वसम्पदाम् ॥ ३ ॥
सर्वसत्त्वहितकारिणि नाथे न प्रसीदति मनस्तवापि यस्य ।
मत्कृपाप्रतिविरतमूर्ते—रन्तरं किमिह तस्य परेर्वा ! ॥४॥
त्वयि कारुणिके न यस्य भक्ति—र्जगदभ्युद्धरणैकतानचित्ते ।
न हि तेन समोऽधमः पृथिव्या—मथवा नाथ ! न भाजनं गुणानाम् ॥५॥[3]

1 विशेषकार्यं परस्तवनिन्दया इत्यम्। 2 वसन्ततिलका 3 हरिणी। 4 वैतालीयम्। 5 रथोद्धता। 6 सुन्दरसौरी 'शान्तो वेषः' स्तवमादर्शलिखितशास्त्र प्रथम छन्दोऽनुप्रासमे

एवंविधे शास्तरि वीतदोषे, मध्यस्थभावो परमार्थवेद्ये ।
मध्यस्थभावोऽपि हि शोष्य एव, प्रद्वेषदग्धेषु क एष वादः ॥६॥[1]

न तानि चक्षूंषि न यैर्निरीक्ष्यसे
न तानि चेतांसि न यैर्विचिन्त्यसे ।
न ता गिरो या न वदन्ति ते गुणान्
न ते गुणा ये न भवन्तमाश्रिताः ॥७॥[2]

तच्चक्षुर्दृश्यसे येन, तन्मनो येन चिन्त्यसे ।
सज्जनानन्दजननी, सा वाणी स्तूयसे यया ॥८॥[3]

न तत्र यान्ति जिनेन्द्र! गुणा मितिं
मम तु शक्तिरुपैति परिक्षयम् ।
निगदितैस्तदलं बहुभिः किमिहापरै-
रपरिमाणगुणोऽसि नमोऽस्तु ते ॥९॥[4]



च- परिशिष्टम् ।

॥ [5]श्रीवस्तुपालकृतपुण्यकृत्यस्तुतिः ॥



सपञ्चशतमानक निजपदोत्थधूलीकण-
प्रणुन्नजनतैनस जलधिसङ्ख्यसाहस्रकम् (४५००) ।
सुखासन-सुवाहिनीप्रमुखरूपसच्छ्रीकरी-
शताष्टदश(१८००)सङ्ख्यया समजनि मानमेषा क्रमात् ।१।[6]

करणपक्षशर(५२५) प्रमितो युतो, विविधदन्तविनिर्मितयुक्तिभिः ।
सह बभूव सुकर्मपथे रवि-र्गण इवामरयानचयः क्षितौ ॥२॥[8]

---

१ उपजाति । २ उपेन्द्रवज्रा । ३ अनुष्टुप् । ४ द्रुतविलम्बितम् । ५ सन्तुल्यता यत् प्रोक्तं २५७तमे पृष्ठे । ६ पृथ्वी, चतुर्थे चरणे त्वष्टादशाक्षराणि । ७ देवालयसमूहः । ८ द्रुतविलम्बितम् ।

विंशतिविंशतिमित(११२)सूरिवर्ग
    अनुपमसहस्री द्विशती (४२०) पुना च ।
गह्वरा मुनीनां च दिगम्बराणा-
    मेवान्तर्गतानीह शतानि (११ ०) सह ॥३॥[1]

श्रयः सहस्रविंशती (१२ ०) च महाः
    दश च मार्द (१५) वरतीर्थनाम् ।
अनन्तु चराहसहस्र(४०००)गहून्या
    सार्धानि चत्वारि शतानि(४८) तूर्ण ॥४॥

विक्रमार्कगमय सुवर्ण—वत्र(१२६१)वत्सरत्नमिव्यपाद ।
इत्यवद्धतमप्रवितवर्णे—वरतुपालमथिव ग सुदेऽस्तु ॥५॥[1]

मठीना त्रिंशानि समनिरहा कल्पवणिभि छाविरा
    तथा धनानिरनुनैकपुरतव्यासम् व्ययैः सर्वत ।
माला द्वादश यस्य सार्द्धसहिता पूर्वैनलक्षणमिर
    इत्य वस्मतह विताविहरण श्रीवस्तुपाल कृती ॥६॥

जैनागारसहस्रपञ्चकमिति स्मरे च पारापिर्व
    अथ श्रीजिनमूर्तयः सुविहिता प्राप्तुमसहस्रत ।
माहात्म्या पृथिवीतलं नयसुमं सार्धं सहस्रार्धं
    प्रापश्च परिकल्पिता निजवचैश्रीनिवादत सुतम् ॥७॥

सुश्रावकशतानि सप्त विमला वाच्यस्तु यस्य
    प्रार्थीः पौषधमन्दिराणि सुमहज्जैनाश्च दीपा सदा ।
विद्यापाश्च तथैव पञ्चाधिकाः प्रत्येकतः प्रवर्द
    पञ्चत्रिंशशतानि जैनमुनयो गृहन्ति भौज्यादिकम् ॥८॥[1]

१ [illegible]

शतत्रय षष्टियुत प्रपाणां
सरोवराणां हि शतद्वय च ।
स्नानार्थकुम्भाक्षतपट्टसूरि-
सिंहासनानां न हि काऽपि सङ्ख्या ॥९॥[1]

दत्ताश्चतुर्विंशतिवास्तुकुम्भा, हैमारविन्दोज्ज्वलजादराणाम् ।
वर्षाशनानां हि सहस्रमेकं, तपस्विनां वेदमिता सहस्रा ॥१०॥[2]
इत्थं कृतज्ञेन कृत कुकर्म-मर्मप्रहाराय महोत्सवेन ।
धर्मव्ययो धर्मधुरन्धरेण, श्रीवस्तुपालेन जिनप्रसादात् ॥११॥[3]

छ-परिशिष्टम् ।

॥ श्रीचतुर्विंशतिप्रबन्धगतपद्यानामकाराद्यनुक्रमः ॥

१-३ उपजाति । ४ अत्र चरणादीनामपि समावेश क्रियते । ५ श्रीभर्तृहरिकृते वैराग्यशतके (श्लो ६६) ।

१ इद पद्यं मीडाप्रबन्धे (पृ ५) सार्दीवारप्रबन्धार्थे च दृश्यते । २ सिद्ध-मोर्धप्रतिबे (–८) । ३ सिद्धहस्तप्रबन्धे (श्लो) । ४ बेबीसिंहारस्तवे प्रबन्धे (श्लो. ३) । ५ मुद्रितसुक्तरत्नमालाके (अ. १ श्लो. २२) ।

१-२ समरादित्यकथाया भूमिकायां (पृ १०)। ३ आवश्यकनिर्युक्तौ।
४ समरादित्यकथाया भूमिकाया (पृ १०)।

मिराविपतन्य । ग्नुर्वेदा (श्रे १) । १ वाजमारते (व मा १) ३ मैनमीपत्यदिने (व ११ श्री १)।

¹ पाठभेदपूर्विका गाथेय दृश्यते श्रीधर्मघोषसूरिकृतकालसप्ततिकाया- मेकचत्वारिंशत्तमगाथारूपेण । सन्देहविषौषध्या श्रीजिनप्रभसूरिभि प्रोक्त यदस्या मूलस्थान तित्थोगालीपइन्नयसञ्ज्ञको ग्रन्थ । प्रथमानुयोगसारोद्धार- द्वितीयोदये गाथेय समस्तीति श्रीमेरुतुङ्गसूरय । २ नैषधीयचरित्रे (स १, श्लो. १)। ३ विशेषावश्यकभाष्ये (गा ९३४)।

— वैराग्यशतके (श्लो २१) । [illegible] (श्लो. १५) [illegible]

१ रुद्रटालङ्कारे। २ कुमारसम्भवे (स १, श्लो ५९)। ३ कुमारसम्भवे (स ४, श्लो. ३३)।

———

चपलेदारस्त्रमासरम १५३समयुपापुनीय हर्द स्व पतिमध्रुपापूहा मनी। २ श्रीहरिमदूरिकृते चतुर्वर्मिंसतुत्यासु (श्री २०) ३ ज्ञाने सद्गुणार्विद्दिनिमस्त्।

३-परिशिष्टम् ।

निर्दिष्टग्रन्थनगरादिनाम्नामकारादिक्रमेण सूचिः ।



२७८

[illegible] ४३

[illegible] ११ ६१

[illegible] १
[illegible] २
१५
[illegible] १८१
[illegible] १५,
१५ ६६
[illegible] ३
[illegible] ८, ६१
२३ ३१
[illegible] २२
[illegible] ११८,
[illegible]
[illegible] ६७४
[illegible] ([illegible]) १

[illegible] २७४
[illegible] ९६

[illegible] ([illegible]

[illegible]

[illegible]
[illegible]

[illegible]
[illegible]

ज-परिशिष्टम्

क–परिशिष्टम् ।

प्रकीर्णकटिप्पनकानि ।

१–२
११२ १८ } एतस्यामवसर्पिण्यां चतुर्विंशतिरर्हन्तः–तीर्थङ्करा जिनेन्द्राः सञ्जाताः । तन्नामानि यथा–(१) ऋषभ (२) अजित (३) सम्भव (४) अभिनन्दन (५) सुमति, (६) पद्मप्रभः (७) सुपार्श्वः, (८) चन्द्रप्रभः (९) सुविधिः, (१०) शीतल (११) श्रेयांसः (१२) वासुपूज्यः (१३) विमलः (१४) अनन्तः, (१५) धर्मः, (१६) शान्तिः (१७) कुन्थुः (१८) अर, (१९) मल्लिः (२०) मुनिसुव्रत (२१) नमि (२२) नेमि (२३) पार्श्वः (२४) वीरः । अत्र प्रथमविशेषणेन [illegible] नेमिपार्श्वौ [illegible] के इत्यपि [illegible] । एतच्चरित्रविज्ञासुभिर्विलोक्यतां [illegible] ।

१ ४ पर ज्ञानम् = केवलज्ञानम् उत्तमं पदम् = मोक्षम् ।

१ ५ जीवा-ऽजीवा-ऽऽस्रव-बन्ध-संवर-निर्जरा-मोक्षेति तत्त्वसप्तकम् । विशेषार्थिनाऽवलोकनीया तत्त्वार्थाधिगमस्य(अ १ सू ४)-व्याख्यानुसारिणी टीका (पृ ४१–४९) ।

१ ८ वामाऽङ्गभूः = वामानन्दनः = अश्वसेनपत्नीवामापुत्रः = श्रीपार्श्वनाथः = त्रयोविंशतितमस्तीर्थङ्करः ।

१ ११ आगमबीजम् = त्रिपदी = उप्पन्नेइ वा विगमेइ वा धुवेइ वा ।

२ १ ज्ञानपञ्चके मति-श्रुत-अवधि-मनःपर्याय-केवलेति पञ्चविधानि ज्ञानानि । एतत्स्वरूपार्थं प्रेक्ष्यतां तत्त्वार्थाधिगम(अ १ सू ९ ११)टीका ।

२, २ भव्यजीवाः = आसन्नमोक्षगामी जीवाः ।

२, ५ कायिक-वाचिक-मानसिकक्रियानिग्रहो गुप्ति । एतत्स्वरूपार्थिना प्रेक्ष्यता **तत्त्वार्थ**(अ ९ सू ४)टीका (पृ १८३-१८६)।

२, ६ चक्री = चक्रवर्ती ।

२, ६ चरमतीर्थङ्करस्य विविधानि नामानि । तानि चैवम्—वर्धमान , वीर , महावीर , ज्ञातनन्दन , देवार्य , सन्मति ।

३, १ चतुर्दशपूर्वी । श्रुतज्ञान द्विविधम्—अङ्गबाह्यमङ्गप्रविष्ट च । प्रथममनेकविधम्, द्वितीय तु द्वादशभेदम्, तद् यथा—आचार , सूत्रकृत , स्थानम्, समवाय , व्याख्याप्रज्ञप्ति , ज्ञातधर्मकथा , उपासकाध्ययनदशा , अन्तकृद्दशा., अनुत्तरोपपातिकदशा., प्रश्नव्याकरणम्, विपाकसूत्रम्, दृष्टिपातो दृष्टिवादो वा । अन्तिमस्य परिकर्मसूत्र- पूर्वानुयोग-पूर्वगत-चूलिकेति पञ्च प्रकारा । तत्र पूर्वगतस्य चतुर्दश प्रकारा ये पूर्वेति प्रसिद्धा । एतेषा सस्कृतप्रायाणा समस्ताना ज्ञाता चतुर्दशपूर्वी-चतुर्दश-पूर्वधर कथ्यते । पूर्वस्वरूपजिज्ञासुभि दृश्यता **नन्दीसूत्रं** (सू ५७) **प्रवचनसारोद्धारो** (गा ७११-७१८) वा ।

३, १३ पञ्चेन्द्रियसवर , नवविध ब्रह्मचर्यम्, चतुर्विधकषायमुक्तता, महाव्रतपञ्चकम्, पञ्चविधाचारपालनसमर्थता, पञ्च समितय , तिस्रो गुप्तय इति षट्त्रिंशद् गुणा सूरे —आचार्यस्य ।

३, १६ निर्युक्ति = जिनप्रवचनस्य पद्यात्मिका प्राकृतभाषानिबद्धा व्याख्या ।

९, १३ "सप्त वर्षाणि वर्ष वा, पूर्णिमाया यथाबलम् ।
तप प्रकुर्वता 'पुण्ड—रीका'ख्य तप उच्यते ॥"

इति **तपोरत्नमहोदधौ** ६६तमे पत्रे।

९, १५
९९, १८ } साधर्मिकवात्सल्यम् = समानधर्मिण प्रति प्रीति । एतत्स्वरूप
२००, ३ } समस्ति **उपदेशतरङ्गिण्या** (पृ १६०-१६१)।

११, ९ अवधिना = तृतीयेन प्रकारेण ज्ञानेन ।

१२ ९ गरुडन्त = नागकुमारराजानिकाः । विस्तरार्थं तत्त्वार्थ(अ ४ सू. ७)भाष्य (पृ २७७) स्थानाङ्गसूत्रं च ।

१३ १० चक्रेश्वरी विद्या । अस्या विस्तृत स्वरूप नाथप्रतिष्ठे प्रतिपन्नम् ।

१३ १
१२१ ४
१३१ १३ } परकाय्यप्रवेशविद्यास्वरूप वर्णनप्रसङ्गे योगशास्त्र (प्र. ५ श्लो २६४–२७२) तद्विवरण च । परकायप्रवेश[illegible] वैभवैरपि परिस्फुरन्ते ।

१४ ५ "आधार [illegible] पर्व मन्त्रसि [illegible] [illegible] [illegible] [illegible] वा पानके निरवधारणकार्ये" इति योगशास्त्र(प्र. १ श्लो. १८)विवरण ।

१४ १४-१५ [illegible] विद्या [illegible] न स्पष्टं ज्ञायते ।

१४ १५ इतिवृत्त् [illegible] विद्युद्भिरस्मा चतुर्विंशति काव्य [illegible] (पृ ५८–५९) ।

१४ १९
५१ ६ } "पाटनप्रयत्नसिद्ध पुरुषविशेषो वा मन्त्र" इति योगशास्त्र(प्र. १ श्लो. १८)विवरण । वैभवन्तेऽप्यधिष्ठाता सूरिमन्त्र । एतस्य सामो निर्विशेषकल्पः । एतदधिकारिण आचार्या सन्ति । एतस्य कल्पोऽपि वर्तते ।

१८ १ [illegible] वर्णित श्रीजिनप्रभसूरि[illegible] विधिप्रपायाम्(पृ. ७९९–८१)श्रीवर्धमान[illegible] श्रीहेमचन्द्रसूरिभिः ।

१९,११ अमरास = तपोविशेषः । विद्युद्भिः विस्तरार्थ तत्त्वार्थ(अ. ९ सू. १९)टीका (पृ २१६–२१७)

२४ ८ "मन्त्रजपहोमादिसाध्या स्त्रीदेवताधिष्ठाता वा विद्या" इति योगशास्त्र(प्र १ श्लो. १८)विवरण । [illegible] विद्या कथं सिध्यत इति न स्पष्टं ज्ञायते ।

२७, १३ } हेमसिद्धिविद्याऽवतारिता पउमाभ चालुपूत्रेति गाथायामपि ।
३४, १३ } एतज्जिज्ञासुभिर्विलोक्यतामनेकार्थरत्नमञ्जूषा नाम म-
१३८,२५ } दीयाऽऽवृत्ति ।

२९,१४-१५ ईशानेन्द्रसामायिकविषयस्वरूपार्थिना विलोक्यता तत्त्वार्थ-
(अ ४, सू ४, ६)टीका ।

३०,१४ } नमो अरिहंताणमित्यादि नमस्कारसूत्रम् । एतदर्थं विलोक्य-
८४, ६ } तामनेकार्थरत्नमञ्जूषा । अर्हत्-सिद्धा-ऽऽचार्यो-पाध्याय-
साध्विति पञ्च परमेष्ठिन. ।

३३, १२ दिवाकरसञ्ज्ञा पञ्चवस्तुनामके ग्रन्थे (गा १०४८) दृश्यते ।

३५, १३ सर्षपविद्याया विशिष्ट स्वरूप न कुत्रापि मे दृष्टिपथमागतम् ।

३७, ७ अर्धमागधीं भाषामाश्रित्य न्या. व्या तीर्थ हरगोविन्ददास-
प्रणीत पाइअ-सद्द-महण्णव'नाम्न कोशग्रन्थोपोद्घातो (पृ
१६-२१) द्रष्टव्य

३७, १० पाराञ्चिक दशम प्रायश्चित्त समस्ति । प्रायश्चित्तदशकस्य
स्वरूप वर्णित जीतकल्पे (गा. ९४-१०२)तत्त्वार्थ(अ ९,
सू २२) च टीकायां (पृ २५३)।

३८, १ पार्श्वनाथद्वात्रिंशिका न मे नयनगोचरता गता ।

३८, १५ नलिनीगुल्मविमानमष्टमदेवस्थान इति निर्देश समवायाङ्गे
समस्ति ।

३८, २३ सामायिक नाम प्रथम शिक्षाव्रतम् । एतदुद्दिश्य प्रोक्त योग-
शास्त्रे (प्र ३)—

"त्यक्तार्तरौद्रध्यानस्य, त्यक्तसावद्यकर्मण ।
मुहूर्तं समता या ता, विदु सामायिक'व्रतम् ॥८२॥"

विशेषार्थिनाऽवलोक्यतामेतस्य विवरणम् ।

३८,२३,२४ } आवश्यकचूर्णौ श्रीहेमचन्द्रसूरिकृते च परिशिष्टपर्वणि
३९, १ } (स ११, श्लो १५१-१७१) श्रीअवन्तीसुकुमाल-
स्य मृत्यु कन्थारिकाकुडङ्गे' जात, तत्र तस्य पुत्रेण
महाकालाभिधं जिनभवन श्रीपार्श्वप्रतिमापरिष्कृत

मारितमित्यायुक्तेषा वर्तते। जैनपरम्परानुसारेणैतत्स्था-
पयितः विक्रमसंवत्सरम् द्विशतवर्ष्यापूर्विका मत्त्ऽ-
वन्तीसुकुमाल' श्रीआर्यसुहस्तिसूरेः शिष्यः।
एवद् स्थानं सिप्रानदीसमीपेऽस्तीति निर्देशः प्राचीन-
ग्रन्थेषु। "कुडङ्गके कुडङ्गेश्वरायतनं' इत्यमरकोषे
तृतीये काण्डे (श्लो. १७)। अनमहलुमीयते यदुतैतद्
कुडङ्गेश्वरायतनं सम्भवति।

अधुना महाकालेश्वरं मन्दिरं स्थानं सिप्रायाः पूर्वे तटे सिद्धाय
मुक्तेश्वरेऽस्ति। प्राचीनसम्पाल्महाकालस्य महिमा वर्ण्यते यतः
स्कन्द मत्स्य-नारसिंहपुराणेषु रघुवंशे (स. ६, श्लो. १४)
मेघदूते (श्लो. ३४) चैतस्य माहात्म्यस्य निर्देशो वर्तते।

२६ १-७ प्रभावकचरित्रे 'न होय मोक्खह्रि साले मम धारा म
मोक्खु' इति विशिष्टं पाठान्तरम्। तत्रास्य पद्यस्यार्थोऽधिकम्
दर्शितम् अधिकार्थस्य सामर्थ्याभावात्। श्रीवृद्धवादिना
नमेकेऽर्था सूचिता इति श्रीप्रभाचन्द्रसूरेरभिप्रायः।

३० १२ धीमान्दिगम्बराचार्योऽत्र सम्यक्त्वमुच्यते। अस्य विवेचनं विद्यते
तत्त्वार्थे (अ १ सू. २ १ ७ ८) द्रष्टव्यम्।

३० १२ शत्रुञ्जयतीर्थमाहात्म्यं प्रस्तुता ७६तम पृष्ठेऽस्य टिप्पणम्।

४२ ११ सिद्धसारस्वतस्य विस्तृत स्वरूपं न मे नवनन्देश्वरयो मतम्।

४३ ८ सौरमन्त्रः श्रीपतीति विशिष्टे नामक स्थापनामात्रत्।

४३ ११ वैक्रिय शरीर द्वितीयं शरीराणां पञ्चविधत्वात्। एतत्स्वरूपं
समधिक तत्त्वार्थे (अ २ सू. ३७-४९, ४१) द्रष्टव्यम्।

४४ ७ सूक्ष्मशरीरस्य स्वरूप स्पष्टं नावगम्यते।

४५ ११ (शत्रुञ्जय) नवनवग्रामितो ग्रन्थो न कुत्राप्यधुना दृश्यते।

५७ १ 'वीरस'तो नामधन्यान्वेष्टे एष कोशान् यो प्रामोऽस्त्यधुना स
रामसैन्यासीन इति सम्भावना विद्यते।

५८, ६ } द्वासप्ततिकलानामुल्लेखो वर्तते समवायाङ्गे द्वासप्ततितमे सम-
२०७,१ } वाये राजप्रश्नीये दृढप्रतिज्ञशिक्षाप्रकरणे च। सन्तुलनार्थं प्रेक्ष्यतां कामसूत्रम्। ओविपनकचतुष्पष्टिकलानिर्देशोऽस्ति जम्बूद्वीपप्रज्ञप्तिवृत्तौ प्रमेयरत्नमञ्जूषाभिधायाम्।

५९, १३ त्रिधा = मनसा वचसा कर्मणा च।

५९, २४ निर्ग्रन्थशब्देन जैनमुनिर्ज्ञेयः। एतत्स्वरूपजिज्ञासुभिः प्रेक्ष्यतां तत्त्वार्थ(अ ९, सू ४८)टीका (२८२–२८५)।

७०, १८ अर्हत्-सिद्ध-साधु-धर्मेति चत्वारि शरणानि। प्रेक्ष्यतां ९२-तमे पृष्ठे प्रथमं पद्यम्।

७१, २३ सम्भाव्यतेऽसौ सूरिः 'धम्मविहि'प्रकरणप्रणेता। एतत्प्रकरणस्य प्रणयनकालादि त्वेवम्—

"धम्मविहिपगरणमिम विसोहग नाणदंसणगुणाणं।
दसदिट्ठंतेहि जुअं सम्मत्त देउ सिवसोक्खं॥
एकारस नवएहिं कत्तियपडिवइयाए निप्फन्नं पगरण एयं॥
× × × सम्मत्त प्र ६९५०
नहमुहरुद्दक(१११०)जुअे काले सिरि विक्कमस्स वट्टंते।
पोसासियतइआए लिहियमिणं सुक्कवारंमि॥"

७४,१६ चतुर्दश काव्यानि मदीयगूर्जरानुवादपूर्वकाणि मुद्रापितानि चतुर्विंशतिकायां (पृ १८१–१८५)।

७४,२० अक्षयवचना गुटिका किंस्वरूपेति न ज्ञायते।

७८,१८ वर्णस्वरपरावर्तनकारिणी गुटिका केति नावगम्यते।

८४, ६ प्राणातिपात-मृषावादा-ऽदत्तादान-मैथुन-परिग्रह-क्रोध-मान-माया-लोभ-राग-द्वेष-कलहा-ऽभ्याख्यान-पैशुन्य-रत्यरति-परपरिवाद-मायामृषावाद-मिथ्यात्वशल्येति पापस्थाना-ष्टादश-कम्।

८७,२० रैवतकतीर्थमहिमजिज्ञासुभिः प्रेक्ष्यतां 'श्रीमज्ञानरपादपूर्तिरूप-काव्यसङ्ग्रह'स्य प्रथमे विभागे श्रीगिरिनारकल्पः (पृ ११५-

१८) । श्रीधर्मघोषसूरिप्रणीतो महीपाठमाक्येन सह मया सम्पादितश्च ।

९१ ८ हिंसा ऽनृत स्तेया ऽब्रह्म परिग्रहेभ्यः सर्वतोऽभिविरति-रूपाणि पञ्च महाव्रतानि ।

९४ ७ भातुश्रीतीर्थिकाणां विस्तृत स्वरूपं न ज्ञायते ।

९० ११ दोगुन्दुकदेवत्वमभिप्रेत्य प्रोक्तमुत्तराध्ययनसूत्रस्य श्रीभावविजय विरचितायां टीकायाम्–

" दोगुन्दुकाश्च त्रायस्त्रिंशाः तथा च वृद्धाः त्रायस्त्रिंशा देवा नित्यं भोगपरायणा दोगुन्दुका इति भण्यन्ते । "

१ ८१ चतुरङ्गचमूः = अश्व गज रथ पदातिसम्पूर्णिभिन्न सेना ।

१ ८ २२ पौषध तृतीय शिक्षाव्रतं समस्ति । अस्य स्वरूप योगशास्त्रे (प्र ३) यथा–

'चतुष्पर्व्यां चतुर्थादि कुव्यापारनिषेधनम् ।
ब्रह्मचर्यक्रियास्नानादित्यागः पौषधं व्रतम् ॥८५॥'

विशेषार्थिना श्रीमदागमेतस्य विवरणम् ।

१ ० ४ पुलाकबकुशकुशीलनिर्ग्रन्थस्नातकाः ।ष्ठ्याचा (?) । एतद्विषयकाणि पाक्षिकसूत्रमपि द्रष्टव्यं समयः । अपवादोपेतरपराजयेनैव व्यवस्थितमपि समालोचना तत्त्वार्थ(अ ९ सू. १८)-टीका (पृ २१७-२१५) ।

उपशमश्रेणेर्विवरणं वर्तते कम्मपयडी(क. ५ गा ११-४५)-नाम्नि ग्रन्थे तट्टीकायां च ।

१ ९५ जिनकल्पस्य स्वरूपं वर्तते तत्त्वार्थ(अ ९, सू ९)टीकायां (पृ २२५ २२६) ।

१ ९५ परिहारविशुद्धचारित्रस्वरूपं तत्त्वार्थ(अ ९ सू. १८)-टीकायां(पृ २११ २१४) समस्ति ।

१ ९ ८ सत्वानामष्टकस्य स्वरूपार्थिना प्रष्टव्या तत्त्वार्थ(अ ८ सू १२)-टीका(पृ १५४) ।

१०२,८ संहननषट्कस्य स्वरूपं वर्तते तत्त्वार्थ(अ. ८ सू. १२)-टीकायां (पृ. १५३-१५४)।

११४,४ पर्युषणं नाम जैनानामत्युत्तमं पर्व । एतन्महिमादिवृत्तान्तो वर्तते कल्पसूत्रस्य श्रीविनयविजयोपाध्यायविरचितायां सुबोधिकाख्यायां वृत्तेः प्रारम्भे ।

११२,२१ चिन्तामणिमन्त्रस्य विस्तृतं स्वरूपं न मया कस्मिंश्चिद् ग्रन्थे दृष्टम् ।

१२०, ७ 'कुप्यं रूप्यसुवर्णव्यतिरिक्तं कांस्य-लोह-ताम्र-त्रपु-सीसक-मृद्भाण्ड-वंश-काष्ठ-हल-शकट-शस्त्र-मञ्चक-मञ्चिका-मसूरकादि-गृहोपस्करस्वरूपं' इति श्रीश्राद्धप्रतिक्रमणसूत्र(गा १८)-वृत्तावर्थदीपिकाभिधायाम् ।

१२३,२० वचा= छन्दोविशेषः ।

१२६, ९ आचाम्लम् = आचामाम्लम् = विकृतिषट्कादित्यागपूर्वकमेक-भक्तम् । आचामः - अवश्रावणम्, अम्लम् - चतुर्थो रसः, तौ एव प्रायेण व्यञ्जने यत्र भोजने ओदनकुल्माषसक्तुप्रभृतिके तदाचामाम्लम् । विशेषविवरणार्थिना प्रेक्ष्यतां प्रत्या-ख्यानभाष्य(गा. ३)वृत्तिः ।

१२६,१२ रसा-ऽसृङ्-मांस-मेदो-ऽस्थि-मज्जा-शुक्राणि धातुसप्तकम् ।

१५९,१६ अच्युतकल्पम् = द्वादशं स्वर्गम् ।

१६८,२१ पुत्रकत्तिद्धिः कथं वर्तत इति न विज्ञायते मया ।

१८६,१ रघुवंशे (स. ४, श्लो. ४९, स. ६, श्लो. ६०) पाण्ड्येति निर्देशः । पाण्ड्यानां जनपदानां राजा 'पाण्ड्य' इति मल्लिनाथ-कृतायां सञ्जीविन्यां वृत्तौ ।

१९६,१४ } कायोत्सर्गः = आसनविशेषः । उक्तं च योगशास्त्रे
२४५ १ } (प्र ४)-

' प्रलम्बितभुजद्वन्द्वमूर्ध्वस्थस्यासितस्य वा ।
स्थानं कायानपेक्षं यत्, 'कायोत्सर्गः' स कीर्तितः ॥१३३॥'

२२० ६ जैनबिम्ब-भवना ऽऽगम-साधु-साध्वी-श्रावक-श्राविकाख्यानि सप्त क्षेत्राणि । विस्तरार्थिना विलोकनीयं योगशास्त्र(प्र ३ श्लो. १२०)स्य स्वोपज्ञ विवरणम् ।

२२१ २४ चैत्यवन्दन-गुरुवन्दनविधिस्वरूपादिविज्ञासुभिर्विलोकनीयं योगशास्त्रस्य तृतीय प्रकाशस्य विवरणं च ।

२२५,२० गद्यमिदमत्र निर्देश्य मन्यसि विज्ञप्तिपत्र(पृ. २०५०)-मीक्षणम् ।



न—परिशिष्टम् ।

॥ शुद्धिपत्रकम् ॥



[1]अशुद्धि	शुद्धि	पृष्ठम्	पङ्क्ति
०	एभिर्दानपद्त्रिंशिकाऽपि निरमायि	९	१५
उवसग्गहर पासम्	उवसग्गहरपासम्	७	१६
र्पीत्	र्पीत्	८	१६
गृहलक्ष्म्या	गृह लक्ष्म्या	१०	१५
चार्यों	चार्यो	१३	२२
स्वर्णकीर्तिर्मात्॰	स्वर्णकीर्तिर्मातृ॰	१४	१०
साध्ठयौ	साध्व्यौ	१५	८
'गूर्जरधरादिशि	'गूर्जर'धरादिशि	१५	१५
विक्रमेण	विक्रमेण	१५	१५
क्रुद्घो	क्रुद्धो	२१	१
वौद्धभक्तो	वौद्धभक्तो	२१	४
वौद्धाना	वौद्धाना	२१	८
भुवनस्य	भुवनस्य	२२	११
॰नारीश्वर	॰नारीश्वर—	२८	२२
स्वर्गस्य	स्वर्गस्य	३२	३०
॰कूटमटति	॰कूट'मटति	३४	६
शके	शते	३४	२३
आयान्ति	आयन्ति	३५	८
अणफुल्लियफुल्ल	अणफुल्लिय फुल्ल	३६	६
क्षामिता '	क्षामिता ,	३६	१०
प्रथमा	प्रथमा(१म)	४०	६

१ सूच्यादिप्रणयनप्रसङ्गे दृष्टिपथमागता अशुद्धयोऽत्र दीयन्ते ।

अशुद्धिः	शुद्धिः	पृष्ठम्	पङ्क्तिः
॥२॥	॥२॥	४१	९
रंभे	रम्भे	४१	
४ च्छाह्र्	४ च्छाह्र्	४१	२४
ह(यी)तो	हन्तो	४८	१
केसव-हु चक्रि केसी	केसव हु चक्रि केसी	४९	१
केशवा द्विचक्रिकेशिनो	केशवो द्वौ चक्रिणौ केशी	४९	२४
विद्त्तम्	विभुत्तम्	५	७
गतम्	गतम्	५१	२
भावकम्पन-श्रि	भावकम्पनश्रि	५५	९
कर्मम-	कर्मम	५६	१
स्पैव	स्पेव	५९	१
आमरान्ना	आमरान्न	५९	१४
सम्यग् रत्न	सम्यगत्ना	६१	१
राशिप्मभिरे।	रोशप्मभिरे।	६२	११
पृच्छमान्	पृच्छमान्	६२	१९
रिण्ण	रिण्ण।	६४	४
तेन विना	तैर्विना	६६	१४
श्रुतस्तौ	श्रुतास्तौ	६७	२५
धर्मार्थ	धर्मार्थ	६८	२
स्थौ ।।	स्थौ	६०	१
गिरर्णैपीव्	गिरर्णैपीव्	७	१
पूर्वव्	पूर्ववत्	७	२२
महाप्रजमप्पो	महाप्रजमप्पो	७२	४
पामि । ।"	पामि ।	७५	९
गुह्यत्णु रक्षा	गुह्यत्णुरक्षा	७६	८
बप्पमाहुर्वि	बप्पमाहुर्वि	७७	२

अशुद्धिः	शुद्धिः	पृष्ठम्	पङ्क्तिः
मारस्पाद्	मारस्पात	१ ४	१६
राज्ञाऽस्माभि	राज्ञा(/ राज्ञा)ऽस्माभि	११७	४
श्रीवीर	श्रीवीर	११९	८
हरिहर	हरिहरा	११९	१६
तत्र भक्त्या	तत्रभक्त्या	१२२	१४
मन्त्रिन् !	मन्त्रिन् !	१२४	२१
एव विशात्मा	एकविंशात्मा	१२६	९
कैपा	कैपा	१२७	२
कृपाणगुण	कृपाण गुण	१२०	१०
जन्मगर्त	जन्म गर्त	१३२	१६
राजाऽग्रे	राजाग्रे	१३२	२१
घूद्रक	घूद्रके	१४४	२१
स्थापित	स्थापित	१५	१२
श्रीमन् महावीर-	श्रीमन्महावीर	१५	१६
सुराप्रू(प्र्)	सुराप्र	१७२	२
दुर्मेधस् ।	दुर्मेधस् ।	१८०	१
तर्हि	तर्हि	१८८	२
स्वर्णपीठी	स्वर्णपीठी	१९६	०
निर्वित्य	निर्वित्य	२ ८	७
निर्मितगति	निर्मितगति	२११	१५
पूपूलश्री	पूपूलश्री	२१८	१
कुमारा देवी	कुमारदेवी	२२४	१९
वैविध्यभाग	वैविध्य-भाग	२२८	१४
॥ ३ ॥	॥ ४ ॥	२१	२१
	१२ शाबुक	२३२	२१
वनप	वन्मे	२१७	०

अशुद्धिः	शुद्धिः	पृष्ठम्	पङ्क्तिः
पुनडौ	पूनडौ	२३७	१२
श्रीवस्तपाल !	श्रीवस्तुपाल !	२४१	"
ऋषभनेमि०	ऋषभ-नेमि०	२४१	२५
श्रीविमलोदण्ड०	श्रीविमलो दण्ड०	२४२	२१
पुष्पस्रक्दाम०	पुष्पस्रग्दाम०	२४३	७
त्रैराग्यादा-	वैराग्यादा-	२५५	१५
पारस्सनाम	पारसनाम	२६२	५
छ-परिशिष्टम्	ज-परिशिष्टम्	२७७	१

